शुल्बसूत्रव्याख्या शुल्बसूत्रप्रकाशिका

५५०४

~~[illegible]~~

॥ इदं पुस्तकं विभागोत्तरं याज्ञिकदेवकस्य ॥
याज्ञिकसर्वात्मात्मजयाज्ञिकदेवकस्येदं
पुस्तकम् पत्राणि सप्तविंशत्यधिकशत ॥

३०५०

ॐ नमो महागणपतये॥ गर्गसिद्धांतपद्मानां प्रकाशोदयहेतवे। मार्तंडाय नृसिंहाय पित्रे श्रीगुरवे नमः॥१॥
गंगादेवीमहं वंदे ज्ञानदां मातृरूपिणीं। जातं यस्याः पयःपानात्सारस्वत्यवगाहनं॥२॥ पार्श्वेशास्त्र-
समुद्रस्पलब्ध्वे तल्लिख्यते यतः॥ स्वकल्पितचर्चा कात्र न कार्या विबुधैरतः॥३॥ तर्कशास्त्रं च मीमांसाय
उद्धाय प्रयोज्ञेना। तातैस्तमपि वंदेत्र गर्गविद्यार्थवित्तमं॥४॥ अधीत्य सकलं शास्त्रं श्रीनृसिंहाख्यग-
गुरोः। तन्यते विश्वनाथेन गर्गस्य सूत्रप्रकाशिका॥५॥ अथैतच्छास्त्रं नारब्धव्यं विषयाभावात्॥ ॥
तथाहि। तत्किं सूत्रार्थप्रकाशकं वा॥ सूत्रादनधिगतार्थबोधकं वा। सूत्राविविक्तविवेचकं वा।
सूत्रापेक्षितपूरकं वा। न तावत्प्रथमः कल्पः॥ आवसथ्याधानं दारकाल इत्यादिसूत्राणां स्पष्टा- ॥१
र्थत्वात्। न द्वितीयः। शास्त्रोदयनवबोधः शास्त्रानुपादानमूल[illegible]नपाद्वयेनापि प्रकारांतरलभ्य

तामधिगत्यग्रंथगौरवाद्बालस्याल्पीयसूत्रितं । तेनन्नाप्यपूरितापेक्षयाऽधिकंन त्यक्तमित्येवं कः समासेन । कथं
वाऽतीतानागतद्रष्टाऽऽचार्यः सूत्रमिदमीमांसलधीसापेक्षं वदेत । न चाशुरेव स इति वाच्यं । वैपरीत्यस्या
वप्रुवचनात् । प्रत्यक्षीकृतधर्ममूलकत्वेन सूत्रस्यापानादीनवत्वेन न तदुपायस्यापानादीनवत्वं पौरुषे
यत्वेनाद्यनवत्वात् । नापि तृतीयः । न हि किंचित्सूत्रे स्वरूपत एव क्षुण्णं । अपि तु बुध्यधीनं तत् । तथा चेदा
षाविच्छेदादनवस्थैव पर्यवस्येत् । नापि तुर्यः । अधिकारिणां स्वमत्यर्थानुष्ठानाय प्रवृत्तः कथं नाम्नाऽपेसा
पेक्षं वदेत् । वदंश्चाशक्तेः किं प्रसक्तिं निरेव कल्पनं ग्रासीकुर्यादिति प्राप्ते ब्रूमः । सूचनात्सूत्रं लिंगोपन्या
सादिति परिभाषितार्थः । तदुक्तं । सूचनात्सूत्रमित्युक्तं सूचनं लिंगमात्रकम् । तन्मात्रं साधकेन स्यादिनाऽसा
ध्यप्रयोगतामिति । तथा च तत्सूचितार्थद्योतकेन नाप्येणाल्पमिति । यदुक्तं स्वल्पं स्पष्टार्थं च मिति तद

पिनासर्वेषां नद्यारेणारणीयपक्षे योन्यथीयधौरेयमंतरेणसिद्धांतकोटिरधिगंतुं शक्या । न पावन्यायगर्भा
गर्भसकलप्रश्नार्थद्योतकेनावश्यं भाव्येणेनाद्यमिति । न च वक्तव्यं न्यायाधानकर्तृत्वबोधकत्वा
न्नूनत्वं । सूत्रेन च लक्षणासूत्रत्वव्याकोपादिति । केचित्तु शक्तिस्वभावत्वात्सत्रेऽपि विध्यर्थवाद
विवेकार्थं न्यायापेक्षेति । तन्न । अर्थवादः परकृतेन कल्पनेनापपत्तेः । न वेष्टापत्तिः । संग्रहेणेदा
नुपपत्तेरिति । यच्चोक्तं द्वितीयपक्षे दुष्टमूलकस्य दुष्टत्वादिति । तन्न । आर्षत्वेनाकरस्यादुष्ट
त्वादिति । तर्कन्यायनिरूपणाय च न तदुपायोऽपि दुष्ट इति नाप्रामाणिकत्वं । एतेन विप्रत्नोऽपि नि २
धि रस्तः । तत्तीयपक्षेनाप्यनवस्था । माध्यादृष्पर्यगमनेन कृतत्वस्याकौकोंऽनुदयात् । अत एव तु यो
पि । सूत्रस्योपायापेक्षायाः कृतत्वादितित्वादिति । न च कृतावश्यापेक्षानपायविहरिह

रादिनाप्यादिनिरेव तदर्थसिद्धेः किमर्थमिदमारभ्यत इति चेन्न । किमेकमिन्नेसामर्थ्यमपि नि
तियद्विशेषतद्यासाधुसमर्थितं हरिहरस्य प्रामाण्यं । ककादिना तस्यापि तथावकुंराक्यचात्त्वा अथ विशेषप्र
तिपादकं चेत पाचं प्रोच्यते । हरिहरारुद्रेण विशेषप्रतिपादकयानल्पतीति वेद्य । नाप्रकृते
पि विशेषप्रतिपादकस्य पूर्ववत्त्वादिप्तलमति विस्तरेण ॥ तथा च प्रकृतेप्यास्य सामर्थ्याः वि
धमानचाद्दारभ्यतेनाद्यो ॥ अथातो गृह्यस्थालीपाकानां कर्म प्रोच्यत इति सूत्रद्वयोः ॥ अत्रा
यमपराद्धः आनंतर्यमंगर्थ बोधयति । न च यतदुच्चरितस्य सकृदर्थगमकत्वमि
ति विरोधः । राह्यानंतर्यमात्रं बोधयति । श्रवणानंतरं मंगलमिति संप्रदायः । न वीनास्त्यना
नाप्यविद्यायाः प्रथमतदुच्चरितमपि पदमानकार्यप्रतायकं न वत्येवानात्पर्यज्ञानस्य

शाब्दबोधहेतुत्वादित्याहुः। यत्तु प्रश्नार्थयिमप्यशाब्द इति। तन्न। संदेहजिज्ञासामूलकत्वात्प्रश्नस्य। प्रश्नेतेव
संदेहाभावात्। अनध्यवसायमूलकः प्रश्नः श्येन्द्रानं। अतः शाब्दानन्वयापत्तेः। केचित्तु क्रमतात्
पर्यकतामाहुः। तदपि न। प्रधानफलफलकत्वेनांगानां फलोत्पत्तौ प्रधानमुपकर्तुं प्रवृत्तानां यु
गपद्भुवानाशक्यत्वेन क्रमाकांक्षायामघेनावित्यादिनोपात्तो यथाऽह वस्त्रपरिधाना
द्यानंतर्यमिंजनादेर्बोधयितुमसमर्थमिव तत्। तन्न। पूर्वोपि क्रोतपद्यपर्तावाद। नन्वेवम
नंतर्यार्थविवर्ण्यतः का गतिः। किंवत्क्रमतात्पर्यकतायां तत्काण्डजातक्रमाधिकरणवि
षः। व्यवधानेपि क्रमप्रसंगाभावात् क्रमापत्तेवायुक्तेत्याचेत्। न। अव्यवधानार्थमेवानंत ३
र्यापर्ययमाऽऽश्रयणात्। विवाह्यानंतरभावप्रत्यक्षमिति। अन्यपाप अनेकालबा

धपिदिषान्नावेन प्रायश्चित्तादिकर्तव्यताबोधकविधेरप्रामाण्यप्रसंगः। अतः शाब्दोहेहत्वर्थः॥ अथाधि
कारिणा आकांनाय विज्ञेबेन कर्तव्यमिति यतः प्रतिपादितं। अतस्तस्याधानादिश्रकलकर्मानुष्ठाना
यगृह्यस्थालीपाकानां कर्म मया प्रोच्यत इत्यन्वयः। मशाकानिवृत्यर्थं धूमार्थिनोहेतुत्वेनवह्न्युपादानवत् फला
र्थस्य तु पुरुषार्थानुष्ठानार्थिनो हेतुत्वेन ग्रोपादानं। धूमे वह्निवत्तदर्थानुष्ठानेस्तु तत्रस्यापि हेतुत्वमतः शाब्दा
र्थः। केचित्तु यतः श्रौतानुक्तानि। अत स्तत्राधिकः। रपक्कुन्यायेनाधिकारसंपादकतया श्रौतान्तर्निविष्टत्वान्नि
अतो हेतोर्गृह्यस्थालीत्याद्यन्वयाहेत्वर्थतामतः शाब्दस्यवर्णयंति। गृहं गृहण्यन्विता तत्र जातो ह्यः। स्थाली ग
ताम्रादिनिर्मितायां तंडुलादेः पाकः स्थालीपाकः। गृह्यश्चासौ स्थालीपाकश्च गृह्यस्थालीपाकाः। तेषामि
त्यर्थः। अत्र व्याख्यास्यत इत्यध्याहारं वर्णयंतः हरिहरादयः प्रष्टव्याः। तावदेषाकस्य प्रतिज्ञा। अत्र कर्तुर्वि
तेषां वा न तावदाद्यः। आचार्येणैकस्यापि व्याख्यानात्। न द्वितीयः। अनभ्युपगमात्। अध्याहारा
नुपपत्तेश्चेति दिक्॥ एवं च गृह्यस्थालीपाकानां कर्म तत्कथमनुष्ठेयमित्याकांक्षायां आवसथ्यादि

कर्म
सकलकर्माधाराग्नीपरिग्रहाणामाह॥ परिसमुह्य। कुशैरिति शेषः। उपलिप्य। गोमयेनेति शेषः। उल्लिख्य॥ स्फ्येने
ति शेषः। उद्धृत्य। अनामिकाङ्गुष्ठाभ्यामिति शेषः॥ अभ्युक्ष्य। पवित्रोदकेनेति शेषः॥ एते वस्थालीपाका
र्थं। अग्निमुपसमाधाय। आवसथ्याग्निहोत्राद्यग्निमिति शेषः॥ कथमेतत्सामान्यप्रमाणं पक्षपात इति
न्यायादिति चेत्। नालौकिकविषये पञ्चसु वेदिः शालायामित्यारभ्य उपलिप्य उद्धृतावोक्षितेऽग्नि
मुपसमाधायेत्यपवादस्याचार्येण सूत्रणात्। उपलिप्य उद्धृतावोक्षितेऽग्निमुपसमाधायेत्ययमपवादः परि
समुह्येत्याद्युत्सर्गविधिं बाधते। यद्यप्यामास्य प्रकृते सामान्यविशेषभावः तथापि विवाहप्रकरणे त्रयाणा
मेव संस्काराणामुपादानादेते पञ्चसंस्कारा अग्निहोत्रादिविषया एवेति ज्ञायते। अन्यथोपलिप्य इत्याद
४ नां संस्कारवदा विकल्प त्रिरिति ध्येयं॥ दक्षिणतो ब्रह्मासनमास्तीर्य॥ अग्नेर्दक्षिणतः ब्रह्मणा उप ४
लक्षितं आसनं ब्रह्मासनं। तत्र आस्तरणं च स्वादि ब्रह्मासनास्तरणं। तत्रैव चेत्यर्थः। यद्वा पंचाशाङ्ङि

अ=२

ऊरौर्ब्रह्मत्फल्कचासंयाशासं स्थाक ऊरा वर्तुं वा स्थापयित्वेत्यर्थः। न तु साक्षाद्ब्राह्मणः उपावेशनं। दक्षिणतो ब्रह्मा-
णमुपावेश्येति वक्ष्यमाणे कर्मणि सूत्रणात्॥ कारिकाकारोऽपि – अचेतनेऽब्रह्मस्थाने कुशमुष्टौ च वेदवत्। अ-
शानां संनिधेर्युक्तः समासीर्येति लिंगतः॥ कर्त्ता वा यस्त्व॥ सर्वत्र साक्षादेव ब्राह्मणः उपवेशनं। न च द-
क्षिणतो ब्रह्माणमुपावेश्येत्यनेन पौनरुक्त्यं। तस्यावसरज्ञापनार्थं चाद्दिमाकुः। तदपरे दूषयंति।
स्थालीपाकश्रपणपूर्वकालता ह्यवसरः। अथोत्तरत उदपात्रं प्रतिष्ठाप्य स्थालीपाकं श्रपयित्वेत्यने-
नैव लभ्यते पूर्वकालतायाः समानकर्तृकयोः क्त्वाविधानात्॥ क्त्वाप्रत्ययार्थो ह्युत्तरकालता। तथा-
च उदपात्रं प्रतिष्ठाप्य स्थालीपाकं श्रपयित्वेत्यनेन स्थालीपाकश्रपणस्योदपात्रस्थापनोत्तरका-
लता बोध्यते। तेन स्थालीपाककरणप्राक्कालतायाः क्त्वाप्रत्ययादेव लाभाद्व्यर्थं तदर्थं दक्षिणतो ब्रह्मा-
णमुपवेश्येत्येतत्सूत्रं स्यादत एवं ज्ञायते॥ वक्ष्यमाणे कर्मणि – अत्र साक्षाद्ब्रह्मोपवेशनमुक्तं तत्रैव ब्र-
त्परुब्रह्मोपवेशनं नान्यत्रेति वदंति॥ ॥प्रणीय॥ – अपरतिं शेषः॥ – अग्नेरुत्तरतः कौशां पूर्वापरमा-

ग० श्र० सनद्वयंप्रकल्प्यापरासनेउदकस्पर्शंचतुःकोणंचमसंनिधायालभ्यब्रह्मासनमीक्ष्यपूर्वास
नेनिदध्यादित्यर्थः।एतच्चप्रणीताप्रणयनंदृष्टफलकंसर्वार्थंचेतिकर्काचार्याः।दृष्टार्थ
तायामपिसंयवनार्थमिदमितिकेचित्।उदककृत्यंसर्वंप्रणीताजलेनैवचेत्क्रियतेतदा
घकालेकर्मानुष्ठानंलक्ष्मेणैवनिर्वाहस्य।उक्तंच।लब्धेऽस्यमानेतुदृष्टेऽर्थेनादृष्टस्यप्रक
५ ल्पनेति।तस्मात्सर्वार्थाःप्रणीताइति।प्रणीताभिःसंयौतीतिश्रवणात्संयवनार्थइत्य
न्ये।यदिहिसर्वार्थंप्रणीताप्रणयनंस्यात्तदाप्रणयनसंस्कृतनीरसंसर्गःप्रतीयेत।त
स्यचसंयवनेएवप्रतीयमानत्वात्संयवनार्थतैवेति।तदेतत्तुच्छं।पक्षाद्यादिषुसंयवना
भावेपिप्रणीतादर्शनात्।अथनियोगसाधनीभूतद्रव्येऽपःसंयवनं।तदर्थंलक्षणा ५
पत्तेः।अथप्रणयनादेःसंस्कारस्यश्रुतितएवलाभात्कुतोवसंयवनार्थतैवदृष्टेतिचेत्।प्रणी
तायाःसंयवनार्थत्वेउपसदिसंयवनव्यतिरेकात्प्रणीतायाअपिव्यतिरेकःप्रसज्येत।तथा
चग्रसंजितव्यतिरेकगतियोगपुल्लेरवंस्यचरुत्वकुर्यात्कृतवांश्चतडुल्लेखंप्रणीताद्युप

स्यादितिसूत्रकृत्। किंचसर्वविधेयपशौप्रणीताव्यतिरेकेपिकृतनिर्वाहसंदर्शनात्संयवन
रूपदृष्टार्थताहृत्साधारणधर्मतावेत्येतद्विचाररमणीयं। किंचापः प्रणयतीत्युपक्रम्यत
तोदेवाएतंवज्रंददृशुर्यदपइत्याद्यर्थवादपर्यालोचनयाविघ्ननिवर्त्तकत्वंप्रणीतायाः प्र
तिपाद्यते। इतिप्रतीयतेतच्चसाक्षान्नसंभवतीत्यदृष्टमेवव्यापारइतिसिद्धंशतपथश्रुति
तएवप्रणीतायाः अदृष्टार्थत्वं। परिस्तीर्य॥ प्रागग्रैरुदगग्रैश्चतृणैरग्नेः परिस्तरणंकृत्वे
त्यर्थः। प्राच्यांप्रथमंउदगग्रैः अक्षेपः दक्षिणतः प्रागग्रैः। ततः प्रतीच्यांउदगग्रैः। ततउ
दीच्यांप्रागग्रैः॥ अर्थवदासाद्य॥ अर्थः प्रयोजनंतद्वत्पात्रसमुदायमासाद्यस्थापयित्वा
प्रारब्धक्रियास्तोमनिष्पादकनिःशेषसामग्रीनिष्पादनंकुर्यादित्यर्थः। तद्यथा। पवित्र
छेदनानित्रीणिपवित्रेद्वेप्रोक्षणीपात्रंचर्वादिमर्त्तिवरूस्थालीसंमार्गकुशाः उपयमन
कुशाः समिधः स्रुवः आज्यंतंडुलाबर्हिः पूर्णपात्रंवरोवा। दर्विहोमेषुपाकयज्ञेषुपह्नादि
प्रभृतिषुपौर्णमासधर्म्माणांकात्यायनचरणैरतिदिष्टत्वात्प्रकृतेचपाकयज्ञानांपरि

गृह्यला॰

लाघास्सूत्रार्थस्य पर्यालोच्यमानत्वादतिदेशप्राप्ताः [illegible] ग्रहण
सादनप्रोक्षणादयो तेन स्फ्योपहितमोषधिकरणं। ततः चर्वादिग्रहणं। अमुकि देवतायै
६ जुष्टं गृह्णामि अमुकि देवतायै जुष्टं गृह्णामी त्येवं मुष्टित्रयं। चतुर्थसंख्यापूरणं। मुष्टि
विनैव मंत्रं गृह्णीयात्। यथादैवतमन्यत्। चर्वादेस्त्रिस्त्रिः क्षालनं। ततः वाग्यमनं। पवि
त्रे कृत्वा॥ कुशौ समावप्रच्छिन्नाग्रावनंतर्गर्भौ कुशौ छित्वेत्यर्थः। ननस्वैः शाखांतरेनि
षिद्धत्वात्॥ प्रोक्षणीः संस्कृत्य॥ प्रोक्षणीरिति जवाविमपदं। ताः संस्कृत्येत्यर्थः। प्रोक्ष
णी संस्कारश्चैवं। आदौ प्रोक्षणीपात्रे नीरप्रक्षेपः। ततः पूर्वसंपादितपवित्राभ्यामुत्पव ६
नं। पात्रस्य ततः सव्यहस्ते निधानं। दक्षिणेनोद्धिंगनं। तास्विरेवतासां प्रोक्षणमिति॥ अर्थ
वत्प्रोक्ष्य॥ अर्थः प्रयोजनं तद्वत्। स्मृतिबोधितप्रारब्धक्रियासंपादकं चर्वादि घृतादिकं पा
त्रादिकं च सर्वं प्रोक्षणी नामधेयाभिरद्भिरासिच्येत्यर्थः। तथाच दाक्षिणहस्तोपात्त प्रोक्ष
×पौर्णमास धर्मोपिलिख्यंते। नन्वेतएव कथं स्थालीपाके ष्व ग्रहणासादनप्रोक्षणानि मंत्र देवता स्य ति थां
×ख्याय नोक्ते:९

अ॰

णीसिध्मसमयं पात्रसमुदायं सकृदेव प्रोक्षणीयमित्यर्थः। अतोऽमुं बध्नामिति मंत्रलिंगात्
॥ अत्राह कर्कः॥ प्रोक्षणस्य पात्रोद्देशेन विधानात्पात्राणां च संस्कार्यत्वात्प्रतिसंस्कार्यं सं
स्कारावृत्तेर्न्याय्यत्वात्प्रतिपात्रं प्रोक्षणमिति। अतावुद्देश्यगतं बहुत्वं न विवक्षितमिति। नैत
दपि विचारसहं। तथा हि। अमावेदकमानाभावे ज्ञातत्रैव। यत्राशक्यानुष्ठानमनेकविषय
मेकं कर्म। न चैतत्प्रकृते। सकृदेव सर्वेषां प्रोक्षणस्य शक्तिगोचरत्वात्। अथासादनकाली
नक्रमरूपविशेषाश्रयादेकत्वप्रतीतिरिति चेत्। तर्हि शब्दबुद्धिकर्मणां विरम्य व्यापारात्ता
वादेकस्यैव प्रोक्षणं स्यात्। अथ सर्वेषां संस्कार्यत्वादावृत्तिराश्रयणीयेति चेत्। तर्हि किम
र्थमुक्तमुद्देश्यगतमनेकत्वं न विवक्षितमिति। तदा हि फलवत्त्वाविवक्षास्यात्। यदेकद्वित्वा
न्यतरसंख्यावच्छिन्नस्य सामर्थ्यात्प्राप्तौ सत्यां बहुत्वसंख्यावच्छिन्नस्य शब्दबोध्यस्याविव
क्षामाश्रित्य सामर्थ्यादिष्टे संस्कारसंबंधः क्रियते। यथाग्रहं संमार्ष्टीत्यत्रोद्देश्यगवे
द्बोधितैकत्वसंख्याविवक्षामनाश्रित्य सामर्थ्याद्वेपाद्यथाप्तास्तेषु सर्वग्रहेषु संमार्गो।

गृह्यला· गीक्रियते। किं च विवक्षितमविवक्षितं वेति जिज्ञासापि तत्रैव। यत्र कर्त्तृकालदेशफलसंस्का
र्याणां विधिबोधिता भिन्ना संख्या भिन्ना च सामर्थ्याद्विक्षानचैवं त्र क्रते। तस्मान्मंत्रात्मक
७ वेदगतं वक्तृत्वं न विवक्षितमित्येतद्विक्तं वचः। अथासादनक्रमदर्शनसंजातः प्रोक्षणेपि क्र
मसंशयो विनाप्रमाणं कथमपनेयमिति चेत्। तर्हि युगपदनेकप्रोक्षणस्य लाघवात्प्राप्तौ
क्रमे किं प्रमाणमिति विपरीतः प्रमाणापेक्षा॥ अथ बुद्ध इवानपेक्षामि विनाप्रमाणं क
थं संशयोऽपनेय इति। सर्वपात्राणां युगपत्प्रोक्षणे शक्यानुष्ठाने किं सकृदेव कर्त्तव्यं किं
वा आसादनेन क्रमदर्शनात्क्रम आश्रयणीय इति शङ्कावगम्ये चेच्छब्द एव प्रमाणं नान्यदि
ति मंत्रलिंगमेव प्रमाणं। शाब्दी ह्याकांक्षा शब्देनैव पूर्यत इति न्यायादिति। एतेन प्रोक्षणक ७
र्त्तव्यताबोधकवेदविनियुक्तमंत्रस्मारितवक्तृत्वस्य कथमुद्देश्यगतत्वं साक्षादुद्देश्यग
तस्य तज्जार्थतां नोपपादयाम इत्यपास्तं। क्रियाहेतुत्वं यस्मात् कर्मंत्रगतवक्तृत्वस्याप्युद्देश्य
गतवक्तृत्वतात्पर्यकत्वात्। यत्परः शब्दः स शब्दार्थ इति न्यायात्। तथापि प्रतिसंस्कार्यं न्या

याकृष्टासंस्काराद्वृत्तिः कथमपहस्नयितुं शक्येतेति चेत्। न। व्रीहीन्प्रोक्षतीत्यत्र व्रीहीणा
मपि संस्कार्यत्वात्प्रति व्रीहि प्रोक्षणापत्तेः। ननु चरुपुरोडाशाद्यनेकहविषां सकृदेव प्रोक्ष
णं कुतो नेति चेत्। तद्यस्यै देवतायै हविर्निर्वपति तस्यै मेध्यं करोतीति देवतोद्देशपक हविः सं
बंधेन प्रोक्षणसंबंधं दर्शयंती श्रुतिरेवात्र प्रमाणमित्युत्तरदानं यथा तत्राय ज्ञपात्राणि
प्रोक्षति दैव्याय कर्मणे शुंधध्वमित्येवमाकारा सकृत्प्रोक्षणादेः श्रुतिरेवात्र प्रमाणमिति
किं पुनर्लवितो मुनाविद्वद्वविकोशमात्रेण। अपरे तु॥ पात्राणि प्रोक्षति व्रीहीन्प्रोक्षतीत्या
दौ पात्रव्रीह्यादेः संस्कार्यतामेव नांगीकुर्मः तथा च कथं प्रति संस्कार्यं संस्काराद्वृत्तिः। त
त्र परेषामयमाशयः व्रीहीन्प्रोक्षतीत्यादौ व्रीह्यादेस्तावत्प्रोक्षणादिकर्मता प्रतीयते।
सा च तत्फलाश्रयत्वमतिरेकेणानुपपद्यमाना व्रीह्यादेस्तत्फलाश्रयतां बोधयति। कथम
न्यथा प्रोक्षितानामेवावघातादावुपयोगः प्रोक्षणस्यादृष्टार्थत्वात्। न च प्रोक्षणमुप
लब्द[illegible]ंतर्ध्वं सो वा व्यापार इति वक्तुं शक्यं। यागादौ तथा लाववद्रसंगेनापूर्वकल्पनाया

गु॰ला॰ अलाबुवत्प्रसंगात्। चेतनस्यसंस्कार्यत्वव्रीहेः कर्म्मतानस्यादित्युक्तं। तथाचपात्रव्रीह्यादि
ष्वकर्म्मत्वान्यथानुपपत्तिप्रसूतार्थापत्त्यापात्रादेः संस्कार्यतायामावेदितायांप्रतिसं
स्कार्यंसंस्काराहृत्तिरपिन्यायसमर्पितैवेतितेषांनिगर्वः। अत्रवदंति। प्रोक्षणादिज
८ न्योतिशयःयागजन्यातिशयसमानाधिकरणएवकल्प्यते। लाघवात्। नचचेतनस्य
संस्कार्यत्वेव्रीहेःकर्मत्वानुपपत्तिः। प्रोक्षणजन्यसंयोगरूपफलशालित्वेनैवतदुप
४ पत्तेः नचसंयोगावच्छिन्नक्रियाविशेषस्यैवप्रोक्षणपदार्थतेतिवाच्यं। ग्रामंगच्छतीत्यादौ
ग्रामादेस्तादृशक्रियानाधारत्वेन। कर्म्मत्वानुपपत्तिप्रसंगात्। तस्माद्यथाक्रियाविशे ८
षणीभूतसंयोगाधारतयायथाग्रामादेःकर्म्मत्वंतथाप्रकृतेपीति। कथमन्यथासक्तून्प्रो
क्षतीत्यादौलौकिकप्रोक्षणेसक्तूनांकर्म्मता। किंचव्रीहीन्प्रोक्षतीत्यत्रव्रीहेःप्रोक्षण
जन्यसंस्काराश्रयत्वेकल्प्यमानेकिंप्रतिव्रीहिव्यक्तिवृत्तयोभिन्नाःव्रीहिसमसंख्याः
संस्काराकल्प्यंते। यद्वातावद्व्रीहिव्यक्तिवृत्त्येकएववा। नतावदाद्यः। गौरवात्। नद्विती

यः॥ किंचिद्व्रीहिनाशात्तन्नाशे अवशिष्टव्रीहेरुत्तरत्रोपयोगो वा घातः। दौनस्यात्। न च यावद-
अयनाशः प्रयोजक इति वाच्यं। गौरवात्। तस्माच्चेत एव संस्कार्यः। एवं च चेतनसमवेतसं-
स्कारेण स्वरूपसंबंधाद्व्रीहेः कर्मत्वमिति न किंचिदनुपपन्नमित्याहुः॥ निरूप्याज्यं॥ कु-
शैरसत्स्विति कात्यायनोक्तेः कुशोपग्रहः सन् आज्यस्थाल्यामाज्यं प्रक्षिपेदित्यर्थः॥ अधि-
श्रित्य॥ अग्नेरुपरीति शेषः। प्राक्सूत्रादाज्यपदानुवृत्तिः। उपलक्षणमेतत्। तथा च चर्वाद्यं विना-
प्यतत्क्रियायां चर्वादिकमप्यधिश्रित्येत्यर्थः। पर्यग्निकुर्यात्। अधिश्रितघृतचर्वादेः परितः ए-
कं ज्वलदुल्मुकं प्रादक्षिण्येन भ्रामयित्वा प्रदक्षिणं करमानयेदित्यर्थः। ततः अपर्णं। स्रु-
वं प्रतप्य॥ अर्द्धश्रृते चर्वादौ स्योपग्रहः स्रुवं प्रतप्य। खादिरः स्रुवोंगुष्ठपर्वमात्रखरः। स्र-
स्याकृतिः कात्यायनप्रणयनात्॥ संमृज्य॥ कुशैरिति शेषः। ते च त्रयः पंच सप्त वा आचारात्॥
अभ्युक्ष्य॥ प्रोक्षणीनां ग्रहणत्वात् जलेनेति शेषः॥ पुनः प्रतप्य॥ पुनः पादोपादानात् स्रुवमि-
ति शेषः॥ निदध्यात्॥ स्थापनीयचर्वादेर्दक्षिणत इत्यर्थः॥ आज्यमुद्वास्य॥ कुशोपग्रहः

गृह्यसू॰ घृतमुदीच्यामवतार्येत्यर्थः। ततः प्रोक्षणपपरेणनिधानं॥ उत्सत्य॥ पवित्राभ्यामितिशेषः। अवे
क्ष्य॥ आज्यमितिशेषः। प्रोक्षणीश्च पूर्ववत्। पवित्राभ्यामुत्पूयेत्यर्थः। प्रोक्षणपादाने समि
द्विस्रंसनं॥ प ह्वाद्यादिषष्टादश अन्यत्र विंशतिः। समित्प्रोक्षणं वेदिप्रोक्षणं अग्नेः परस्य
९ मुदगग्रस्य बर्हिषः प्रोक्षणं। सर्वेषां मूलावसेकः। प्रोक्षणी पात्रनिधानं। बर्हिर्बंधन
मासीर्यकुशैरवच्छादनं। त्रिवृत्स्तरणं बर्हिषः। घृतस्य चर्वादेरभिघारः। उद्वासनंघृ
तानांतु सर्वेण। उद्वासितानांतु पश्चात्। आज्यादुत्तरस्यां क्रमेण निधानं। क्रमेण चर्वादेः
9 प्राग्दाने। वेद्यां बर्हिषि आज्यादिक्रमेण निधानं॥ उपयमनान् कुशानादाय॥ उपयम
नसंज्ञकान् कुशान् दक्षिणहस्तेन गृहीत्वा सव्ये कृत्वा॥ समिधोऽभ्याधाय। तिस्रः सप्तदश ९
समिधः विकृतौ प्रकृतौ पक्षादिषु पंचदशसमिधः अग्नौ प्रक्षिप्य। सर्वेषु च कर्मसु कृति
कृतादिषु प्रादेशमात्रीः पालाशीः समिधः सं मदशं कृत्वा पश्चात्सुवग्रहणं दर्शपूर्णमा
सयोः पंचदशेति शांखायनसूत्रात्॥ पर्युक्ष्य॥ दक्षिणहस्तोपात्तेन सपवित्रेण प्रोक्षणीज

लेन अग्निमिति शेषः। श्रोत्वणीपात्रं च संस्रवधारणार्थं प्रणीतायाश्चोत्तरतः स्थाप्यं। जुहुया
त्॥ आघाराज्य[illegible]भागाद्यादिनामधेयाः आहुतीरिति शेषः॥ एष एव विधिर्यत्र क्वचिद्धोमः
॥ एषः परिसमूहनादि पर्युक्षणान्तो विधिः क्रियाकलापः एवकारस्तु प्रणयनादिक्रियाक
लापैकस्वेत्यादिमंत्रजन्यार्थस्मृतेः करणत्वव्यवच्छेदार्थः॥ ॥इयं परिभाषा॥ आवसथ्या
धानं दारकाले॥ आवसथ्यमिति शास्त्रबोधिताधिकारिकर्तृकत्वव्यताविशेषोपलक्षितस्या
ग्नेर्नामधेयं। तस्याधानं परिभाषाशास्त्रबोधितसंस्कारसंस्कृते प्रदेशविशेषे स्थापनं। केचित्तु
आवसथ्यं च तदाधानं चेति कर्मधारयमाहुः। तत्र। समस्यमानपदार्थसामानाधिकरण्य
स्य कर्मधारयार्थत्वेन वह्निकर्तव्यतयोः प्रत्येकं आवसथ्यपदवाच्यत्वाभावेन सामाना
धिकरण्याभावात्। इति दिक्। तत्र दारकर्तव्यमित्याकांक्षायामुक्तं। दारकाल इति। दारत्वनि
ष्पत्त्यधिकरणक्षणाव्यवहितोत्तरक्षण इत्यर्थः। दायाद्यकाल एकेषां॥ विभागिनो भ्रात्रा
देर्धनविभागकालो दायाद्यकालः। दाराधिकरणकाले दारकाल इत्यर्थः। एकेषां आचा

गृह्यसा॰ र्याणामित्यर्थः। तथा च तेषां मते आत्तादिमतो दारावच्छिन्नदायाद्यकालकरणपक्षेऽपि दारका
लाकरणप्रयोज्यप्रायश्चित्ताभावेन आत्तादिमतो दारकाल एवाधिकारादकरणप्रयुक्त
प्रायश्चित्ताद्यव्यवस्थया विकल्पोऽत्र द्रष्टव्यः। अनात्तमतो दारकाले आत्तमतो दायाद्यका
१० लइति। उपलक्षणमेतत्। वैशाख्याममावास्यायां वा पौर्णमास्यां वा शुक्लपक्षे नक्षत्रे आधानं
वा पितरि प्रेते एकादशाहे वा। तथा च शांखायनगृह्यकारः। समावर्त्तमानो यत्रान्त्यां समि
धमादध्यात्तमग्निमिंधीत वैवाह्यं वा दायाद्यकाल एके प्रेते वा गृहपतौ स्वयं ज्यायान्वैशा
ख्याममावास्यायामन्यस्यां वा कामतो नक्षत्र एक इति। एवं ज्योतिःशास्त्रप्रतिपाद्यास्त्र १०
पि कालाः आवसथ्याद्यर्थं ध्येयाः॥ केचित्तु ज्योतिःशास्त्रप्रतिपाद्यदोषराहित्ये सति दार
कालदायाद्यकालयोरेवावसथ्याधानमिच्छंति। तत्कथं कर्तव्यमित्याकांक्षायामाह। वै
श्यस्य वहुपशोर्गृहादग्निमाहृत्य चातुष्प्राश्यपचनवत्सर्वं कुर्यादिति सूत्रशेषः। यथा
हि चातुष्प्राश्यपचनेनाग्निहोत्राधाने आहरणपक्ष उक्तः तथात्रापि चातुष्प्राश्यपाकव

रणकः सर्वत्र एककर्तृत्वतासोमान्वितः अग्निहोत्रवदेव यथा ह्यग्निहोत्रे गार्हपत्यः आधि

यते। तथात्रापि आवसथ्याख्योग्निराहर्त्तव्य इत्यर्थः। तत्र निर्मथ्यास्याधानं शास्त्रमपवदि

त्रमाह। गृहादग्निमाहृत्य गृहणपन्वितादित्यर्थः। नगृहं गृहमित्याहुर्गृहिणी गृहमुच्यत

इत्यादिश्रवणात्। तथाच गृहिणीसंबंधेनावसथ्याधिकारद्योतनादावसथ्याग्निमतो गृ

हादित्यर्थः। अग्निंपाकार्थंमहानसेऽहृत्य पुनश्च वैश्वदेवार्थं आवसथ्ये नीतशेषमित्यर्थः

आहृत्य। स्वावसथ्यागारसंस्कृतश्चरं प्रतीतिशेषः। आवसथ्याग्निमत्वमप्यत्र प्रसक्तमत

आह। वैश्यस्येति। अन्यदपि गुणवत्वं तस्य विवक्षितमित्याह। बहुपशोरिति। तादृशवैश्य

लाले कात्यायनस्त्रात्सूत्रांतराच्चांबरीषाद्धक्रयाजिनो ब्राह्मणगृहाद्वन्नपाकाद्वा ब्राह्म

णमहानसाद्वा अग्निराहर्त्तव्यः। तथाच तादृशगृहादग्निमाहृत्य चातुष्प्राश्यपचनवत्स

र्वं कुर्यादित्यन्वयः॥ तत्रायं पदार्थक्रमः॥ अधिकारसंपत्त्यनंतरं कालानतिक्रमे शरी

रशुद्ध्यर्थं किंचित्प्रायश्चित्ताचरणं कृत्वा तत्कालमेवावसथ्याधानं कुर्यात्। अधिकारे स

ग्रह्यस॰ त्यकरणात्कालातिक्रमश्चेदतिक्रांतसमासमसंख्यानिकृच्छ्राणिचरित्वासमाईपादप्रव्या
घ्रातिक्रमेकृच्छ्रार्द्धतुर्यंशिष्टादशांशादिचरित्वातर्जनीमध्यमानामिकानांसमुदितानांप
र्वद्वयमर्त्रिपर्यायिन्नाङ्कुतीरतिक्रांताहश्चतुर्गुणाः ब्राह्मणायदत्वातदुत्तरकालेआवसथ्यं
२२ कुर्यात्। होमंदद्यादित्युक्त्वात्पद्यायादिद्रव्यदाननिषेधः। तत्रादौमातृमज्ञाभ्युदयि
केविधाय। देशकालौसंकीर्त्यावसथ्याग्निमहमाधास्यइतिसंकल्प्य। तत्रमेत्वंअध्वर्युर्भवे
त्यध्वर्योःवरणंकुर्यात्। ततस्तंगंधपुष्पवस्त्रचंदनादिभिरर्चयेत्। ततःसुश्रोद्दितादिकृत्वा
यजमानयोस्तिलकादिकृत्वाआशीर्मंत्रान्ब्राह्मणाःपठेति। ततोध्वर्युःस्फ्यंगृहीत्वाअ
ग्न्यगारंदक्षिणमर्धद्वारंजावालश्रुतिनःपंचारत्निप्रमाणंकरोति। ततोवपनंयजमानयो २२
र्हस्तेउपलक्षहोमसमर्पणंतदलाभेवस्त्रसमर्पणं। परिधास्यइतिमंत्रेणयजमानःवस्त्रं
परिधत्ते। उत्तरीयंचयशसामेति। ततोयजमानःद्विराचमनंकरोति। पत्नीचवस्त्रयोःपरि
धानंकरोति। ततोध्वर्युःआवसथ्यमरवेपंचसंस्कारान्कृत्वापुनरुल्लिख्ययजमानेनाद्य।

रवंच भ्रुत्थतत्रहिरण्यशकलंनिधायतस्मिन्निवपति। ततस्तेनेसूपेण सकलं मंडलं छादयित्वा
आरवत्क रात्रि। ततस्तेनारवल्करेण वृत्ताकारः आवसथ्य रवरः कार्यः। सच चतुर्दशांगुलमि
तरज्जुभ्रामणेन केंद्रफलादरत्निमात्रमितः संपद्यते। ततः परितः प्रोतेषु पंचाशत्कूर्चासं
लग्नानिदधाति। उपर्यपिहिरण्यमेके। ततआचारादहतेनवस्त्रेणतं रवरमाच्छाद्य स्वस्तिवा
चनशांतिपाठादिकुर्वन्नृवत्कपशोर्वैश्यस्यगृहंगच्छेत्। तदलाभेगोष्ठिलादिसूत्रादंबरीषा
द्धक्रयाज्जितोब्राह्मणगृहाद्बहूवन्नपाकाद्ब्राह्मणमहानसाद्वा। अग्निमाहृत्य। स्वगृहगारे
वर्त्तमानरवरं प्रवरस्ययजमानस्य भूर्भुवः आदित्यानांत्वादेवानांव्रतपतेव्रतेनादधइति
मंत्रेण सर्वसंस्कृतेरवरे तमग्निं संमुखंस्थापयत्यध्वर्युः। ततोयजमानः यथोपपन्नंलोजनं
करोति। ततोध्वर्युरस्तमिते सवितरि रोहितेचर्मण्यानडुहेचत्वारि प्रस्थतित्रयमितानि व्री
हितंडुलपात्राणिमिमीतेतंचान्तुष्ट्राश्पंपचत्सुद्दास्या सेवनंमध्येकृत्वासर्पिरासिच्या
स्वच्छी स्विस्वः समिधोघृताक्ताश्रादधाति समिधाग्निमितिप्रत्यृचमुप वेतिजपतिद्वितीयां

पूर्णाहुतिहोममावसथ्ये होमं च कृत्वा ४
वा धूर्वुः चत्वारो ब्राह्मणाः आश्नंति चतुर्थो धूर्वुस्ततो धूर्वुराङ्दसेव्र ह्योदनइत्याह। ततोयजमान
ग धृता आन्वष्टाश्यपतोन्क्रस्योवरंददाति। ततोयजमानश्छंदोस्य नेन धौणीमइत्याह। एवमावसथ्या
धानदिवसात्प्रागव्यवहितं संवत्सरपरिसर्द्विपर्यंतं प्रत्यहं चान्वष्टाश्यपं पक्त्वा धूर्वुभ्य भ्
१२ २२ ति स्यस्त्रन्वर्त्यौ तोजयित्वा वरं च दत्वा तान्वक्ष्यान्वष्टाश्यप संस्कृते औपासनाधेयदेवतास्य स्थाली
पाकं ॐ अपयित्वेत्यादिवक्ष्यमाणमार्गाधानोंगं चरुं अपयेत्। पूर्णाहुतिहोमोवक्ष्यते॥
अयं च सर्वोप्यर्थः चान्वष्टाश्यपचनवत्सर्वमेतत्कृत्वातिदिष्टाग्निहोत्राधानधर्म्मलालक्ष्य
स्यते। केचित्तु वैश्यपादिकुलादग्निमाहृत्य चान्वष्टाश्यपं पक्त्वा चतुर्भ्यो दत्वा वरं च दत्वा
तत्कालमेवाग्न्याधेयदेवतास्य स्थालीपाकादीछंति। अपरेतु पंचसंस्कारान् कृत्वा अ २२
ग्निं स्थाप्य चान्वष्टाश्यपं पक्त्वा ब्राह्मणेभ्यो दत्वाग्न्याधेयदेवतास्य स्थालीपाकादीछंति।
अत्रापि स्थालीपाकादौ विशेषः अग्रे लेखनीयः। एवमाहरणपक्षमुक्त्वाइदानीं अ
रणेयपक्षमाह॥ अरणिप्रदानमेके॥ यजमानाय धूर्वुः करोतीति शेषः। अरण्योः श

प्रोक्तलक्षणयोः। अधरोत्तरयोः प्रदानं प्रकर्षेण दानं। आधानप्राक्कदिने दिवाशन देवांपितर
इत्यादिजपानंतरं सर्वद्वारागारप्रतिष्ठाये ऽर्जघनसागेपत्न्युत्तरेणोपविष्टाया शनप्राक्काली
कृताभ्युदयिकाय यजमानाय शास्त्रोक्तविधिना दानं प्रकर्षः दानमित्यत्राहितीयांतकर्म्माह
हं अध्वर्युरित्येतत्कर्तृपदं। कर्म्मणः कर्त्रधीनत्वात्। धात्वर्थाकृष्टं च यजमानायेत्येतत्संप्रदा
नवाचिपदं। दानस्य संप्रदानाधीनत्वात्। ननु तथापि कर्तृसंप्रदानयोरर्थाध्याहार एव घ
टते न पदाध्याहार इति चेत्। न। पदाध्याहारस्यापि सकलतांत्रिकैकवाक्यतापन्नत्वात्। विस्त
रतया त्रालिख्यते। एके श्रौतस्मार्त्तादिप्राचारे आचार्य इत्यर्थः। तथा चोद्दटपंडावतामयमे
वासिद्धांतपक्ष इत्यभिप्रायः। अत्र हेतुमाह। पंचमहायज्ञा इति श्रुतेः। अथारणीपाणौ कृ
त्वेत्याद्यग्निष्टोमेऽरण्योः पाणिकरणं कृत्वा [illegible] प्रतिपाद्यते तस्मादरणिसाध्यं। एवं चाति थे
ष्टावत्याधरारणिं निदधात्यादि कृत्वा मंथनक्रियापीष्टांग तया प्रतिपाद्यते। साप्यरणि
साध्या। एवं चासाद्यहं वोऽग्निमंथतीत्यादिवेदाद्दैवदेवपर्वणोपि मंथनक्रियासाध्यत्व

र॰ह॰सा प्रतिपत्तिः। एवं वरुणप्रघासाद्यनेकस्थले समारोपमंथनादि श्रूयते। एवं च विधिवेदबोधितक
र्तव्यताश्रौमस्मारणिसाध्याग्निसाध्यत्वेन पंचमहायज्ञानामपि वेदबोधितकर्तव्यता कल्प
नेषां चावसथ्याग्निसाध्यत्वादावसथ्याग्नेरप्यारण्येयत्वैवेति सिद्धांतः। तदिदमुक्तं। पंचम
२२ हायज्ञाद्य इतिश्रुतेरिति। अत्राप्ययं पदार्थक्रमः। आदौ देहशुद्धिः। कालानतिक्रमश्चेत्तत्काल
मेवाधानं। कालातिक्रमे यावंत्यब्दान्यतीतानि निरग्नेर्विप्रजन्मनः। तावंति कृच्छ्राणि चरेद्धौ
13 म्यं दद्याद्यथाविधि इत्यादि स्मृतिबोधितं प्रायश्चित्ताचरणं कृत्वा होम्यं च दत्वा आवसथ्यं
कुर्यात्। एतच्च आहरणपक्षोपपादनप्रस्तावे उपपादितं तत एवानुसंधेयं। ततः आधान पूर्व
दिने सर्वाङ्के देशकालौ संकीर्त्य आवसथ्याग्निमहमाधास्य इति संकल्प्य मातृपूजाभ्युदयिके २२
विधाय ब्रह्मत्वे वृणीत पूर्ववत्संकल्प्य। ततस्त्वंगं धूपपुष्पादिभिरभ्यर्च्य मधुपर्केणावाह्य जायि
त्वा स्वस्त्यमांगल्याशीर्ग्रहणं च ब्राह्मणानां च कुर्यात्। ततोऽग्न्यगारकरणमध्वर्योः। पौर्ण
मासवद्वपनं यजमानस्य उपलक्षब्दोमसमर्पणां अध्वर्योः दंपत्योः यजमानयोः मंत्रेण

परिधानं। तत आचमनं। ततो ध्वर्युः खरे पंचसंस्कारान्करोति। आहरणपद्धत्योक्तयोनेराहरणं
खरे स्थापनं। यजमानो भुंक्ते। सूर्याग्निसमीपे अग्न्यगार आग्द्वाराग्रेदर्भास्तृतायैभ्रमौप
त्नुत्तरतोऽप्रविश्यपतिघतोवायजमानस्यदेवाः पितर इति जपः। सर्वद्वारेण प्रविशति यज
मानो दक्षिणेन पश्चात् पत्नी पश्चादग्नेरुपविशतः दक्षिणतः पत्नी ततो ध्वर्युः अश्वत्थशमीगर्भा
रणी शास्त्रोक्तलक्षणे आचारादहतवस्त्राच्छादिते यजमानाय समर्पयति। यजमानः अं
के स्थापयति। पत्न्यपि अधरारणिं यजमानात् गृहीत्वा स्वांके स्थापयति। आवसथ्याग्नि
साधनभूते इमे अरणी आवाभ्यां परिगृहीत इत्यंगीकारं कुरुतः। इमानि पात्राणि परिगृ
हीतानीति पात्राणि परिगृह्णीतः। ततः पीठादौ स्थापिते अरणी चंदनादिभिः पूजयतः। द्वि
जाशीः प्रतिग्रहः देवब्राह्मणान्नमस्यतः। ततोऽग्निमिते सवितरि आवसथ्यागारे जंवध्रा
तिनका। तत आहरणपद्धत्वेत्वात्तु आश्पपाको वरदानांतः। एके अध्वर्यवे वरदानमिच्छंति
न सर्वेस्यः। प्रतिग्रहकर्तुरल्पदानुदानशक्यं इत्यभ्युच्यते। वरः समर्थश्चेत्तदा चतुःका

ग्र.ह.सा. धीपतो वरः। ततः स्थापितस्याग्नेः रात्रौ जागरणं धारणे काष्ठैर्गोमयपिंडैर्वनिसमुच्चितैः।
ततः प्रातः प्रत्यूषे स्नात्वा तएव वस्त्रे पुनः प्रक्षाल्य शोषयित्वा पत्नी यजमानौ परिधीयातां।
अध्वर्युरपि प्रातः स्नात्वा तमग्निमुपशमय्य वाचंयच्छ सर्पणड्कितेरिति यजमानं प्रेष्यति।
१४ ततश्च सर्पणड्कितिवाग्यतो भवति यजमानः। ततो ध्वर्युरावसथ्यस्थरवरे पंचसंस्कारान्कृत्वा
पुनरुल्लिख्याभ्युक्ष्याधारत्वे हिरण्यं निधायोपरतत्नकरनिवपनं तमाहरणपद्धव क-
14 रोति। हिरण्यमुपर्येके। ततश्चाधाराद्दक्षिणस्थरवरमाच्छाद्योदिते सूर्येनुदितेवा मंथनं कु-
र्यात्। तत्र वर्तमानयेति प्रेष्यो यजमानपुरुषं प्रति। अग्नेरपरलागेदर्भास्तृताया भुवि
उत्तरायाम धरारणिं निधायोत्तरारणेरीषानदिक्स्थं प्रथमं छित्वा कृत्वा चात्र बु- १४
ध्नगतगर्त्तमध्ये प्रोतयेत्। ततो धरारणेर्मूलाद षडंगुलं त्यक्त्वा अग्राच्च द्वादशांगुलं। अंत-
रं देवयोनिः स्यात्तत्र मथ्योक्तामानइत्यनेन देवयोनौ प्रथमं निधाय मंथनं कुर्यात्। य-
जमानस्य यंत्रधारणं।। पत्न्याः मंथनं।। तयोरशक्तावन्ये यंत्रं धारयंति मंथंति च। ज्ञा

तेग्राव ह्वर्यवेवरदानं। मनसैके। ततः शरावादिनाग्निं धृत्वा धूप्यमानेग्नौ श्वासप्रक्षेपः प्राण
ममृतेदधद्इति। ततउच्छ्वासो मृतं प्राणआदधद्इति। ततोज्वलंतमग्निं भूर्भुवः आदित्यानां त्वे
त्यादिमंत्रेणाहरणप ह्नवत्ववरेस्थापयति।। अग्नेस्योत्सर्गः अजस्यच। ततःस्वर्णाहुतिहो
मः। आज्यनिर्वापः। अधिश्रयणं। स्रुक्स्रुवयोः संमार्गः आज्योद्वासनं पवित्राभ्यामुत्पवनं
अवेक्षणं। चरुगृहीतग्रहणं। चतुर्थेनस्रुवेणस्रुचं पूरयेत्। परिस्तरणं। तिष्ठत्समिदाधानं।
धा०७ उपविश्याग्निं ध्यात्वायजमानाद्वारद्वोजुहोति। वरंददामीतिवाग्विसर्जनं। इदमग्नय
इतित्यागः। वरदानं। ततस्थालीमावसथ्यहोमः। तिष्ठत्समित्त्रयप्रक्षेपः। उपविश्यपर्युक्ष
णं। प्रथमामाहुतिं अग्निं ध्यात्वाहुत्वाग्नेयं त्यक्त्वाद्वितीयांचपात्रांतरे प्रक्षिप्य तृतीयां सू
र्यं ध्यात्वाजुहोति। इदं सूर्यायेतित्यागः। चतुर्थीं गृहीत्वा द्वितीयया सह प्रजापतिं ध्यात्वा
जुहोति। इदं प्रजापतय इतित्यागः। अपरेपुनः सद्यस्कालतामावसथ्याधानस्ये च्छं
ति। केचित्तुयावदुक्तमेवेच्छंति। अग्न्याधेयदेवताभ्यः स्थालीपाकं श्रपयित्वाज्यभा

गृ॰सू॰ गाविष्ठाज्याहुतीर्जुहोति त्वंनोअग्नेसत्वन्नोअग्नइमंमेवरुणतत्वायामियेतेशतमया
श्चाग्नउदुत्तमंलवतंन्नइत्यष्टौ। नकेवलंहोमंतमावसथ्यंकिंत्वन्यदप्यस्मीत्याह। अग्न्या
धेयेति। अग्नयोगार्हपत्यादयोआधीयंतेनिष्पाद्यंतेयस्मिन्नतदग्न्याधेयंअग्निहोत्र
२५ मित्यर्थः। तस्मिन्नतस्यवादेवताः अग्न्याधेयदेवताः अग्निःपवमानोग्निःपावकोग्नि
शुचिरदितिस्त्रास्यः स्यात्स्थालीपाकः स्थालीपाकःतंअग्निहोत्राधान देवतोद्देश्यक
15 स्थालीपाकमित्यर्थः श्रपयित्वापरिलाप्याशास्त्रोक्तविधिनापक्त्वाआज्यभागाविष्टा
आघारावाज्यभागावित्यादिसूत्रेवक्ष्यमाणाघाराज्यभागादिसंज्ञाः आहुतयः ताश्च २५
आज्यभागांतंकृत्वा। तत्रैवंआवसथ्येहुत्वादक्षिणतोब्रह्मासनमास्तीर्येत्यादिस्यपर्यु
क्षणांतंपरिलाप्यं। निवर्त्यस्रुवेणाज्यमादायप्रजापतयेस्वाहाइंद्रायस्वाहेत्याघा
रसंज्ञकेआहुतीहुत्वाअग्नयेस्वाहासोमायस्वाहेत्याज्यभागांतंकृत्वेत्यर्थः। त
त्रविशेषः। अग्नयेपवमानायाग्नयेपावकायाग्नयेशुचयेदित्यैजुष्टंगृह्णामि। एवंत्रिः

त्. ली चरुर्थं। ओं वरुणो अग्नये पवमानाय अग्नये पावकाय अग्नये शुचये अदित्यै त्वा जुष्टं प्रोक्षामि प्रो
क्षं प्रकृतिवत्। तंत्र आज्यलागं लागंते आज्याहुती र्जुहोति। आज्येनाहुतयो आज्याहुतय
स्ताः कात्वन्नो अग्ने सत्वन्नो अग्ने इमम्मे वरुण तत्वायामि ये ते शतम् अयाश्चाग्ने उदुत्तमं वरुण
तन्न इत्यष्टौ मंत्रमाज्जुहोतीत्यन्वयः। तथाचाष्टसंख्यावच्छिन्नैर्मंत्रैः एवाज्याहुती र्जुहो
तीत्यर्थः। आज्यलागाविष्टेत्येतत्सूत्रमाहुतीनामवसरज्ञापनार्थं। त्यागस्तु। इदमग्नी
वरुणाभ्यां १ इदमग्नीवरुणाभ्यां २ इदं वरुणाय ३ तच्छापातिइदं वरुणाय ४ इदं वरुणा
य सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः ५ इदमग्नये जरसे ६ इदं वरुणायादि
तये ७ इदं जातवेदोभ्यां ८ पुरस्तादेवमुपदिष्टा स्थालीपाकस्याग्न्याधेयदेवताभ्यो हुत्वा
जुहोति। प्रागुक्ताः सः अग्निहोत्रदेवताभ्यः स्विष्टकृत्सहिताभ्यः स्थालीपाकस्य हुत्वा पु
रस्ताद्यथापूर्वं होमः कृत्यं। एवमुपदिष्टा स्थालीपाकहोमानंतरं मष्टर्चं जुहुयादित्यर्थः
। नपुरस्तादित्येतत्परं व्यर्थं। आज्यलागाविष्टाज्याहुतीरित्यनेनैव स्थालीपाकहोमा।

स्यात्क्रमस्य लब्धत्वादितिचेत् न। उत्तरसूत्रातिदेशप्राप्त्यर्थत्वात्। स्विष्टकृते चायास्यग्नेर्वष
ड्ढुतं यत्कर्मणात्यरीरिचं। देवागातुविदइति। अत्र च शब्दोप्यर्थः। अपिशब्दः समुच्चयार्थः।
पुरस्तादेवमुपरिष्टादित्येतत्सूत्रांशं समुच्चिनोति स्विष्टकृद्धोमेप्ययास्यग्नेरित्यादस्त्ववि
 दः स्वाहेत्येतामाज्याहुतिं पुरस्तादेवमुपरिष्टाज्जुहोतीत्यन्वयः। तथाच स्थालीपाकेन प्र
धानाहुतस्य आहुती हुत्वा अयास्यग्नेरित्याज्याहुतिं हुत्वा स्थालीपाकेन स्विष्टकृद्धोमं
 कृत्वा पुनरयास्यग्नइत्याज्याहुतिंजुहुयादित्यर्थः। ततः स्थालीपाकहोमोत्तरकालीनो
ष्टर्द्धहोमः। ततो महाव्याहृत्यादिप्राजापत्यान्तानित्याः वक्ष्यमाणानवाहुतयः। बर्हिर्हुत्वाप्रा
श्नाति। पाकयज्ञेष्वेवं तस्य सर्वहोमोहुत्वा शेषप्राशनमित्यस्यानुवादोयं प्राश्नातीति।
एतच्च कदा कर्त्तव्यमित्याकांक्षायामुक्तं बर्हिर्हुत्वेति। प्राश्नातीत्यनेन कृतो हृष्टानि प्रतिपत्ति
कर्माणि लक्ष्यंते। तथाहि। मार्ज्जनं पवित्रयोः स्मार्त्तेग्नौ प्रक्षेपः। ततः स्वर्णपात्रवरयोरन्य
तरदावसथ्याधानस्य सांगतासिद्ध्यर्थं स्वर्णपात्रं वरं वा दक्षिणां चतुर्मुखप्रीतये इति सं प्रदद१

कल्प्य कस्मैचिद्द्विजाय दद्यात्। चतुर्थीकर्मादौ उपविष्टाय ब्रह्मणे दद्यात्। ततः सर्वप्राय
श्चित्तहोमः। व्यस्ताः समस्ताः अत ओं महाव्याहृतयः। त्वं नः स त्वं नः अयाश्चाग्ने ये ते शतं उदु
त्तमं एतदाहुतिनवकं सर्वप्रायश्चित्तसंज्ञकं। ततः प्रणीताविमोकः। तत एकस्मै वद्रूपमा
णलक्षणाय ब्राह्मणाय भोजनं दद्यात्। कर्मापवर्गेसमित्यह्नेपोग्नौ। उत्सर्जनं ब्रह्मणः। उ
पयमनकुशामग्नौ प्रक्षेपः। अयं च पदार्थक्रमः आश्वातीत्येतत्सूत्रलब्धो लक्ष्यते। ततो ब्रा
ह्मणभोजनं। आवसथ्ये त्रयस्त्रिंशादिति परिशिष्टात् त्रयस्त्रिंशत्संख्याकेभ्यो ब्राह्मणेभ्यो भो
जनदानं केचित्तु चतुर्विंशमिति पाठमाहुः। तन्मते चतुर्विंशतिसंख्याकेभ्य एव भोजनदानं
ते च त्र्यध्ययनशीलास्तपस्विनः ज्ञेयाः। शांखायनगृह्यकारोपि कर्मापवर्गे ब्राह्मणभोजनं
वाग्रूपवयःश्रुतशीलवृत्तानि गुणाः। श्रुतं तु सर्वानत्येतीति न श्रुतमतीयात्। मंत्रेषु ब्राह्मणे
चैव श्रुतमित्यभिधीयते। अधिदैवमथाध्यात्ममधियज्ञमिति त्रयं। क्रियावंतमधीयानं
श्रुतवृद्धं तपस्विनं। भोजयेत्तं सकृद्यस्तु न तं भूयः क्षुदश्नुते। यां तितर्पयिषेत्कांचिद्देवतां

गृह्यता

सर्वकर्म्मसु। तस्माद्गृह्यप मनसा दद्याद्देवं विधायवै। नैवं विधे हविर्न्यस्तं नगच्छेद्देवतां क्वचि
त्। निधिरेषम नुष्याणां देवानां पात्रमुच्यत इति। तथा चैवं विधानां ब्राह्मणानां त्रयस्त्रिंशत्सं
ख्याकानां त्रयोविंशत्संख्याकानां वा लोजनमिति षष्ठीतत्पुरुषः। प्रयोगश्चैवं। देशकालौ संकी
१७ र्त्य कृतैतदावसथ्याधानकर्म्मणः सांगतासिद्ध्यर्थं यथासंपन्नेनान्नेन तृप्तिपर्याप्तेन त्रय
स्त्रिंशत्संख्याकान् त्रयोविंशतिसंख्याकान्वा ब्राह्मणान् हं तर्प्पयिष्य इति। एतेन लाघवाद्दे
17 कमेव ब्राह्मणमावसथ्ये लोजयेदिति एवं वर्णयिन्नो हरिहरादयः प्रयुक्ता वेदितव्याः। ततः शुचे
श्चितादि कृत्वा आत्मवाससी पत्नीवाससी च अध्वर्यो तुल्यमहं संप्रददे इत्यात्मपत्नीपरिहि १७
तवस्त्रदानम ध्वर्यवे बृहस्पतये त्वेति प्रतिग्रहं ततो यजमानस्य मांगल्याद्याशीर्वादांश्च द्विजाः
पठेयुः। इत्यावसथ्याधानं॥ प्रसंगात्किंचिल्लिख्यते॥ ॥ अधिकारे सत्यालस्याद्धर्ममाधाना
करणे चांद्रायणं। मासातिक्रमे त्वेकमुपोषणं। तदुक्तं। कृतदारो गृहे ज्येष्ठो यो नादध्याद्धुता
शनं। चांद्रायणं चरेद्वर्षं प्रतिमासमहोपि वा। अथ कृताधानो आलस्याच्छेदग्निं त्यजति मास

द्वयं सप्राजापत्यं चरेत्। मासचतुष्टयं चेदतिकृच्छ्रं। मासषट्कं चेत्पाराकः। संवत्सरं चेत्पयोव्रतं। तदाह व्याघ्रपादः॥ मासद्वयं तु यो वह्निं त्यजेदेतत्समाचरेत्। नास्तिक्यात्कृच्छ्रमेकं तु द्वेमद्व्यं त्वदाति चेत्। तथा यो ग्निंत्यजति नास्तिक्यात्प्राजापत्यं चरेद्द्विजः अन्यत्र पुनराधानमुपदिष्टं मनीषिभिः। तथा। चतुष्टयेन संवत्सरे मासानां तु कृताशनं। त्यक्तातिकृच्छ्रं कुर्वीत ततः पापात्प्रमुच्यते। तथा। षण्मासांत्यजते यो ग्निं पराकं स समाचरेत्। अब्दं पयोव्रतं कुर्यान्मासमेकं समाहित इति। संवत्सराधिककालातिक्रमे। पयोव्रतं कृत्वा द्वैमासिकादि समाचरेत्। तदुक्तं स्कंदपुराणे॥ अब्दं संवत्सरादग्निं यस्त्यजेत्स पयोव्रतं। द्वैमासिकं ततः कृत्वा त्रैमासिकमथापि वा। एवं अधिककालीनाग्निपरित्यागे प्रायश्चित्ताधिक्यं न्यूनं च परिकल्पनीयं। त्यागकालीनहोमद्रव्यं च विशेष्योदेयं। तदुक्तं नारद्वाजगृह्ये। यावत्कालमहोमीस्यात्तावद्द्रव्यमशेषतः। न दान चैव विशेष्यो यथा होमस्तथैव तदादिति। एवं प्रायश्चित्ताचरणं कृत्वा होम्यं च दत्वा पुनराधानं कुर्यात्। एतच्च नास्तिक्यादग्निपरित्यागे॥ विपन्नोत्

शारीरशुद्धिं संपाद्य होमं दत्वा पुनराधानं कुर्यात्। प्रसंगात्पुनराधाननिमित्तान्युच्यंते। अ
गृह्यला० ग्नावनुगते यस्य होमकालद्वयं व्रजेत्। उभयोर्विप्रवासे वा लौकिकाग्निर्विधीयते। एवं
विहायाग्निं सदार्यश्चेत्सीमामुल्लंघ्य गच्छति। होमकालात्ययेतस्य पुनराधानमिष्य
२८ ते। अग्नेर्विनासमारूढस्य ईशान्याः परासनात्। हतोऽग्निर्लौकिको ज्ञेयः कृतो सर्वत्र दर्श
18 नात्। कुरुक्षेत्रादितीर्थानां गमने देशविप्लवे। समारोपं विनैवाग्निं नोद्वहेत्पुर्विपश्चितः।
आरोप्याग्न्योररण्योः स्वात्पुनर्दवस्येत्सहाग्निभिः। मथ्यमानस्य दृष्टस्य नाशे प्रत्यब्दस्य समा
मांतरनयने होमं विना वर्षातिक्रमे उदकेनोपशमे शिक्येनोद्वाहने अग्निना विनाशतयोज २८
नमध्ये पर्याप्तमार्गातिक्रमे अंत्यजादिनाग्नेरुपघाते प्रासि हक्रियालोपे प्रवासादिनाग्ने
रूपे ह्रायां प्रमादाद्दधारण्येयजमानयोः प्रवासे होम प्रायश्चित्तं पुनराधानं पत्न्याद्यसमारोपे सम
येनागतयोरेकपत्नीकेपत्यौ प्रवसिते पत्न्याः अग्निं विना समुद्रगनदीसंतरणेन लयेन
च विनाग्निना सहापि ताहशनदीसंतरणे पत्न्याः सीमातिक्रमणे पत्न्यावनागतेऽएकेएवं

पत्न्याः रजोदोषे सूतके मृतके मृतके वा होमकाले वा पर्वणि वा यजमानस्य प्रवासे धूपदीपा
दिकरणे स्वेदादिकरणे ब्रह्मौदीयपाकाकरणे अनवधानं पक्षत्रयसमारोपे त्वपहृतास्वोप
वरणिस्थाः पुनराधानं कुर्यात्। अनुपहतेति स्ववरिणी मंथनादिनाम् अंथनायोग्ये चेत्तदा
न्यैयाः श्रोक्तलक्षणेन्वृतनेयाद्रे। अनुपहते योग्ये शकलीकृत्य दाह्ये। उपहते तु अप्सु नि
क्षेप्तव्ये। न प्रायामप्यरणौ अग्निच्छेदे श्यमानिति चेत्। तदाग्निस्थितिपर्यंतं होमादि सर्वं कु
र्यात्। उपशांते तस्मिंस्तु पुनराधानं कुर्यात्। पुनराधानमप्याधानवद्भवति। प्रवसिते भर्त्त
रि आधानं पुनराधानं च न भवति। काम्यनित्यनैमित्तिकानुष्ठानं भवति। साग्निकस्य धन
र्थमेव प्रवास इति केचित्। अपरे तु सहाग्निः सपत्नीकस्तीर्थानि व्रजेदित्याहुः। वचनं स
श्रुत्वा पुलयंसमूलं। यस्तु नास्तिक्यादग्निं परित्यज्य पुनराधानादि न कुर्यात्। स यतिवद्बहिः
कार्यः। पुनश्चेच्चिरकाले न व्यवहर्तुमिच्छति तदा द्वादशाब्दं कारयित्वा व्यवहर्तव्यं। तदुक्तं।
स्वकर्महानौ नास्तिक्यान्मासेन पतनं स्मृतं। द्वादशाब्दव्रतेनैव शुद्धिस्तस्य तु नान्यथा। नास्ति

गृसूता॰ कथं तु वेदप्रामाण्यानभ्युपगमः। अन्यथा क्रियावाकूलस्य परित्यागे स्वल्पप्रायश्चित्तानुपदेश
प्रसंगइतिपश्यामः॥ २॥ आवसथ्याधानंदारकालइत्युक्तं दारक्रियाचाविनाविवाहंनसि
ध्यतीतइत्युक्तो द्वातसंगत्याविवाहंसूत्रयन्प्रसंगादर्घ्यानाह। षडर्घ्यालवंति। आचार्यत्वा
२९ दयः षट् संख्याकाः उपाधयः संतितेर वच्छिन्नाः सर्वेपित्र्यर्घ्याः अर्घ्ययोग्यालवंती त्यर्थः
। नन्वाचार्यत्वादयो धर्माः जातयएवकिंनस्युः। नस्युः। जातिसंकरप्रसंगात्। तथाहि। आ
19 चार्यत्वपरिहारेणान्यत्रआर्त्विज्यं। आर्त्विज्यपरिहारेणान्यत्राचार्यत्वंएकत्रोलयंसंकीर्ये
त। तस्मादुपाधयएते। उपधेयास्तेकइत्यपेक्षायामाह। आचार्यऋत्विक्वैवाह्योराजाप्रि
यः स्नातकइति। उपनयनपूर्वंवेदाध्यापकत्वं आचार्यत्वंतस्याधारः आचार्यः। एवं श्रौत २९
स्मार्त्तादिक्रियोद्देशेनवृतत्वंआर्त्विज्यंतदाश्रयोऋत्विक्। स्रुकुदककर्तृककन्याधिजदानसं
प्रदानत्वंवैवाह्यत्वं। तदाश्रयोवरः। राजस्तु योतर्गताभिषेकाभिषिक्तत्वेसतिप्रजापालना
धिकृतत्वाश्रयोराजा। मैत्र्याश्रयः प्रियः। स्वानपकृष्टजात्यवच्छिन्नः। विद्याव्रतोलयस्ना

तकत्वाद्यन्यतरोपाध्यवच्छिन्नः। स्नातकः। इति शब्दः षडुपाध्युपधेयसमाप्तिद्योतकः। क-
स्मिन्काल इत्यपेक्षायामाह। प्रतिसंवत्सरानर्हयेयुः। निमित्तमंतरा समागतानिति शेषः।
संवत्सरं संवत्सरं प्रत्यागताः प्रतिसंवत्सराः तान् आचार्यादीन् अर्हयेयुः मधुपर्केण पूज-
येयुः। अर्हकानां ऋत्विगर्चने विशेषमाह। यक्ष्यमाणस्त्वृत्विजः। यज्ञारंभं करिष्यंस्तु शब्दः
प्रतिसंवत्सरानित्यादिनोक्तं व्यवच्छिनत्ति। ऋत्विजः याजकानर्चयेयुरित्यर्थः। एतेन उक्तं त्व-
रं तत्प्रवृत्तेनैवारंभकाले ऋत्विगर्चनं विधेयं नान्यदेत्यर्थः। तथा च ऋत्विक्प्रयोज्यं नान्य-
दार्चनमिति ध्येयं। कथमर्हयेयुरित्यपेक्षायामाह। आसनमाहार्याह साधु भवानास्तामर्च-
यिष्यामो भवंतमिति। आसनं यज्ञियदारुनिर्मितं पीठादि आहार्य आनाय्य आह ब्रवीति अ-
र्चक इति शेषः। किमित्यत उक्तं। साधु भवानित्यादि भवंतमित्यंतं। विवाहे तु वरः समानशा-
खाध्यायिनाचार्येण प्राङ्मुखोपविष्टेन मध्ये चतुरिकमुपलिप्त उद्धृतावोक्षिते तेष्वावाहिते सा-
धु भवानास्तामित्यर्चकः श्वशुरादिर्ब्रूयादिति विशेषमाहुः। अग्निमुपसमाधायेत्यादि

गृह्यला॰

कुमार्याः पाणिं गृह्णीयादित्यंतसूत्रे सांगपाणिग्रहणविधेरग्निस्थापनोत्तरकालीनत्वस्य
क्त्वाप्रत्ययबललभ्यत्वेन मधुपर्ककरणकार्चनस्यापि विवाहांगत्वादग्निस्थापनोत्तरका
लतेत्याशयादेवमाहुः। आहरंति विष्टरं पद्यं पादार्थमुदकमर्घमाचमनीयं मधुपर्कं दधि
२० मधुघृतमपिहितं कांस्ये कांस्येन। आहरंति अर्चकपुरुषाः विष्टरं पादार्थमुदकमष्टां
गमर्घमाचमनीयपात्रं मधुपर्कमित्येतस्यैव विवरणं दधिमधुघृतं कांस्येनापिहितं पुनः की
दृशं कांस्ये स्थितं। अन्यस्त्रिस्त्रिः प्राह विष्टरादीनि। अर्च्यार्चकाभ्यामन्यः अर्चकपुरुषः। विष्ट
रादीनि त्रिस्त्रिः प्राह। विष्टरः आदिर्येषां तानि त्रिस्त्रिः त्रीं त्रीन् वारान् एकैकं प्राह अनुब्रूया
त्। प्रयोगस्त्वेवं। विष्टराविति वारत्रयमाहान्यः। प्रतिगृह्यतामित्याहार्चकः। प्रतिगृह्णामीत्य २०
र्च्यः प्रतिगृह्णातीत्यर्थः। किमित्यत उक्तं विष्टरमिति। वर्ष्मोऽस्मि समानानामुद्यतामिव सूर्यः
इमं तमभितिष्ठामि यो मा कश्चाभिदासतीत्येनमभ्युपविशति। निगदव्याख्यानं। पादयोर
न्यो विष्टर आसीनायान्यं द्वितीयं पादयोरधः विष्टरं स्थापयेदर्च्य इत्यर्थः। कथंभूतः

विष्टर आसीनः चतुर्थ्यन्त्रनविवद्भिते त्याङ्गः । केविसृ । चतुर्थीवलात्कर्मिकं दानमाङ्गः । स
व्यंपादं प्रक्षाल्य दक्षिणं प्रक्षालयति ब्राह्मणश्चेद्दक्षिणं प्रथमं । ततोन्येन पादार्घमुदकमि
तित्रिरुक्ते पूर्वकेन प्रतिगृह्यतामित्युक्ते प्रतिगृह्णामीति प्रतिगृह्यार्घ्य इति शेषः । मंत्रेण वान्तू
ष्णीं वेत्यत आह । विराजोदोहोसि विराजोदोहमशीय मयि पाद्यायै विराजोदोहइति । दोह इत्यं
तेन मंत्रेण पादौ प्रक्षालयेदर्घ इत्यर्थः । अर्घं प्रतिगृह्णाति । ततोर्घ आपस्थ इति इत्यनेन त्रि
रुक्ते प्रतिगृह्यतामित्यर्वकेनोक्ते आपस्थ इत्यस्तु मंत्रं पठित्वा प्रतिगृह्णामीति अर्घं प्रतिगृ
ह्णामीत्यर्थः मंत्रमाह । आपस्थयुष्माभिः सर्वान्कामानवाप्नवानीति निनयन्नलिमंत्रये
त । समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत । अरिष्टास्माकं वीरामापरासेचि मत्पय इति
शिरसालिवंशसन्मुखं निनयन्समुद्रंव इत्यलिमंत्रयत इत्यर्थः । आचामत्यामागन्यशसा
संसृजवर्चसातंमाकुरुप्रियं प्रजानामधिपतिं पशूनामरिष्टिं तनूनामिति । आचमनीय
मित्यनेनत्रिरुक्ते प्रतिगृह्यतामित्यर्वकेनोक्ते प्रतिगृह्णामीति गृहीत्वा आमागन्नित्याच

मतीत्यर्थः। ततः स्मार्त्ताचमनं। मित्रस्य त्वेति मधुपर्कं प्रतीक्षते। मधुपर्क इत्यनेन त्रिरुक्ते प्र
गृ.प्र.सं. तिगृह्यतामित्यर्चकेनोक्ते मित्रस्य त्वेति अर्चकहस्तस्थं मधुपर्कं मीक्षते उद्घाटितं। सर्वका
तीयसूत्रे उक्तत्वादिह मंत्रो नोक्तः। संहितायामविद्यमानोप्ययमाम्नाय इतिवत्। देवस्य त्वे
२१ ति प्रतिगृह्णाति। प्रतिगृह्णामि त्वां तेन देवस्य त्वेति मंत्रेण यजमानहस्तात् गृह्णातीत्यर्थः।
सव्ये पाणौ कृत्वा दक्षिणस्यानामिकया। त्रिः प्रयौतीति नमः श्यावास्यायान्नशने यत्त आवि
21 द्धं तत्ते निष्कृंतामीति। मधुपर्कं वामहस्ते निधाय दक्षिणहस्तस्यानामिकयांगुल्या त्रिर्वार
मालोडयति नमः श्यावेति मंत्रेण अनामिकांगुष्ठेन च त्रिर्निरुक्षयति। दक्षिणहस्ताना २१
मिकांगुष्ठाभ्यां। त्रिर्वारं निरुक्षयंति वाहिः प्रक्षिपतीत्यर्थः। चकारः समुच्चयार्थः। तस्य
त्रिः प्राश्नाति। यन्मधुनो मधव्यं परमं रूपमन्नाद्यं। तेनाहं मधुनो मधव्येन परमेण रूपेणा
न्नाद्येन परमो मधव्योऽन्नादोऽसानीति। यन्मधुन इति मंत्रेण त्रिर्वारं मधुपर्कं प्राश्नातीत्य
र्थः। उच्छिष्टोऽपि मंत्रानुद्धरेत्। मधुमती त्रिर्वा प्रत्यृचं। मधुवाता इति तृचेन वा प्रत्यृचं प्राश्ना

ति। पुत्रायांतेवासिने चोत्तरत आसीनायोत्सिष्टं दद्यात् सर्वं वा आप्नीयात् आपां वा संचरे निनयेत्
। असंचरे जनसंचारवर्जिते देशे। शेषं सुगमं। इयं च प्रतिपत्तिः पूर्वलतावेद्यन्तरा ज्ञेया। आ
चम्य प्राणान्संमृशति। आचमनं कृत्वा वक्ष्यमाणान् प्राणान् स्पृशतीत्यर्थः। वाङ्म आस्ये
अनेन आस्यं स्पृशति। नसोर्मे प्राणः। अनेन नासारंध्रे सह एव स्पृशति। अक्ष्णोर्मे चक्षुः अ
नेन चक्षुषी। कर्णयोर्मे श्रोत्रं अनेन कर्णौ मंत्रावृत्तिः दक्षिणोत्तरे। बाह्वोर्मे बलं। अनेन
बाहू मंत्रावृत्त्या स्पृशति। ऊर्वोर्मे ओजः। अनेन ऊरू। अरिष्टानि मेंऽगानि तनूस्तन्वा मे सह
इति। अनेन शिरःप्रभृतीनि पादांतानि सर्वाण्यंगान्यंगुलाभ्यां हस्ताभ्यां आलभते। आचांतोद
काय शासमादाय गौरिति त्रिः प्राह प्रत्याह। आचांतमुदकं येन स आचांतोदकः तस्मै अर्घ्या
य सन्निहिते कन्यादानकाले शासं खड्गमादाय गौरिति त्रिर्वरमाहार्चकः। तं अर्चकं प्रत्या
हार्च्यः। किमित्यत आह। माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः
प्र नु वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट। मम चामुष्य च पाप्मानं हनोमि।

रघुला॰ तियद्यालभेतायथवृत्तिस्मिन्पक्षेममचामुष्यचपाप्माहत ॐ ३ अमुत्सृजथतृणान्यत्त्विति ब्रूया
त्। वधिष्वेत्वंतं मंत्रमुच्चार्य आत्मनो वक्तस्य च प्रपंचे तेनामनी गृहीत्वो लयोः पाप्माहत
ॐ अमुत्सृजथतृणान्यत्त्विति उत्सर्गपक्षे आलंभपक्षे तु सर्ववन्नामनी गृहीत्वा उभयोः प
२२ प्मानं हनोमी अमुत्कां ॐ ३ कुरुतेति ब्रूयादित्यर्थः। उत्सर्गपक्षे गवे तृणदानं। आलंभ
पक्षे तु पालाशीं शाखां निखाय यादृग्गुणं रशनये त्वा रश्म प्रजापतये त्वा सनि ऋनामी
ति शाखायां नियोजनं मारणं तं। तस्मिन्पक्षे मांसेनार्घदानं। कर्त्तव्यताविशेषं गो
यज्ञेव वक्ष्यति। अस्येवोपोहलकमाह। नत्वेवामांसोऽर्घस्यात्। तु शब्दः पक्षव्यावृत्तौ अमां २२
सः मांसवर्जितः अर्घो नैव भवेत्। तत्र षोडशी यत्र विद्युत्कल्प मसिधायाद्यार्थकत्वेन चा
नुष्ठानपक्षं संस्मृत्य इदानीं विवाहे कृते च तस्यावश्यतामाह। अधियज्ञमाधिविवाहं कुरु
तेत्येव ब्रूयात्। कृते विवाहे च कुरुतेत्येव ब्रूयात्। प्रयोगस्तु प्राग्दर्शितः। आलंभस्तु
कलौ निषिद्धत्वादनादरणीयः। यद्यप्यसकृत्संवत्सरस्य सोमेन कृता [illegible] एवैनं याजयेयु

र्नीकृतार्घ्यारतिश्रुतेः।असकृत्तुनःपुनःसंवत्सरस्यसंवत्सरसंबंधिनासोमेनयजेतयद्वा
संवत्सरस्यमध्येअसकृत्तुनःपुनःसोमेनयजेततदाकृतार्घ्याएवैनंयजमानंयाजयेयुः
नाकृतमधुपर्काइत्यर्थः।श्रुतिप्रमाणेनतुसोमादन्यत्रमधुपर्कस्य।नावश्यकताग्रदर्शि
नार्थ्य।अपरेतुसोमएवऋत्विजांमधुपर्कमाहुः।ततःपुण्याहवाचनंयथाशक्त्यलंकृतां
सितवस्त्रयुग्मवेष्टितांचंदनविलेपितांगींपुष्पाद्यलंकृतांब्राह्मणेषुपुण्याहंपठत्सुकुमारींपुण्या
हस्थानेसमानीयतस्याःदक्षिणंहस्तंगृहीत्वापितादत्दाति।पितृत्ववेपितामहादिः।सर्वेषा
मभावेकन्याकुमार्यात्स्वयंवरं॥तत्रविधिः॥चत्वरिकोत्तरतःवरंप्राङ्मुखंकुशास्तीर्णेआ
सनेउपविष्टवरात्दक्षिणतःकन्यामुपावेश्यततःप्रायुदङ्मुखःप्रदःकन्यायाःआसनेउ
पविशेत्।दक्षिणतःपत्नीतिष्ठेत्।तत्रसर्वंदेशकालौस्मृत्वाकन्यादानमहंकरिष्यइतिसं
कल्प्यकन्यादाननिमित्तंवरायपाद्यंघेदित्वातस्यैवपादौप्रक्षाल्यस्वपादावपिप्रक्षाल्य।

गृह्यला॰ वृम्भभ्राणानायमग्न पुनरापःप्रत्यस्मिन इंद्र इत्यादि पठित्वोदकं पात्रे प्रक्षिप्यापवित्र इत्यनेन
पुंडरीकाक्षं संस्मृत्यात्मानं मार्जयित्वा सप्तव्याधेत्यादि पठित्वा कन्यादानोपहाराणामित्यु
पहारं प्रोक्ष्य पुनः स्वस्तिन इति पठित्वा चंदनपुष्पागुरुधूपारात्रिकादिभिर्वरं संपूज्य इ
२३ मानि अर्चितानि ज्योतींषीत्युक्त्वा ॥ वनविधेः स्वर्णताम्रवित्युक्त्वा यवान्प्रकीर्य पुण्याहं दीर्घ
मायुरस्त्वित्यादिनात्मानं संप्रोक्ष्य ससोदकान्दर्भान्गृहीत्वा देशकालौ संकीर्त्य शास्त्रोक्त
23 फलावाप्त्यर्थं अमुकगोत्रस्यामुकप्रवरस्यामुकशर्म्मणः प्रपौत्रायैवं पितामहपित्रोर्ना
मनी संकीर्त्य पौत्राय पुत्रायेत्युक्त्वामुकगोत्रायामुकशर्म्मणे वरायन्तु स्वामित्युक्त्वा ॥ मु २३
कगोत्रस्यामुकप्रवरस्यामुकशर्म्मणः प्रपौत्रीमेवं पौत्रीं तथा पुत्रीमित्युक्त्वामुकगोत्री
ममुकनाम्नीमनुपहतसर्वेन्द्रियां वस्त्रयुग्माच्छादितां सोपानत्कां यथाशक्तिसुवर्णरत्न
ताद्यलंकृतां प्रजापतिदैवतां एवं त्रिः प्रयोगः अमुकगोत्रोहं मार्त्तंडोपरागादिकालीन

कुरुक्षेत्राद्यधिकरणकानवद्यविद्यावते ब्राह्मणायसुवर्णभारसहस्रदानजन्यफलोपमशा
स्त्रबोधितफलावाप्तिकामः संप्रददइत्युक्त्वा कन्यादक्षिणंहस्तंवरदक्षिणहस्तेदद्यात् वरश्चों
मितिप्रतिगृह्यस्वस्तीत्याशिषंदत्वा कोदादितिकामसूक्तिंपठेत्॥ ततः कन्यादानप्रतिष्ठार्थ
मितिसंकल्प्य हिरण्यंवरायदद्यात्। ततः पयस्विनीं गांकन्यादानसमृद्ध्येयथोपपन्नोप
स्करसहितांदद्यात्। ततोदक्षिणाः पात्रिक्त्याद्याशीः प्रार्थना। ततः कृतैतत्कन्यादानकर्म
णोयन्न्यूनंयदतिरिक्तंतत्सर्वंपरिपूर्णमस्त्विति संप्रार्थ्य द्विजान्नमेत्। ततः कौतुकगृ
हप्रवेशादिकुर्यात्॥ ॥तृतीयाकंडिका॥ ॥पाकयज्ञानाह। चत्वारः पाकयज्ञाः चत्वा
रः चतुर्विधाः पाकः अग्निः तद्धुतोयज्ञाः तथाचसायणेसूत्रुः प्रकारापाकयज्ञालवंतीत्य
र्थः। तान्प्रकारानाह। हुतोऽहुतः प्रहुतः प्राशित इति। हुतः सायंप्रातः क्रियमाणोहु
तहोमः होमप्राज्ञात्मकः अहुतः अश्मारोहणादि होमबलिप्राशनैर्वर्जितः। प्रहुतः
पञ्चाद्यादिः। होमबलिप्राशनान्वितः। प्राशितः। सर्वासांपयसिपायसंश्रपयित्वा

ब्राह्मणान्भोजयेदित्यादिः केवलं प्राशनात्मकः। अपरे त्वग्रत्यहं अल्पस्यमानान्ब्रह्मयज्ञ
गृ॰ व्यतिरिक्तान्महायज्ञानेव पाकयज्ञानाहुः। सूत्रार्थं तु हुतहुत्यादिसूत्राञ्चरूसंख्याला
भेपि सायं प्रातरभ्यासाद्दितहिगुणसंख्याप्रसक्तिमपवदितुं चत्वार इति पदं। तथा च च
२४ त्वारः पाकयज्ञा इति सिद्धे हुतहुत्यादिसूत्रं पद्माद्यादिसंग्रहार्थं। तथा च कारिकायां। च
त्वारः पाकयज्ञाः स्युर्ब्रह्मयज्ञश्च पंचमः। एते पंच महायज्ञाः अत्यहं स्युस्तकाहूते। जनादिपा
दात्सिद्धेपि चत्वार इति सूत्रितम्। चतुर्णां सायमभ्यास आद्ये आहुं च तत्सकृत्। अल्पासो वै
श्वदेवे च सर्वस्यैव हि कर्मणः। अतश्चत्वार एवैते नाष्टौ स्युः कालभेदतः। पंचसु वहिः शा २४
लायां विवाहे चूडाकरण उपनयने केशांते सीमंतोन्नयने। पंचसु संस्कारकर्मसु वहिः शा
लायां शालायाः वहिः मंडप इति यावत्। तथा च विवाहादिकर्मपंचकं मंडपेत्तवती त्य
र्थः। तत्रैव परिशाखासूत्रे पंच संस्कारा भवेः उक्ताः। अधुना लौकिकाग्निसाध्ये विवाहादौ तेषा
मपवादमाह। उपलिप्त उद्धतावोक्षिते ऽग्निमुपसमाधाय। लौकिकाग्निसाध्यं विवाहादिक्रि

याकलापं कुर्यादिति शेषः। निर्मथ्यमेके विवाहे। एके आचार्याः विवाहं निर्मथ्य आरणेयम
ग्निमिच्छंति। एतच्च कृताधानस्य भार्यायां विद्यमानायां द्वितीया परिणयनविषयं तदुक्तं। भा
र्यायां विद्यमानायां द्वितीयामुद्वहेद्यदि। तदा वैवाहिकं कर्म्म कुर्यादावसथ्येऽग्निमान्। अन्ये
तु विवाहमात्रविषयमेतदाहुः। विवाहकालमाह। उदगयन आपूर्यमाणपक्षे पुण्याहे कु
मार्याः पाणिं गृह्णीयात्। उत्तरायणे शुक्लपक्षे ज्योतिःशास्त्रविहिते पुण्याहे कुमार्याः अन
न्यपूर्विकायाः पाणिं गृह्णीयादित्यर्थः स्वगृह्योक्तविधिनेति शेषः। नक्षत्रविशेषानाह। त्रि
षु त्रिषूत्तरादिषु स्वातौ मृगशिरसि रोहिण्यां वा। उत्तराः आदिर्येषां तानि उत्तरादीनि तेषु।
एके त्रित्वं उत्तरायामन्वेति। अपरं त्रित्वं तदादिषु। तथा चोत्तरात्रयं येषां नक्षत्राणामादि
भूतं तत्त्रिकं ग्राह्यमित्यर्थः। तथाहि। उत्तरा हस्तचित्रा। उत्तरा श्रवणधनिष्ठा। उत्तरा रेवती अ
श्विनी। स्वातौ मृगशिरसि रोहिण्यां वा वाशब्दोऽवधारणे। एषामन्यतमस्मिन् विवाहं कुर्यादि
त्यर्थः। यद्वा वाशब्दश्चकारार्थः। चशब्दश्च ज्योतिःशास्त्राद्युपात्तनक्षत्रसमुच्चयार्थः। वैवा

गृह्य.सू. स्याः श्रीराह। तिस्रो ब्राह्मणस्य वर्णानुपूर्व्येण द्वे राजन्यस्यैका वैश्यस्य। वर्णानुपूर्व्येण वर्ण
क्रमेण ब्राह्मणस्य तिस्रः ब्राह्मणी क्षत्रिया वैश्या च भार्या भवंति। एवं द्वे राजन्यस्य क्षत्रिया
वैश्या च। एका वैश्या समानवर्णैव वैश्यस्य। सर्वेषां शूद्रामप्येके मंत्रवर्जं। चतुर्णामपि
२५ वर्णानां एके शूद्रापरिणयनमिच्छंति। अपरे नेच्छंति। अन्यवर्णसमुच्चयार्थे अपि शब्दः
॥ इदानीं प्रकृतमाह॥ ॥ अथैनां वासः परिधापयति। जरां गच्छ परिधत्स्व वासो भवा कृ
ष्टीनामभिशस्तिपावा। शतं च जीव शरदः सुवर्चा रयिं च पुत्राननुसंव्ययस्वायुष्मतीदं प
रिधत्स्व वास इति मंत्रं॥ अत्रायमर्थः शब्दः कौतुकागार प्रवेशाद्यानंतर्यवाचकः। एनां
कुमारीं वासः परिधापयति परिहितं कारयति। केन मंत्रेणेत्यत उक्तं। जरां गच्छेत्यादि। इ २५
ति शब्दो मंत्रसमाप्तिद्योतकः। अथोत्तरीयं या अकृंतन्नवयं या अतन्वत। याश्च देवीस्तंतू
न्भितो ततंथ तास्त्वा देवी र्जरसे संव्ययस्वायुष्मतीदं परिधत्स्व वास इति मंत्रं। अथ उत्त
रीय परिधानानंतरं उत्तरीयं परिधापयति। या अकृंतन्निति मंत्रेणेत्यर्थः। अत्र परि

धापयिता वर एव॥ अथैनौ समंजयति समंजन्तु विश्वे देवाः समापो हृदयानि नौ। सम्मात
रिश्वा सं धाता समु देष्ट्री दधातु नाविति। अथ वस्त्रपरिधानानंतरं एनौ कन्यावरौ आचार्यः स
मंजयति परस्परं समंजाथांइति प्रैषपूर्वं। तत्र मंत्रमाह। समंजंत्वित्यादि। इतिशब्दः मंत्रसमा
प्त्यर्थे॥ ततः कंकणबंधनं परस्परं॥ पित्रा प्रत्तामादाय गृहीत्वा निष्क्रामयति यदैषि मनसा
दूरं दिशोनुपवमानो वा। हिरण्यपर्णो वैकर्णः स त्वां मन्मनसां करोत्वित्यसाविति नाम गृह्णा
ति। पित्रा जनकेन उपलक्षणमेतत्। पितुरभावे पितामहादिस्मृत्युक्तदानाधिकारिणा। प्रत्तां
कन्यादानकाले दत्तां। केचिदमुमेव कन्यादानावसरमाहुः। आदाय प्रतिगृह्य। गृहीत्वा वरः
स्वदक्षिणहस्तेन कन्यादक्षिणहस्तं गृहीत्वा निष्क्रामति चतुरिकायां गंतुं कौतुकागारान्निर्ग
च्छति। केन मंत्रेणेत्यत आह यदैषीत्यादि। असौस्थाने कन्यानामग्रहणं अमुकि देवि देत्येवं प्रयो
गः॥ अथैनौ समीक्षयत्यघोरचक्षुरित्यारभ्य यस्यामुकामाव इवोनि विश्वाइत्यंतं मंत्रं॥
अथ निष्क्रमणानंतरं। एनौ कन्यावरौ आचार्यः समीक्षयति। समीक्षणं कारयति परस्परं।

समीक्षेयामितिप्रैषश्चवै। केनेत्यतउक्तं। अघोरचक्षुरिति। तथाचाघोरचक्षुरित्यारभ्य
गृह्यसू यस्यामुकामावहवोनिविष्ट्याइत्यंतेनसोऽत्रमंत्रसमुदायेनवरः कन्यामीक्षत इत्यर्थः॥४॥
॥ ॥चतुर्थीकंडिका॥ ॥प्रदक्षिणमग्निंपर्याणीयेके॥ एके आचार्याःकन्यावरौ अग्निंप्रदक्षि
२६ णंपर्याणीयवासःपरिधानादिमन्यंते। पश्चादग्नेस्तेजनींकटंवादक्षिणपादेनप्रवृत्त्योपवि
शति। दक्षिणपादेनतेजनीं तृणसूलकं। कटंवा। प्रवृत्त्यपरिवर्त्यतदुल्लंघ्येत्यपरोऽत्र अग्नेःप
26 श्चादुपविशति। वरइतिशेषः। दक्षिणतःकन्यावराल्। उत्तरत आचार्यः। अथारभ्य आघा
रावाज्यभागौमहाव्याहृतयःसर्वप्रायश्चित्तंप्राजापत्यंस्विष्टकृद्धैतंनित्यंसर्वत्र। दक्षि २६
णतोब्रह्मासनमास्तीर्येत्यारभ्यपर्युक्ष्यजुहुयादित्यंतेपरिभाषाशास्त्रार्थकृते। कन्याव
रास्यामन्वारब्धोआचार्यः आघारौ। प्रजापतयेस्वाहा इंद्रायस्वाहेत्याज्याहुती आज्यभा
गौ अग्नयेसोमायेत्याज्याहुतीमहाव्याहृतयः भूर्भुवःस्वरिति ओंमहाव्याहृतयःसर्वप्राय
श्चित्तं। त्वन्नोअग्नेसत्वन्नोअग्नेअयाश्चाग्नेयेतेशतंउदुत्तममित्याहुतिपंचकस्यसर्वप्रा

यश्चित्तसंज्ञाप्राजापत्यं। प्रजापतये स्वाहेति प्रजापतिदेवताकं होमं स्विष्टकृत्स्विष्टकृद्गुणवि
शिष्टमग्निदेवताकं होमं नित्यं सर्वत्र। सर्वस्मिन्होमे एतदाहुतिचतुष्टयं नित्यं लवत्येवेत्य
र्थः। विशेषविधिं विनेति शेषः। तेन नित्यावसथ्य होमादौ न लवतीति ध्येयं। अथ महाव्याहृति
भ्यः स्विष्टकृदन्यच्चेदाज्याद्धविः। आज्याच्चेदितरदन्नपयस्तं सर्वादिहविः स्यात्तदा महाव्याहृ
तिहोमात्प्राक् प्रधानहोमानंतरमेव स्विष्टकृद्धोमो लवतीत्यर्थः। सर्वप्रायश्चित्तप्राजापत्या
तरमेतदावापस्थानं विवाहे। एतत्सर्वप्रायश्चित्तहोमप्राजापत्यहोमयोर्मध्यं विवाहादिकेक
र्मणि आगंतुकहोमस्थानमित्यर्थः। राष्ट्रभृत इत्युक्ता। राष्ट्रभृत्संज्ञका आहुतीरावपेदित्यर्थः।
॥ प्रयोगश्च॥ ऋताषाडृतधामाग्निर्गंधर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट्। इदमग्नये
गंधर्वायेति त्यागः। तस्यौषधयोऽप्सरसो मुदो नाम ताभ्यः स्वाहा॥ इदमोषधिभ्योऽप्सरोभ्यः। ए
वं सर्वत्र त्यागे विशेषः। इदं सूर्याय गंधर्वाय इदं मरीचिभ्योऽप्सरोभ्यः। इदं चंद्रमसे गंधर्वाय।
इदं नक्षत्रेभ्योऽप्सरोभ्यः। इदं वाताय गंधर्वाय। इदमद्भ्योऽप्सरोभ्यः। इदं यज्ञाय गंधर्वाय। इ

ग्रघृता॰

दं दक्षिणाभ्यो म्परोभ्यः। इदं मनसे गंधर्वाय। इदमृक्सामभ्यो म्परोभ्यः। इच्छन्नफलं कामय
मानः आकूतीनामिति शेषः। जयाभ्यातानां च। आवापं कुर्यादिति शेषः। चकारः समुच्च
यार्थः। न केवलं राष्ट्रभृतामेवावापः। अपि तु जयाभ्यातानामपीत्यर्थः। अत्र श्रुतिं प्रमाणय
२८ ति। जानन्नेनेन कर्म्मणर्द्धेदिति वचनात्। आवापेयेन कर्म्मणा यत्फलं साधयेत्। तत्फलकामः तस्मि
न्कर्म्मणि तत्कर्म्म आवपेदित्यर्थः। अपरे तु जानन्नित्यमुं शब्दं विकल्पार्थमाहुः। इच्छेदित्य
२७ स्यार्थं समृद्धिमिच्छेदिति। जयाकूतीनां देवताः आह। चित्तं च चित्तिश्च आकूतं चाकूतिश्चेत्यादि।
स इह हव्यो बभूव स्वाहेत्यंतं मंत्रं। प्रयोगश्चैवं। चित्ताय स्वाहा। इदं चित्ताय। चित्त्यै स्वाहा। इदं चित्त्यै। २८
एवमन्यत्र। आकूताय स्वाहा। आकूत्यै स्वाहा। विज्ञाताय स्वाहा। विज्ञात्यै स्वाहा। मनसे स्वाहा।
शाक्वर्यै स्वाहा। दर्शाय स्वाहा। पौर्णमासाय स्वाहा। बृहते स्वाहा। रथंतराय स्वाहा। प्रजापतिर्ज
यानिंद्राय वृष्णे प्रायच्छदुग्रः पृतनाजयेषु। तस्मै विशः समनमंत सर्वाः स उग्रः स इह हव्यो
बभूव स्वाहेति। इदं प्रजापतय इति त्यागः॥ अथाभ्याताः॥ अग्निर्भूतानामधिपतिः समावत्विन्द्रो ज्ये

ह्र १

ध्यानामित्यादिदेवत्याऽँस्वाहेत्यंतंमन्त्रंएभिरष्टादशसंख्याकैर्मन्त्रैरभ्यातानसंज्ञकाआहुतीर्जुहुयादि
त्यर्थः। सर्वत्रानुषज्जति। अग्निर्भूतानामित्याद्यष्टादशमंत्रेषु प्रतिमंत्रंयथालिंगंसमावत्वस्मिन्
ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मण्यस्यांदेवहूत्याऽँस्वाहेत्यनुषंगं
करोतीत्यर्थः॥ प्रयोगस्त्वेवं। अग्निर्भूतानामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्य
स्यांपुरोधायामस्मिन्कर्मण्यस्यांदेवहूत्याऽँस्वाहेति। इदमग्नये भूतानामधिपतये। एवमन्यत्र।
त्यागास्तु। इदमिन्द्राय ज्येष्ठानामधिपतये। २ इदंयमायपृथिव्या अधिपतये। ३ इदंवायवेऽन्तरि
क्षस्याधिपतये ४ इदंसूर्यायदिवोधिपतये ५ इदंचंद्रमसेनक्षत्राणामधिपतये ६ इदंबृहस्पतये
ब्रह्मणोधिपतये ७ इदंमित्रायसत्यानामधिपतये ८ इदंवरुणायापामधिपतये ९ इदंसमुद्राय
स्रोत्यानामधिपतये १० अन्नऽँसाम्राज्यानामत्रानुषंगेविशेषः। अधिपतिस्तन्मावत्विति। इदमन्ना
यसाम्राज्यानामधिपतये ११ इदऽँसोमायोषधीनामधिपतये १२ इदऽँसवित्रेप्रसवानामधिपतये
१३ इदंरुद्रायपशूनामधिपतये १४ इदंत्वष्ट्रेरूपाणामधिपतये १५ इदंविष्णवेपर्वतानामधिप
तये १६ मरुतोगणानामत्रापिविशेषः। गणानामधिपतयस्तेमावंत्वस्मिन्निति इदंमरुद्भ्योगणा
नामधिपतिभ्यः १७॥ इदंपितृभ्यः॥ इत्यभ्यातानहोमः॥ अग्निरैत्वित्यारभ्यपरंमृत्याविति

गृ.प्र.

चैके आशनांतमित्यंतं सूत्रं। अग्निरैतु इमामग्निः स्वस्ति नो अग्ने सुगन्नु पंथां परं मृत्यो ए-
तैः पंचमंत्रैः पंचाहुतीर्जुहुयादित्यर्थः। त्यागाः इदमग्नये ३ इदं वैवस्वताय ४ इदं मृत्य-
वे ५ एके परं मृत्यविति पंचमीमाहुतिं प्राशनांते इच्छंति॥५॥ ॥पंचमीकंडिका॥ कुमार्या भ्रा-
२८ ता स पूंहतेन तिष्ठती सूत्रं। शमीपत्रमिश्राणि भ्रष्टानि धान्यानि कन्याभ्राता तिष्ठंत्याः कन्या-
याः अंजलौ प्रक्षिपति सा च तिष्ठती मिलितेनांजलिना अग्नौ जुहोतीत्यर्थः। केनेत्यत आह।
अर्यमणं देवमित्यारभ्य अनुमन्यतामियं स्वाहेत्यंतं सूत्रं। एतैस्त्रिभिर्मंत्रैराहुतित्रयं कन्या
जुहोत्यंजलिनेत्यर्थः॥ विवाहप्रधानमाह॥ अथास्यै दक्षिणं हस्तं गृह्णाति सांगुष्ठमित्यार- २८
भ्य गृएउ यामशरदः शतमित्यंतं सूत्रं। अस्यै अस्याः इत्यर्थः। उदगयन इत्याद्युपक्रम्य कुमा-
र्याः पाणिं गृह्णीयादित्यत्र लिङा पाणिग्रहस्यैव प्राधान्यख्यापनादिह च मंत्रकरणरूपा पाणिग्र-
हस्य विधानादयं पाणिग्रहः ज्योतिःशास्त्रप्रतिपाद्ये समये कर्त्तव्यः। अन्यत्सर्वं सूत्र सम-
यासाध्यत्वेन समयांतरे स्थालीक कर्त्तव्यं। शेषं निगदव्याख्यानं॥६॥ ॥षष्ठी कंडिका॥ ॥
अथैनामश्मानमारोहयतीत्यारभ्य पृतनाय त इत्यंतं सूत्रं॥ ॥अथ गाथां गायति॥ अथ

अश्मारोहणानंतरं तामाह। सरस्वती प्रेदमव इत्यंतं॥ अथ परिक्रामतः कल्पमग्ने सहेत्यंतं।
गाथागानानंतरं एव वधूवरौ अग्निं परिक्रामतः कल्पमित्यारभ्य सहेत्यंतेन मंत्रेणेत्यर्थः॥ एवं
द्विरपरं लाजादि॥ कुमार्या भ्राता त्वारभ्य परिक्रमणांतं कर्म्मलवतीत्यर्थः। चतुर्थं शूर्प
स्य कुष्ठया कोणेन सर्वान् शूर्पावशिष्टान् लाजानावपति कुमार्याः॥ अंजलौ भ्राता तांश्च लग।
यस्वाहेति कुमारी मंत्रावृत्त्या आहुतित्रयं जुहोति। इदं लगायेति त्यागः॥ ३॥ आचाराद्वधूभ्रातुः
वरो युष्ठग्रहणं। वरश्च नालिकेरादि तस्मै ददाति। परिणीतां प्राजापत्यं हुत्वा। अग्नेः परितो नी
तां कन्यामुपवेश्य कन्यावराभ्यामन्वारब्धो आचार्यः प्रजापतये स्वाहेति हुत्वा पदप्रक्रमणं
ध्रुवत्वं यथोक्तं कारयतीत्यर्थः। इदं प्रजापतय इति त्यागः॥ ॥सप्तमी कंडिका॥ ॥७॥ अथैनामु
दीचीं सप्त पदानि प्रक्रामयति। कन्यायाः दक्षिणपादेन आचार्यापेक्षया अंतरे गत्वा हूरइत्य
र्थः। प्रतिपदं क्रमणमंत्रानाह। एकमिषे द्वे ऊर्जे त्रीणि रायस्पोषाय चत्वारि मायोभवाय पं
च पशुभ्यः षडृतुभ्यः सखे सप्तपदा भव सा मामनुव्रता भव विष्णुस्त्वा नयत्विति सर्वत्रानुष

आपो हि ष्ठेति ५

जतिसूत्रं। साकांक्षत्वाद्द्विस्वानयत्वित्यस्य सर्वत्रानुषंगः॥ वरस्यमंत्रपाठः॥ निष्क्रमणात्प्रभृत्यु
गृह्यसू॰ दककुंभं स्कंधेकृत्वा दक्षिणतोग्नेर्वाग्यतः स्थितो भवति। पितृप्रत्तामादाय गृहीत्वा निष्क्राम
तीत्येतत्कालमारभ्याग्नेर्दक्षिणतः कश्चित्तिष्ठति। उत्तरत एकेषां। अतो विकल्पः। तत एनां मू
२९ र्द्ध्न्यभिषिंचति च तिसृभिरित्यंतं सूत्रं। आचार्य इति शेषः। अथैनां सूर्यमुदीक्षयति तच्च
क्षुरिति। सूर्यमुदीक्षस्वेति शेषः। आचार्यस्य। तच्चक्षुरिति मंत्रेणैव वधूः सूर्यमुदीक्षते। अथा
स्यै दक्षिणांसमित्यारभ्य प्रजापतिष्ट्वा नियुनक्तु मह्यमित्यंतं सूत्रं। अस्याः दक्षिणं सस्यो
परि वाङ्कनीत्वा मम व्रत इति मंत्रेणैव रोहृदयमालभत इत्यर्थः। अथैनामभिमंत्रयते सुमंग २९
लीरित्यारभ्य पतनेत्यंतं तेन मंत्रेणैव वर इति शेषः। तां दृढपुरुष उन्मथ्येत्यारभ्य इह गावो निषीदंत्वि
त्यंतं सूत्रं। चत्वरिकायामीशान्यामनुगुप्ते आस्तीर्णे आनडुहे रोहिते चर्मणि वरो वा भ्राता
वा यो बलवान्स कन्यामुपवेशयति इह गाव इति मंत्रेणेत्यर्थः। ततः स्वस्थाने उपविश्याचार
न्तो आचार्यः। अग्नये स्विष्टकृते स्वाहेति जुहोति। इदमग्नये स्विष्टकृत इति त्यागः। संस्रवप्राश

त्वोपपत्तौ किमर्थं सादृश्याद्रूपकत्वं कल्प्यं। किंच द्वितीयासंबंधस्य [illegible] रूपकत्वोपपत्तौ किमर्थं
प्रातिपद्याः पराह्णिकस्य रूपकत्वेन नाडीमात्रात्मकद्वितीयासंबंधोपि प्रातिपदं रूपयेत्। वा
क्यांतरमर्यादया त्रिमुहूर्त्तात्मक इति चेत्। नर्हि तन्मर्यादयैव चंद्रदर्शनाक्षायकतया रूप
क इति निर्बंधः। तथा च यथोपाधिर्व्याप्तिविरहमाधाय स प्रतिपन्नं चोत्पाद्यप्यानुमानं रूपय
ति। तद्वत् प्रतिपद्यपराह्णाधिकरणकद्वितीयासंबंधोपि प्रतिपदं रूपयतीति युक्तमुत्पश्यामः
अत एव प्रतिपदो यज्ञनीयता प्रतिबंधिका त्रिदोषीति कालनिर्णयिकाराः। एवं च पञ्चकाल
सिद्धिर्द्वैध इत्यत्र मुहूर्त्तं कलापदार्थः। कस्य हेतोरिति चेत्। न। उपोष्यताप्रयोजकधर्मा
वच्छिन्नदर्शकालादिनिर्णायकवाक्यानां स्वतात्पर्यविषयीभूतनिर्णेतिव्योपपत्त्यये पद्वा
दिकर्त्तव्यतावोधकशास्त्रैकवाक्यतापन्नशास्त्रसमर्पितचंद्रदर्शनादिरूपणाक्रांतं समयं य
थासंभवमपवदितुं कलापदार्थो मुहूर्त्तमिति कालनिर्णयिकाराः। न च विवद्वयापि रूपणा
नपवादात्राश्चेव कलापदार्थ इति वाच्यं। समयावाप्याप्रतिपन्नपद्मानां सावकाशतापत्तेः।

ग्र सला विवक्षयाचकालेकवलितेनसावकाशः प्रतिपद्रूपक्षाइत्येकंविवक्षाफलं। नचैवंविवक्ष
याचेद्विपक्षाविपक्षाजायेते। दूषणंचापहस्येत। तर्हिसार्वकालिकदूषणापह्नवक्षमाविव
क्षयातादृशदूषणापवादेकाहानिः। नकापि। तर्हितथैवनक्रियतइतिचेत्। न। त्रिमुहूर्त्ताद्वि
३५ तीयेत्यादिवाक्यानांतात्पर्यविषयीभूतप्रकृतपदार्थसंसर्गप्रतिपत्तिहेतुत्वेनप्रामाण्यव्याको
पापत्तेः॥ तदुक्तंयाज्ञिकचरणैःस्वभाष्ये॥ त्रिमुहूर्त्ताद्वितीयेत्याद्युत्तरार्धोदितिश्रुत एवपरमु
हूर्त्तेनियागकालस्यचंद्रदर्शनाधायकत्वेनदूषकतायामपिस्वतंत्रदूषणत्वानपवादःअ
34 तएवदेवयाज्ञिकैःसपथैवव्याहृतंस्वभाष्ये। तथाचापचीमानामावास्यायाःदिवसावच्छेदे ३५
नावसितायाःप्रतिपदियदिप्रातःस्वचतुर्थांशात्वावःपरमुहूर्त्तात्मायागकालः। चंद्रदर्श
नाभावश्चेतत्रयंचेत्स्यात्। तदातस्यांयागः। नोचेत्स्वचतुर्थांशपर्यवच्छिन्नायांप्रतौ। दिवसावच्छेदेनो
परतामावास्यायांयागइतिकालनिर्णयकाराः। एवंचचतुर्थीक्षयान्यथानुपपत्त्या
चतुर्विंशतिसंख्यनाड्यनधिकसंख्यनाड्यवच्छिन्नामावास्याक्षयमारभ्यचतुर्थीप्रतिपो

गिकनिःशेषद्रव्यवशाच्चतुर्थीदिनं पंचमी यत्र व्याप्नोति। तत्र पंचमी यत्र संपूर्णेत्यादियागकर्त्त
व्यताप्रतिपादकवाक्यानां प्राङ्निर्णीतापचीयमानामावास्याविषयत्वमेव। न च चरुरिष्टिरित्या
दिना शुद्धायामेव यागकर्त्तव्यत्वावगमात्किमर्थं प्रतिपत्संवेधाद्यपेक्षेति वाच्यं। अर्थापत्तेः
सर्वबलाधिकत्वात्॥ तदुक्तं कालनिर्णयदीपिकायां॥ साया त्वागपि पर्वणः प्रतिपदश्चां तेहि
तीयाप्रभृत्य त्वं चापचयेति थेर्यजिरमावास्यादिने तत्र स्मृत इति। न चात्यंतापचयादि पदक
दंबप्रतिपाद्यार्थसंसर्गस्य चतुर्दशी चतुर्यामेत्यादिवाक्यार्थस्तित्रविषयतेव। अन्यथा य
दा चतुर्दशीत्यादिवाक्यानामर्थैक्यापत्तेरिति वाच्यं। एकार्थानेकशब्दश्रवणाद् अर्थभेदे पदभेद
स्याकरणे तेन वाक्यार्थभेदे प्रत्यपि पदार्थभेदस्याहेतुत्वात्। यदा चतुर्दशीत्यादावर्थैक्यं वक्ष्य
ते। एवं चानेकवाक्यानामप्यन्योन्यसापेक्ष्यादेकवाक्यतायां संभवंत्यामनेकार्थाभ्युपगम
स्यान्याय्यत्वात्। अन्यथायथाकथंचिदर्थभेदावाप्तौ तदभ्युपगमे ऽनंतामावास्याः स्युरादि
ति। तदुक्तं। चतुर्दशी चतुर्याम इति वाक्यैः श्वो भूतेदृत्यस्या ऽर्थो मावास्यायां चतुर्थ्यामेव

गृहला येत्प्रतिपत् तदाभ्रंते चतुर्द्दश्यांदिनसावच्छेदेनानयान्वपरक्तायामपिकव्यादिकी पिंडपितृ
यज्ञाऽन्वाधानादिकी त्यर्थः। ननु यदा चतुर्द्दशी स्यादिवाक्यैकवाक्यतानुरोधाच्चतुर्द्दश्यां
चतुर्थ्यामेकदेशावच्छेदेनामावास्यासंसर्गोपपन्नये चतुर्द्दशी चतुर्थामित्यत्र न दृश्यत
३५ इत्यस्य किंचिदवच्छेदकत्वेन दृश्यत इत्यर्थे वाच्यस्वयच्चामयोपरक्तायामेव चतुर्द्दश्यांक
व्यादिकी क्रियेति चेन्न। न। लक्षणापत्तेः। इतरवाक्यैकवाक्यतानुरोधान्नद भ्युपगमे यदाच
35 तुर्द्दशी त्यस्मिन्नपि तृतीयमनुसरयंती तुरीयमनुसरयेदित्येवमाकाराध्याहारेणाईचतुर्द्द
शी तिवाक्यैकवाक्यतालाभस्यापि कर्तव्यतापत्तेः। एककर्तृकानेकवाक्यानामनेकार्थत्वेन्य
तरव्यर्थतापत्तेश्च। न चैतत्पक्षांतरेपि समानमेककर्तृकत्वानभ्युपगमात्। अन्यथा समानार्थ
सकलवाक्यविलोपापत्तेः। एवं चोपचीयमानामावास्यायां यामत्रयान्ननसमयगामिन्या ३५
मपि व्रतान्वाधानादिकं। यदि प्रतिपद्ज्ञातः प्रतिपच्चतुर्थं शिशालावः पश्चमुहूर्त्तात्माय
गकालः। चंद्रदर्शनाभावश्च। नो चेत्तत्रापि चतुर्द्दश्यामेव व्रतं। संधिदिने याग इति॥ त

डुक्तंकालनिर्णयदीपिकायां॥ प्रतिपदस्त्वंत्योक्षिरिंद्दीहृणांस्यात्त्वेन्नत्रतदादिमेष्वविहितेष्वं
श्रेयज्ञेत्पर्वणः पौर्णमासीप्रतिपदितु त्रिमुहूर्त्तात्मनोपियागकालत्वात्सेयष्टव्यं। तथासतत्र
प्रतिपच्चतुर्थांशस्याद्यास्तस्याश्चतुर्थांपीत्यादियागीयतावोधकंशास्त्रंसावकाशं। नचैवंका
लनिर्णयकाराणामपिसिद्धांतः। केवलस्यप्रतिपच्चतुर्थांशस्ययागीयतानिषेधेपितृतीयां
शावछिन्नस्यतस्यतेषामप्यभ्युपगमात्। अन्यथाविधिनिषेधशास्त्रयोर्विषयभेदमंतराप्र
वृत्तेरशक्यत्वात्। नहियेनरूपेणयद्विहितं तेनैवरूपेणतन्निषेद्धुं शक्यं। नवायेनरूपेणयन्नि
षिद्धं तेनरूपेणतद्विधातुंशक्यं। यथापराह्णेविहितंश्राद्धं। रात्रौनिषिद्धं पुनश्चंद्रोपरागेवि
धीयते। तथाप्रकृतेपिनयष्टव्यमित्यादिशास्त्रनिषिद्धस्यप्रतिपच्चतुर्थांशस्याद्यास्तस्याश्चतु
र्थांपीत्यादिनारूपांतरमंतराविधातुमशक्यतया तृतीयांशावछिन्नश्चतुर्थांशोप्युपादेयइत्य
वसीयते। यत्रतुप्रातःसमयावछिन्नादिवसद्वयेधिकृतकालः प्रतीयते। तत्रसर्वदिवसस्यस
मयस्यैवयागीयकालावछिन्नत्वात्सर्वदिवसेयागइति। यत्रतुदिनद्वयेपिकायागकालोन

ग्रहस्य लभ्यते। तत्रापि प्रातःसमयाधिकरणकयागकालालाभेपि संगवाद्यधिकरणकप्रचुरतरया
गकालालाभापचयवशादुत्तरदिने च यागकालालाभ्यंतालाभावात्पूर्वदिने यागः। एवं चोपचयव
शाद्यत्रोत्तरदिने प्रातःसमयावच्छिन्नस्य तस्यात्यंतालाभः तत्रत्तृतीयांशावच्छिन्नस्य स्वल्पयां
३६ शस्यापि यागीयतया तत्रोत्तरदिने याग इति कालनिर्णयकाराः। तदुक्तं कालनिर्णयदी
36 पिकायां॥ प्रातर्मध्यापराह्णसंधिषु यज्ञःकालो मुहूर्ते स्यात्तथा नैव स्यादुभयत्र सत्त्वे दिवसे या
गस्तदापीष्यत इति। ननु सामान्यवाचिनां न विशेषपरता सामान्ये प्रमाणपक्षपातादिति चेत्।
धा० न। चंद्रदर्शनस्य तावदमावास्येत्याद्युपक्रमस्य दूषणत्वावगमात् दर्शप्रतिपद्दूषकत्वमेव। अप ३६
राह्णिकद्वितीयोपरागपक्षलग्नस्य यागकालयोरपि चंद्रदर्शनाबाधकत्वे नैव दूषकत्वोप
पादनात्तयोः पौर्णमासप्रतिपद्दिनिरवकाशता। न च पौर्णमासप्रतिपद्यपि चंद्रदर्शनं दूषण
मिति वाच्यं। एष एव स पूर्णिमायश्चंद्रमा एतस्य ह्येतु हरणं पौर्णमासीत्याचक्षत इत्यादिश्रुत्य
र्थपर्यालोचनया चंद्रस्य रणमुपजीव्य पौर्णमासप्रवृत्तेस्तस्यैव तद्दूषकत्वे पौर्णमासस्य

नित्यमननुष्ठानापत्तेः। अतएव बाधकत्वाद्द्वयोपि न दूषकइति ध्येयं। एवं च चंद्रद्वयस्तुपजीव्य
दर्शस्य प्रवृत्तत्वेप्याद्यकलोपचयस्तत्रापि न दूषणं। दर्शस्यापि नित्यमननुष्ठानापत्तेः। ए
वं चंद्रदर्शनस्यामावास्यामेव दूषणत्वात्तदा बाधकदूषणोपरागेण पौर्णमासकृतौ। तथा च
सामान्यवाचकानामपि बलवद्बाधकाद्विशेषपरत्वेवेति सर्वसमंजसं। प्रतिपन्निर्णयचि
कवाक्येषु श्रूयमाणपराह्णपदं द्विधाविलक्षदिनोत्तरदलवाचकं कालनिर्णयकारमते।
अपि च यत्र निर्णायकवाक्याहितसंशयकोटौ प्यौत्कट्यं नोपलभ्यते। तत्र षोडशमहः उपा
देयं। तत्र दिनद्वयवशात्प्रतिपत्त्वस्यांशादि दूषितं। तदा पंचदशमुपादेयं। एवं वृद्धिवशात्षो
डशाह्नोपयोगीयतानवगमस्तत्र सप्तदशोयागः। तदेतदुक्तं पंचदशोपीत्यनुक्तसमुच्चयार्थे
नापि नासाधितं च दिनत्रयोपि यदा लवेदित्यनेन। तथा च सप्तदशोपि यष्टव्यं दिनवृद्धिर्यदा लवे
दित्यर्थः। एवं च दिनयोर्नाशे चतुर्दशोपि यष्टव्यं। अतएवाधिकरणं लेदयन्निर्णयांतरे व्यय
त्राह्नार्त्विककारः॥ सर्वव्याख्याविकल्पानां द्वयमेव प्रयोजनं। सर्वत्रापरितोषो वा विषयव्या

मुख्ये

प्तिरेवचेति। तेनविषयव्याप्त्यर्थमनुक्तसमुच्चयार्थएवायमपिशब्दः। निंदार्थवादश्रौतस्य

गृह्य॰सू॰ मानेजघन्यस्यानुपादेयतायोजनार्थमितिकालनिर्णयकाराः। अन्येतु। चतुर्दशीपर्वाच्छि

न्नायांचतुर्दशीपदस्थांशविरहप्रयुक्तचंद्रदर्शनसंभवेनोत्तरदिनेचापराह्णामावास्यावच्छि

३१ न्नामावास्यालाभेतस्यांव्रतं। उत्तरदिनेप्रतिपदिषड्भागस्यततोन्यूनस्यवायागकालस्यसंभ

वेचंद्रदर्शनेसत्यपियागइति। तन्मतेचंद्रदर्शननिषेधस्यसर्वाह्णिमध्याह्नान्यतरकालेपर्वसं

धौप्रमादाच्चंद्रदर्शनदिनेयागानुष्ठानविषयता। प्रतिपद्यापराह्णिकद्वितीयोपरागस्थपंच

धाविभक्तस्याह्नस्तृतीयांशात्मकापराह्णः परभागः। षड्भागइत्यत्रकलापदार्थोघटिका

स्वतात्पर्यविशेषवशात्। तदनुरोधाच्चचतुर्दशीचतुर्थ्यामित्यादिवाक्यान्यध्याहारेण ३१

योजयंति। चंद्रदर्शनस्यक्वाचित्कीदूषणतामन्यंतइतिविवेकः। चंद्रप्रतियोगिकनिविडन्वया

वच्छिन्नसमयप्रत्यासन्नतयापराह्णायाअपितिथेरुपोष्यत्वमितिहरिस्वामिनः। केचित्तु। संशयस्थले

उत्तरायाएवोपोष्यत्वं। उत्तरामुपवसेदनिर्ज्ञायेतिश्रवणादित्याहुः। मध्याह्नात्प्रागपिपर्वप्र

तिपत्सं धौसा पौर्णमास्युपोष्येति वाजसनेयिनः॥ तदुक्तं। आवर्त्तनादधः संधिर्यद्यद्वाध्यायतद्दिने॥
परेद्युरिष्टिरित्याहुर्विप्रा वाजसनेयिनः॥ तथा॥ संधिश्चेत्संगवादूर्ध्वमर्वागावर्त्तनाद्भवेत्। सा
पौर्णमासी विज्ञेया सद्यस्कालविधौ तिथिरिति। अथ साधारणवाक्यानि पर्वविषये कालादर्शे।
पर्वप्रतिपदोः संधिर्मध्याह्ने पर्वतोपि वा। अन्वाधानं पर्वदिने तद्दिने याग इष्यते। परतश्चेत्परस्त्वे
ष्टिस्त्वाद्दिने त्वाहितिर्भवेत्॥ गोभिलः॥ आवर्त्तने यदा संधिः पर्वप्रतिपदोर्भवेत्। तदहर्याग इष्ये
त परतश्चेत्परेहनि। पर्वप्रतिपदोः संधिरर्वागावर्त्तनाद्यदि। तस्मिन्नहनि यष्टव्यं पूर्वेद्युः स्यादुप
क्रमः॥ लौगाक्षिः॥ पूर्वाह्णे वाथ मध्याह्ने यदि पर्व समाप्यते। उपोष्य तत्र पूर्वेद्युस्तदहर्याग इष्य
ते॥ गोभिलः॥ आवर्त्तनात्परः संधिर्यदि तस्मिन्नुपक्रमः। परेद्युरिष्टिरित्येष पर्वद्वयविनिर्णयः
॥ लौगाक्षिरपि॥ अपराह्णे प्रवासायं यदि पर्व समाप्यते। उपोष्य तस्मिन्नहनि श्वोभूते याग इष्य
ते॥ अपराह्णेथवा रात्राविति कश्चित्पाठः॥ एतावत्पर्वद्वयसाधारणं। तथा। संकृष्टे च विकृष्टे च य
ष्टव्यं षोडशेहनि। पंचदशेपि यष्टव्यं दिननाशो यदा भवेदिति॥ पर्वावसानज्ञानोपायः॥ लौगाक्षिः॥

गृहता तिथेः परस्याः घटिकास्तु यास्युर्न्यूनास्तथैवाप्यधिकाश्च तासां। अर्द्धं प्रयोज्यं च तया वियोज्यं ह्रासे
वृद्धौ प्रथमे दिने तदिति॥ कात्यायनः॥ परेह्नि घटिकान्यूनास्तथैवाप्यधिकाश्च याः। द्विस्यात्तद
र्द्धं सर्वस्मिन् ह्रासवृद्धी प्रकल्पयेदिति॥ अथ यागकालः॥ याज्ञवल्क्यः॥ पंचदश्याः परः पादः
३८ पश्चादेः प्रथमास्त्रयः। कालः पार्वणयागे स्यादन्यथा तु न विद्यते इति॥ वृद्धशातातपः॥ पर्वणोय
श्चतुर्थोंशो आद्याः प्रतिपदस्त्रयः। यागकालः स विज्ञेयः प्रातर्युक्तो मनीषिभिरिति। तथा। चतुर्थः
38 पर्वणो योंशो येंशाः प्रतिपदस्त्रयः। आद्यास्तस्याश्चतुर्थोपि यागकालस्तदाहृत इति। संधिर्यद्यप
राह्ने स्याद्यागं प्रातः परेहनि। कुर्वाणः प्रतिपद्भागे चतुर्थेपि न दुष्यतीति। निषेधोपि। न षष्ठं च ३८
तुर्थेन्द्रो यागेः प्रतिपदः क्वचित्। रक्षांसि तद्धि लुंपंति श्रुतिरेषा सनातनीति। उक्त एव न्यायोत्रानु
सर्त्तव्यो। न्यथा वस्तुनो द्वैरूप्यापत्तेः। विधिनिषेधास्याम् अतिरात्रे षोडशीवत्तादि विकल्पः। वि
षयलेदोपपत्तौ तस्यान्याय्यत्वात्। पौर्णमास्यां लाघ्यार्थसंग्रहकारः। अपराह्ने ध्रुवा रात्रौ य
दि पर्वसमाप्यते। उपोष्यात्तत्र राकास्यात्सा पूर्णेत्सर्पिलक्षणा। सर्वाह्ने वा यम ध्याह्ने यदि पर्व

समाप्यते। उपोष्यात्रमतिस्तत्र साधुः स्मृतिलक्षणं॥ अथामावास्यायां विशेषः॥ यदा चतुर्दशी
यामं तुरीयमनुपूरयेत्। अमावास्या क्षीयमाणा तदैव श्राद्धमिष्यते॥ यज्ञपार्श्वः॥ अर्द्धचतुर्दशीय
त्र परे पंचदशी भवेत्। चतुर्दश्यवसाने तु पितृयज्ञं तु कारयेत्॥ हारीतः॥ यस्यां संध्यागतः सोमो
मृणालमिव दृश्यते। अपराह्णे तु यस्यां स्यात् पिंडदानं करणं स्मृतं। यदैवैषन पुरस्तान्न पश्चाद्ददृशे
थेत्योददातीति श्रुतिः॥ चंद्रक्षयकालः॥ अष्टमेंशे चतुर्दश्याः क्षीणो भवति चंद्रमाः। अमावास्या
ष्टमेंशे च पुनः किल भवेदणुः। यच्चोक्तं दृश्यमानेपि तच्चतुर्दश्यपेक्षया। अमावास्यां प्रतीक्षेत
तदंते वापि निर्वपेदिति॥ वृद्धवसिष्ठः॥ इंदोर्निरुक्ते हविषि पुरस्तादुदिते विधौ। यद्येवमेवं कुर्वीत त
स्मिन्पश्चादपि हि तद्भवेदिति॥ तथा॥ त्रिमुहूर्त्ता द्वितीया चेत् प्रतिपद्यापराह्णिकी। अन्वाधानं चतुर्द
श्यां परतः सोमदर्शनादिति। तथा॥ पंचमी यत्र संपूर्णा द्वितीया क्षयगामिनी। चरुरिष्टिरमावास्यां
भूते कव्यादिकी क्रियेति। तथा॥ चतुर्दशी चतुर्यामे अमा यत्र न दृश्यते। श्वो भूते प्रतिपद्यत्र भूते
व्यादिकी क्रियेति। तथा॥ यज्ञकालस्थितिर्देवे षड्लोपयदि लभ्यते। पर्वत्तत्रोत्तरं कार्यं हि॥ नेष्ट

गृह्य° वस्तुपक्षमेदिति। तथा॥ पर्वणोऽयेत्तती येपि कर्त्तव्येष्टिर्द्विजातिभिः। इति यासहितं यस्मादृक्षय
त्याश्वलायनः। पर्वणि यद्यद्वष्टिपक्षादिकरणे पितृत्समापनं प्रतिपदि प्रविष्टायामेव कर्त्तव्यं।
॥ कालनिर्णयदीपिकायां॥ पर्वणि त्वपि यज्ञौ तत्प्ररणं पक्षताविति। अन्यथा त्वेतु। प्रतिपद्य
३९ प्रविष्टायां यदिष्टिः समाप्यते। पुनः प्रणयक्षेष्टिः कर्त्तव्या साग्निकैर्द्विजैरिति। वृद्धौ तु।
वर्द्धमानाममावास्यां लक्ष्ये चेदपरेहनि। यामांस्त्रीनधिका चापि पितृयज्ञस्ततो लवेदिति॥ ॥
39 इति पर्वनिर्णयः॥ ॥ अत्र सर्वपौर्णमासी मुत्तरां वेत्यत्र कात्यायनोक्तौ उपपूर्वस्य वसतेर्थ
स्यवसतेराधारस्य कर्म्मत्वात् इति योपपत्तिः। उत्तरोपवासपक्षा अयणे तु भुक्त्वा शनसायाश ३९
नाग्न्यगारभोजनानां रागप्राप्तानां सर्वदेवाशितमनशितं तदश्नीयादारण्यमेवाश्नीयाद् धः श
यीतेत्यादिना नियमनात्प्रकृते च तदलावान्नेषां बाधः। सर्वोपवासपक्षा अयणे पुनर्यथा चांद्रा
यणमुपवसेदित्यत्र शास्त्रापरिगृहीतनियमवतः परिमाणविशेषावच्छिन्नद्रव्याशनमुपपू
र्वस्य वसतेरर्थः। तथा प्रकृतेपि मेथुनमांसादिवर्जनियुक्तस्य गृहीताग्नेः सत्यवदनव्रतादे

दुण्याय व्रत्याशनं लिङ्गर्थः॥ पुलस्त्यः॥ सकृत्पर्वणि सर्पिष्मद्धविष्यं लघु भोजनं। नसायं नो
पवासः स्यात्तैलामिषविवर्जितं॥ कात्यायनोपि॥ अपराह्णे व्रतोपायनीयमश्नीतः सर्पिषाभ्युहि
तो। अभ्युहितावत्सौक्रिया विशेषणमेतत्। एतच्च पौर्णमास्यामेव न त्वमावास्यायां। सवैपौर्ण
मासेनोपवत्स्यन्नसत्राभ्युहितइवस्यादिति शतपथे श्रुतत्वात्। तच्च देवेभ्यो यन्न दातव्यं। स य
देवाशितमित्या द्युपक्रम्यायस्य वैहविर्नगृह्णंतितदश्नीयादिति श्रुतत्वात्। घृतोपसिक्तमभ्य
क्तं भुज्यंत इति संप्रदायः॥ व्रत्याहवर्ज्यमाह कात्यायनः॥ शाकं मांसं मसूरं च चणकं कोरदू
षकान्। माषान्मधुपरान्नं च वर्जयेदौपवस्थके। लवणं मधु मांसं च क्षारांशो येन हूयते। उप
वासेन भुंजीत न च रात्रौ न किंचनेति। तथा। तिलमुद्गादृते शैव्यं सस्येगोधूमकोद्रवौ। चीनकं
देवधान्यं च सर्वशाकं तथैव च। सद्गी क्षारं यव क्षारं टंकणं क्षारमेव च। व्रतस्थो वर्जयेन्नित्यं
सामुद्रं लवणं तथेति। सामुद्रलवणस्य प्रतिषिद्धत्वात्सैन्धवादेरुपादानं केचिदिच्छंति। एतच्च
व्रत्याशनं वपनप्रपञ्चेव पनांतरं। मांसमेघ्नेनेसंकल्प सर्वं परित्यज्य केशश्मश्रु लापयित्वा

र.ह्यस्र.
भुंजीतव्रत्यं। अहनिमावास्यायांसमैथुनेवर्जयेत्केशश्मश्रुवपनेवा। शिखमपराह्णे। ततोपायनीयम
श्नीत इतिक्रमस्यदृष्टत्वात्। केचित्तुवपनस्यावश्यकतामाहुः। तदनंतरं सत्यवदन संकल्पं
कृत्वारात्रावधः शयनं अग्निसमीपेयजमानस्य॥ ॥एतावद्व्रत्याह कृत्यं॥ ॥अमावास्यायेद
५० नाहिताग्नेरप्येष इत्युक्तत्वाद्वैश्वदेवानंतरमपराह्णे पिंडपितृयज्ञः॥ तत्रविधिः॥॥ सव्येनप
रिस्तरणं॥ होमस्यदैवत्वात्। ततोपसव्यकरणं। नीविकरणं। अग्नेरुत्तरतो परेणवादक्षिण
याणांपात्राणामासादनं। स्फ्यः सूर्पं। अग्निहोत्रहवणी वा। चरुस्थाली व्रीहयः कृष्णाजिनं।
उलूखलं। मुसलं। त्र्यपणार्थमुदकं आज्यं। मेक्षणं तिस्रः समिधः उदपात्रमवनेजनाद्यर्थं। ५०
सकृदाछिन्नानिसूत्राणि ऊर्णादशावावयस्युत्तरेयजमानलोमानिवा। ततोग्नेः प्रतीच्यां स्फ्यो
पहितमोषधिकरणं। अत्रसर्वप्राचीनावीतिना दक्षिणामुखेन कर्त्तव्यं। पितृन्ध्यात्वा सूर्पा
ग्निहोत्रहवण्यंपात्पितृतीर्थेन मुष्टिचतुष्टयग्रहणं। अथवास्थाल्यामेतद्ग्रहणं नाग्निहोत्रहवण्यां।
अस्मिन्पक्षे अग्निहोत्रहवणीं नासादयेत्। ततोग्नेः परेणासादनं। अग्नेरुत्तरतः कृष्णाजि

नास्तरणं। उदग्रीवमुत्तरलोमं। सव्याकृन्येनोल्लूखलनिधानं। व्रीहीनोप्यमुसलमादाय
दक्षिणालिमुखस्यातिष्ठतः पितृतीर्थेनाविसुषीलावंकंडनं। ततः शूर्पेन्योप्यनिः ष्पूयन्तुषा
न्दृष्यकृत्वापुनः कंडनं। सकृत्फलीकरणंस्थाल्यांतंडुलप्रक्षेपः। सकृत्प्रक्षालनंद्वितीयो
दकेनाधिश्रयणं। श्रपणंश्रपयित्वालिखेर्योर्द्वास्याग्नेः पश्चिमतआसादनं। तिष्ठत्समित्र
यमन्वावधायोपतिष्ठपसव्यंकृत्वाग्नेर्लुणेनहोमः तत्रमंत्रः॥ अग्नयेकव्यवाहनायस्वाहा।
इदमग्नयेकव्यवाहनाय। सोमायपितृमतेस्वाहा। इदंसोमायपितृमते। ततोमेक्षणौल्लूणे
नोप्रक्षिप्यापसव्यंकृत्वाग्नेर्दक्षिणतः पश्चाद्वास्फ्येनदक्षिणाग्रांरेखामपहताइत्युल्लिखे
त्॥ उदकस्पर्शः॥ उल्मुकंपरस्तात्करोतियेरूपाणीति। उदपात्रमादायसव्यंजान्वाच्यरेखा
मूलमध्याग्रेष्वपित्रादित्रितयायावनेजनंदद्यात्। अमुकसगोत्रपितः अमुकशर्मन्नव
नेनिक्ष्वेतिपित्रे। एवंपितामहप्रपितामहयोः। ततउपमूलंसकृदाच्छिन्नानिलेखायांकृत्वा
यथावनिक्तंपिंडदानं। अमुकसगोत्रपितः अमुकशर्मन्नेतत्तेइति। एवंपितामहप्रपित।

गृह्य॰सा॰ महयोः। ततउपमूलंसकृ अत्रपितरइत्युक्त्वोदङ्ः। स्यआतमनादावृत्यामीमदंतेतिजपत्यवने
ज्य सर्वचक्नीवीविस्रंस्य नमोवइतिषडंजलीन्कृत्वागृहान्नइतिजपति। एतद्वइत्युपास्यतिसूत्रा
णिप्रतिपिंडमूर्णादशांवावयस्युत्तरेयजमानलोमानिवोर्जमित्युदपात्रस्यापोनिषिंचतिपिं
४१ डसन्निधौ। स्थाल्यांपिंडावधानं। अवघ्राणं। उल्मुकसहकृताच्छिन्नानामग्नौप्रक्षेपः। अध्युक्ते
र्वकृत्वेविशेषः। पितृपदात्सर्वंयजमानस्येति प्रयोगः। यजमानस्यपितरित्येवं। त्यागावघ्रा
णयोरलावः। अन्यत्प्रकृतिवत्। यजमानपत्नीचेत्पुत्रकामातदाधत्तइतिमंत्रेणानवघ्रात
मध्यमंपिंडंप्राश्नयति। जीवपितृकस्यहोमांतोयं। अनारंभोवा। केचित्तुपश्चाद्यंगतांपिंडपि ४१
तृयज्ञस्येच्छंति। तन्न। अनंगहेतोरंगहेतुत्वानुपपत्तेः।। इतिपिंडपितृयज्ञः।। ततःपिंडान्वाह
र्यकंश्राद्धंअग्नौकरणसहितंश्राद्धकल्पोक्तं।। ततःप्रातःस्थालीपाकमित्यादिसौत्रंपद्धादि
कर्म। तत्रप्रथमप्रयोगेपौर्णमास्यांमातृपूजनसर्वकर्माभ्युदयिकं। ततोन्वारंभणीयेष्टिदे
वताकश्चरुः। दर्विहोमेष्वपौर्णमासधर्मातिदेशात्। तत्रब्रह्मासनाद्याज्यभागांतेविशेषः।।

अग्नाविष्णुभ्यां सरस्वत्यै सरस्वते जुष्टं गृह्णामीति ग्रहणे। प्रोक्षणे त्वा शब्दो अधिकः। ततः आज्य
भागानंतरं स्थालीपाकहोमः। अग्नाविष्णुभ्यां स्वाहा। इदमग्नाविष्णुभ्यां। सरस्वत्यै स्वाहा। इदं स
रस्वत्यै। सरस्वते स्वाहा। इदं सरस्वते। अग्नये स्विष्टकृते स्वाहा। इदमग्नये स्विष्टकृते। ततो महा
व्याहृत्यादि ब्राह्मणभोजनांतं। ततो वैश्वदेवः। प्रथमप्रयोगे यं विशेषः पौर्णमास्यां। ततः प्र
तिपदि प्रातः सौत्रं स्थालीपाकं श्रपयित्वेत्यादि पक्षादिकर्म। तत्र वैश्वदेवस्येत्यादि सौत्रहो
मस्य चरुसाध्यत्वात् स्थालीपाकमित्यत्रैकत्वं न विवक्षितमित्याचार्याः। अन्ये तु। स्थालीपाकमि
त्यत्रैकत्वं विवक्षितमेव। वैश्वदेवस्य प्राकृसिद्ध एवासाद्यः। वृषोत्सर्गे पोष्णवदित्याहुः। आचार्य
मते तु पौष्णश्चरुः पक्षसम एवेति ध्येयं। तथा च दक्षिणतो ब्रह्मासनेत्यादि प्रातर्होमानंतरं परि
भाषोक्तविधिना स्थालीपाकौ श्रपयित्वा आज्यभागांतं कुर्यात्॥ तत्र विशेषः॥ आसादने च
रुस्थालीद्वयं। ग्रहणे अग्नये त्वा जुष्टं पौर्णमास्याम त्वा सोमाय त्वा ब्रह्मणे प्रजापतये विश्वेभ्यो देवेभ्यो

गृह्यला॰ द्यावापृथिवीभ्यां जुष्टं गृह्णामि। अग्नये प्रजापतये विश्वेभ्यो देवेभ्यो जुष्टं गृह्णामीति द्वितीयचरो
ग्रहणं। प्रोक्षणं पूर्ववत्। अन्यत्प्रकृतिवदाज्यभागान्तं। तत आज्यभागानंतरं दर्शपौर्णमासदे
४२ वताभ्यो हुत्वा। इंद्रश्चात्र समासः। इंद्रान्ते श्रूयमाणत्वाद्देवतापदस्य प्रत्येकं संबंधः। अग्निर्विष्णु
रिन्द्राग्नी इत्येताः दर्शदेवताः। सान्नाय्ययाजिनस्तु अग्न्यनंतरं विष्णुस्थाने पत्न्यावग्नीषोमौ। इंद्रा
ग्नी इति निषिद्धे इन्द्रः। दर्शे। अग्नये विष्णवे इंद्राग्निभ्यां ब्रह्मण इत्यादिग्रहणादौ प्रयोगः। दी द्वि
तस्य तु अग्नये अग्नीषोमाभ्यामिन्द्राय ब्रह्मणे प्रजापतय इत्यादि प्रयोगः॥ अग्नीरग्नीषोमाव
ग्नीषोमौ एताः पौर्णमासदेवताः। ताभ्यो हुत्वा ब्रह्मण इत्यादि सूत्रोक्तदेवताभ्यो जुहोतीत्यर्थः ४२
होमश्चायं स्थालीपाकेन। तानोर्मयूखाः यदा तरूणामग्राणि स्पृशंति स होमकालः। दर्शपौर्ण
मासदेवताभ्य उदकसंस्थमाहुतित्रयं हुत्वा प्रथमाहुतिसंलग्नमाहुतिचतुष्टयं प्राक् सं
स्थं ब्राह्मण इत्यादिकं जुहुयात्। त्यागस्तु। इदमग्नये। अग्नीषोमाभ्यां॥१॥ इदं ब्रह्मणे। इदं प्र

जापतये। इदंविश्वेभ्योदेवेभ्यः। इदंद्यावापृथिवीभ्यां। दर्शेन्तइदमग्नये। इदंविष्णवे। इदमि
न्द्राग्निभ्यां। दीक्षितस्यतु। इदमग्नये। इदमग्नीषोमाभ्यां। इदमिन्द्राय। ततः ब्रह्मणइत्याद्या
हुतिचतुष्टयं। विश्वेभ्योदेवेभ्योबलिहरणं। ऋतग्रहेभ्यआकाशायचेतिसूत्रं। हरणंदा
नंतच्चैवं। चरोरुत्तरतः प्राक्संस्थमुदक्संस्थंवाविश्वेभ्योदेवेभ्योनमः इदंविश्वेभ्योदेवेभ्यः।
ऋतग्रहेभ्योनमः। इदंऋतग्रहेभ्यः। आकाशायनमः। इदमाकाशाय। समुच्चयार्थस्तु
कारः। वैश्वदेवस्याग्नौजुहोत्यग्नयेस्वाहा। प्रजापतयेस्वाहा। विश्वेभ्योदेवेभ्यःस्वाहा। अग्नये
स्विष्टकृतेस्वाहेति। द्वितीयाहुतिसंलग्नाः प्राक्संस्थाःस्रुवः। उत्तयोरुत्तरांशाद्गृहीत्वो
त्तरार्द्धेस्विष्टकृद्धोमः। होमत्वप्रतिपत्तयेःस्विपदं। प्रयोगःसर्ववत्। वाह्यतःश्रीबलिं
हरतिनमःश्रियै। नमःपुंसेवयसेनमः। शुक्लायकृष्णदंताय पापीनांपतयेनमोयेमेप्र
जासूपलोलयंतिग्रामेवसंतउतवारएयेतेभ्योनमोस्तुबलिमेभ्योहरामिस्वस्तिमेस्तुप्रजां
मेददत्विति सूत्रं। अग्न्यगाराद्बाह्यतः श्रादिभ्योबलिः श्रीबलिः। जात्यारव्याया मेक

गृह्य

वचनं। हरति। ददाति। नमः पदांता: पंचमंत्रा इत्येके। चत्वार इत्यन्ये। तन्मते आद्यास्यां हो
म्यामेकः। नमः स्थाने इदं पदं। ह्याहारेण त्यागाः। श्रौंचुदं विकर्माणी ति कात्यायनोक्तेः। प्र
क्तं स्थता उदकं स्थता वा ध्येया। शेषमद्भिः प्रह्लाव्य। ततो ब्राह्मणभोजनं। ततः शेष
४२ समाप्त्यनंतरं। कर्मापवर्गे ब्राह्मणस्य भोजनमित्यर्थः। शेषसमाप्तिश्चैवं। महाव्याहृ
त्यादि प्राजापत्यांतानवाङ्कृतयः। ततः संस्रवप्राशनं। मार्जनं च। पवित्रप्रतिपत्तिः। ब्रह्म
43 णे पूर्णपात्रदानं। सर्वप्रायश्चित्तहोमः। बर्हिर्होमः। प्रणीताविमोकः। कर्मापवर्गसमित्प्र
क्षेपः। उत्सर्जनं ब्रह्मणः। उपयमनकुशस्याग्नौ प्रक्षेपः। ब्राह्मणभोजनमिति तदनंतरं वै ४२
श्वदेवः। द्वितीयचरुणा। आद्यस्याप्युतत्वात्॥ प्रवृत्तियोग्यानि कर्माणि लिख्यंते। सायं
प्रातर्होमः॥ पंचमहायज्ञाः। पश्वादिहूयं। पिंडपितृयज्ञः। अनंतरं पिंडान्वाहार्यकं श्राद्धं॥
श्राद्धकल्पविधानेन। आग्रयणहूयं। अष्टकाश्चतस्रः। उपाकर्म। उत्सर्गश्च। एतानि याव
ज्जीवंच था कालमावृत्याकर्तव्यानि। श्रवणाकर्मादेः सकृदेव प्रयोगः। तेषामप्यावर्त्त

नमित्यन्ये ॥ ॥द्वादशी कंडिका ॥ १२ ॥ ॥भार्या चेद्गर्भं न धारयेत्तत्रोपायमाह । सा यदि गर्भं न
दधीत । सा भार्या चेद्गर्भं न धारयेत् । सि० ॥ श्वेतकण्टकार्या उपोष्य पुष्येण मूलमुत्थाप्य चतु
र्थेऽहनि स्नातायां निशायामुदपेषं पिष्ट्वा दक्षिणस्यां नासिकायामासिंचति । सूत्रं । सि० ॥ श्वेत
कंटकारिकायाः लोकप्रसिद्धायाः । उपोष्य पुष्यचन्द्रमसोर्योगात्पूर्वदिने उपवासं कृत्वा
पुष्येण पुष्यनक्षत्रयुक्तेऽस्मिन्दिने तस्मिन्नात्माभीष्टदेवतां स्मृत्वा पुत्रकामः प्राङ्मुख उपविश्य
तस्याः मूलमु[त्था]प्य स्वगृहे समानीय रक्षयेत् । ततः रजोदर्शनानंतरं चतुर्थेऽहनि स्नातायां
भार्यायां रात्रौ उदपेषं यथा भवति तथा पिष्ट्वा तस्याः मूलं उदकेन द्रवीभूतमापाद्य भार्या
याः दक्षिणे नासारंध्रे क्षारयति । सूत्रं ॥ तत्र मंत्रमाह । इयमोषधी त्रायमाणा सहमाना स
रस्वती । अस्या अहं बृहत्याः पुत्रः पितुरिव नाम जग्रभमिति । न त्वपिं[डा]र्थानसा धनावरुद्धे
एतत्स[र्व]धनाद्व्ययोर्विकल्पमं[त्रा]श्च । व्रीहियवयोरिव । तथा चोलयस्य कथं शास्त्रार्थतेतिवा
च्यं । उद्देशपतयास्वर्गो वदेतत्कृत्यसाध्यत्वात् क्रियाभेदाच्च । अत एव पुत्रोत्पत्तिं प्रति बंध

गृ॰ सू॰ कदुरितनिवृत्तिरेवकारीरीवदेतत्क्रियासाध्या॥ अतएवप्रचितदुरितशंकयाहरिवंशश्र
वणादेरपिहेतुत्वमिति। नचैकक्रियाजन्यात्सर्वस्यैवविहितप्रधानजन्यात्सर्वतयाफल
संपादकाशेषसामग्रीसंपादकतयाफलावश्यंभावेनेतरावैयर्थ्यमितिवाच्यं। अप्रचितदु
४४ रितस्थलीयप्रज्वलनात्तस्यतत्त्वेपिप्रचुरतरदुरितस्थलीयप्रज्वलनात्स्वतंत्रक्रिया
कदंतकस्यहेतुत्वादिति॥॥ त्रयोदशीकंडिका॥ १३॥ ॥एवंचगर्भेजातेइदानींतत्संस्कार
कंकर्माह॥ अथपुंसवनं॥ उच्यतइतिशेषः॥ केचित्तुगर्भिण्याएवसंस्कारकंपुंसवनमि
त्याहुः॥ पुरास्पंदनइति। गर्भचलनात्पूर्वमित्यर्थः। नविष्यदर्थेवर्त्तमानताप्रयोगः। च ४४
लनप्राक्कस्यानियतत्वादिदानींनियतंसमयमाह। मासेद्वितीयेतृतीयेवायदहःपुंसा
नक्षत्रेणचंद्रमायुज्येत। गर्भोत्पत्त्यवधिकंमासनि छद्वितीयत्वादि। पुरुषनक्षत्रंपुष्यादि।
चलनंतुसप्तमे॥ तथाचयाज्ञः॥ सप्तमेचलनसमयेस्तिवति। अतएवतत्स्पंदनमनु
गतं। ज्योतिःशास्त्रोक्तंशुक्लपक्षादिकमपिग्राह्यं। तदहरुपवास्याप्लाव्याहतेवाससी

परिधाप्य। उपवासस्याहोरात्रसाध्यत्वात्तदुत्तरत्वेऽभ्यासानेप्रतीयमानत्वात्सर्वेद्युरुपोषणं। ततः पुरुषोऽनुपरक्तवंशाधिकरणाङ्गिर्वैश्वदेवमन्त्रकं मातृश्राद्धं कृत्वा उपोषितां तां जायां स्त्रा
त्वा व्याहृते वाससी परिधाप्येत्यर्थः। न्यग्रोधावरोहाकुङ्गांश्च निशायामुदपेषं पिष्ट्वा सर्वव
द सेचनं। न्यग्रोधो वटः। अधोरोहन्तीत्यवरोहाः। प्ररोहास्तत्सुरूपश्च समासः। तान्। सर्वमदिति
गर्भाधानप्रतिबन्धकापनयोऽर्को विधिरपि दिश्यते। तेन वटावरोहान् शुङ्गान् वटपल्ल
वाग्राणि स्त्र्यङ्गाणि। तदुलयं च कारार्थः। निशायामुदपेषं पिष्ट्वा दक्षिणस्यां नासिकायामा
सिंचतीत्यर्थः॥ आसेचने मन्त्रावाह॥ हिरण्यगर्भोऽद्भ्यः संभृत इत्येतास्यां॥ कुशकंटकं सो
मांशुं चैके। अवरोहपल्लवैः सहैतयोरपि पेषणमिच्छन्त्येक इत्यर्थः। वीर्यवत्पुत्रकामि
कार्यमाह। कूर्मपित्तं चोपस्थे कृत्वा स यदि कामयेत वीर्यवान्स्यादिति विकृत्येन मति मं
त्रयते सुपर्णोसीति प्राग्विष्णुक्रमेभ्यः॥ कूर्मपृष्ठनिर्मितं पात्रं कूर्मपित्तं। उदकपूर्णं
शरावमित्यन्ये। स लत्त्वं यदि कामयेत अयं गर्भः शक्तिमान्स्यात्। तदा नार्यायाः उत्सं

गृह्यसू॰ गेहकर्म्मपि च्चुं निधाय विकृतिं छंदस्क याखुपर्णे सीत्यनया आविद्य मेस्यः स्र ःपतेत्यंतयाउ
दरस्थं गर्भं अभिमंत्रयते। सगर्भमुदरं विलोक्य पठतीत्यर्थः॥ ॥ चतुर्दशी कंडिका॥ १४॥ ॥
अथ सीमंतोन्नयनं पुंसवनवत्॥ अथ पुंसवनानंतरं॥ सीमंतोन्नयनमिति कर्म्मनाम
४५ धेयं॥ पुंसवनवदित्यनेन पुंनक्षत्रातिदेशः॥ प्रथमगर्भे मासे षष्ठे अष्टमे वा। गर्भान्तरे सीमं
तोन्नयननिवृत्त्यर्थं प्रथमपदं। आद्ये गर्भे नियमः। गर्भान्तरे अनियम इति केचिद्व्याख्याताः॥
45 तिलमुद्गमिश्रं स्थालीपाकं श्रपयित्वा प्रजापतेर्हुत्वा। वैश्वदेव सर्वमात्रश्चाहुत्वा
भार्यायाः स्नानं च भर्तुः परिधानं च। ततो भर्त्ता अनुलिप्त उद्धृतावोक्षिते लौकिकाग्निं स्थाप ४५
येत् बहिःशालायां। ततो दक्षिणतो ब्रह्मासनमित्यादि वारस्यति ले मुद्गैर्मिश्रं स्थालीपाकं
ओदनं चरुं आज्यभागांतं परिभाषाशास्त्रविधिना संपाद्य स्थालीपाकेन प्रजापतेर्हुत्वे
त्यर्थः। तत्र विशेषः। पात्रासादने तं डुलानंतरं तिलमुद्गासादनं। युग्मफलसंवद्धमौदुंब
रं कार्यं। गोमयनिर्म्मितं। भद्रपीठं चतुरस्रं। दर्भं आचितं पीठं वा। दर्भपिंजुलत्रयं।

त्र्यएणी शल्लली। वीरतरः शंकुः। आयसः खादिरो वा सुवर्णचात्रं। वीणाद्वयं गाथिनश्च। तिलमु
द्गमिश्रितं तंडुलग्रहणं। प्रजापतये त्वा जुष्टं गृह्णामि। एतत्वाभाद्वो अधिकः। आज्यभागांतं प्र
कृतिवत्। ततः स्थालीपाकेन प्रजापते इं त्वाइदं प्रजं। पतयइति त्यागं विदध्यात्। पश्चादग्ने
रुपविष्टायां युग्मेन सटालुग्रप्सेनोदुंबरेण त्रिलिश्च दर्भपिंजुलैश्चैणपाशल्ल्या वीर
तरशंकुना सुवर्णचात्रेण सीमंतमूर्ध्वं विनयति भूर्भुवः स्वरिति प्रतिमहाव्याहृतिलिकी। अग्नेः प
श्चादुत्तरदक्षिणतः स्व ह्यासने आसीनायां ह्यादिफलवता अनापाकफलश्रोमवता उदुंबर वृ
क्षोद्भवेन त्रिलिर्दर्भलत्रिणैकचकारः समुच्चयार्थः। ऐणपाशल्ल्या वीरतरशंकुना खादिरेण आ
यसेन वा। सुवर्णस्त्रिणैण चात्रेण कर्तनसाधनविशेषेण सीमंतमूर्ध्वं विनयति। ललाटमारभ्य
शिरः प्रदेशं यावत्। भूर्भुवः स्वर्विनयामीत्येवं। भूर्विनयामि भुवर्विनयामि स्वर्विनयामीत्येवं
प्रतिमहाव्याहृतिलिकी। विहृतमात्र प्रातरन्यस्य जीवतोवत्स जीवफलिनी तवेति। पादांगु
छमारभ्य ललाटांतमितं सूत्रं त्रिविहृतं। नवैवेति वृद्धिति कृतत्वान्न वहृतं गुंफितानेकोडुंब

रफलं हारा कृति नाव भाति। यथा नातिमतिक्रामति तथा कं गेह्नि पतीत्यर्थः। मंत्रमाह। अय
गृह्य.सा. मूर्जावत इति। इतिशब्दः मंत्रसमाप्तिद्योतकः। अथ वाहवीणागाथिनौ राजानं संगायेतां
योवाप्यन्यो वीरतर इति। ततस्तौ यथाप्रोक्तं गानं कुरुतः अपिः समुच्चये। नियुक्तामप्येके
४६ गाथामुपोदाहरंति एके आचार्याः नियुक्तां गर्भसंस्कारकसीमंतकालीनगाने विहितां मं
त्रं उपोदाहरंति तत्गानमिच्छंति। पूर्वत्रोक्तगानसमुच्चयार्थो अपिः। विकल्पो वा। अभिल
षितगानगोचरां गाथामाह। सोम एव नो राजेत्यादि तीरे तुभ्यमित्यंतं। असाविति यां नदी
मुपावसिता भवति तस्या नाम गृह्णाति। प्रथमांतं असाविति। गंगे यमुने नर्मदे इत्येवं यस्याः ४९
नद्याः समीपे गर्भिणी स्थिता भवति तस्याः नाम गर्भिण्येवं उच्चारयतीत्यर्थः। ततो ब्राह्मण
भोजनं। स्विष्टकृद्धोमादि ब्राह्मणभोजनांतं। ब्राह्मणश्चात्र गर्भिण्याः संस्कार्यत्वात् प्रति
गर्भसीमंतोन्नयनं। गर्भस्यैव संस्कार्यत्वात् प्रतिगर्भमित्यप्यन्ये॥ पंचदशी कंडिका॥ १५॥
सोष्यंतीमद्भिरभ्युक्षत्येजतु दशमास्य इत्याप्रागयस्यैतस्मात्। सोष्यंती प्रसववेलवतीं जलेन

गर्भ२

जातमात्रे पुत्रे तस्य मुखं निरीक्ष्य स्नात्वाचम्य देशकालौ स्मृत्वा मम अस्य कुमारस्य गर्भाम्बुपानजनि
तसकलदोषनिर्हरणायुर्मेधाभिवृद्धिबीजगर्भसमुद्भवैनोनिबर्हणद्वारा जातकर्म करिष्ये। इति संकल्पः।
तत्र निर्विघ्नार्थं गणपतिपूजनं। स्वस्तिपुण्याहवाचनं। मातृकापूजनं। वस्तोर्धारा नांदीश्राद्धं हिरण्येन विधाय।
मंत्रमाह। एजतु दशमास्य इति। परादिना सर्वं तिद्इति। परिशिष्टायायां अद्यत्रेराह आगत्यस्यैतद्इति
जरायुणा सह त्वं तेनेत्यर्थः॥ अथावरापतनं गर्भनिर्गमक्रिया हेत्वर्थं स्मारकं मंत्रं पठतीत्य
र्थः। तमेव स्मारयति मंत्रं अवैतु पृश्नि शेवलं शुने जराय्वत्तवे नैव मांसेन पीवरीं न क
स्मिंश्चनायतमव जरायु पद्यतामिति। जातस्य कुमारस्याच्छिन्नायां नाड्यां मेधाजननायुष्ये
करोति। तत उत्पन्नस्य पुत्रस्य अछिन्ने नाडे। मंगलोदकेन स्नात्वा अहते वाससी परिधाय दे
वदेववर्जं विसोर्द्धारा मातृपूजन सहितं नांदीमुखं हिरण्यश्राद्धं कृत्वा। मेधाजननं च आयु
ष्यं चते करोतीत्यर्थः। तत्रादौ कुमारदक्षिणे श्रवणे वागिति त्रिः पठित्वा वेदोसीति गुह्यं ना
म कृत्वा मेधाजननायुष्ययोराद्यं मेधाजननं करोति। सूत्रयति च सूत्रकृत्। अनामिकया
सुवर्णांतर्हितया मधुघृते प्राशयति घृतं वा भूस्त्वयि दधामि भुवस्त्वयि दधामि स्वस्त्वयि दधामि
भूर्भुवः स्वः सर्वं त्वयि दधामीति॥ सुवर्णान्वितोपकनिष्ठया मधुघृते मिश्रिते केवलं घृतं वा
भूस्त्वयि दधामीत्यादिभिश्चतुर्भिर्मंत्रैः प्रतिमंत्रं कुमारं प्राशयति कुमारस्य जिह्वायां निमार्ष्टि

वा५

यत्नु इति शब्देन मंत्रावसानद्व्यं स्थेयुत्वणामिप्येकमंत्रतेति। तन्न। इन्थि ब्वाब्ध्वानालौसादयामीत्य

गृह्य दित्याउपस्थइत्यादावनेकेतिका रैरनेकमंत्रतापपत्तेः। मित्रविन्दास्त्रे चाग्निरन्नादइत्या

दिमंत्रेष्विति शब्दास्तावान्मंत्रैकापत्तेः नच स्वाहाकारएवात्र मंत्रांत बोधयतीति मं वाच्यं। अ

४१ ग्निरायुष्मानित्याद्यायुष्यकरणमंत्राणामैकापत्ते श्चेति न किंचिदेतत्। अथास्यायुष्यं क

रोति नाभ्यां दक्षिणे कर्णे वा जपति। आयुषोहितं आयुष्यं। मेधाजननानंतरं अस्य कुमारस्य

करोति। कथमित्यत आह। नाभ्यामिति। सप्तम्यर्थो विषयत्वं। नाभि विषयकमालंभं कृ

त्वा जपतीत्यन्वयः। दक्षिणे वा कर्णे। दक्षिणकर्णशष्कुल्यवच्छिन्ननभसि समवेतो मंत्ररूप ४१

शब्दो नां कर्मणाभिव्यक्तिं करोतीत्यर्थः। आयुष्यहेत्वर्थस्मृतिहेतन्मूत्रयति स्म कृन्मंत्रान्।

अग्निरायुष्मान्स वनस्पतीभिरायुष्मांस्तेनत्वायुषायुष्मंतं करोमि सोम आयुष्मान्सोषधीभि

रायुष्मांस्तेनत्वायुषायुष्मंतं करोमि ब्रह्मायुष्मत्तद्ब्राह्मणैरायुष्मत्तेनत्वायुषायुष्मंतंक

रोमि। देवा आयुष्मंतस्तेमृतेनायुष्मंतस्तेनत्वायुषायुष्मंतं करोमि ऋषय आयुष्मंतस्ते व्रते

रायुष्मंतस्तेनत्वायुषायुष्मंतंकरोमि पितर आयुष्मंतस्ते स्वधाभिरायुष्मंतस्तेनत्वायुषायु
ष्मंतंकरोमि यज्ञ आयुष्मान्सदक्षिणाभिरायुष्मांस्तेनत्वायुषायुष्मंतंकरोमि समुद्र आयुष्मा
न्संस्रवंतीभिरायुष्मांस्तेनत्वायुषायुष्मंतंकरोमीति त्रिः सर्वेष्वेतानष्टौ मंत्रान् कुमारस्यदक्षि
णकर्णेजपेत् वारत्रयं। आयुषमिति च। आयुषं जमदग्नेरित्यमुमपि मंत्रं त्रिर्जपति। सर्वस्यत्र
स्यात्रिः पदानु कर्षक आकारः। सयदिकामयेतसर्वमायुरियादिति वात्सप्रेणैनमभिमृशेत्।
सयदि पिताइच्छेत् अयंकुमारः समग्रंसुखजीवनं लभतां तदा लालंदनेन वात्सप्रेणहष्टानु
वाकेनतंकुमारंस्पृशेत्। सर्वोक्तं अनुवाकमेवाह। दिवस्परीत्येतस्यानुवाकस्योत्तमामृचं
१।८ परिनाष्टि। अयंचानुवाको द्वादशर्चः। तस्योत्तमी अंत्यां असावग्निरिति नाम्नी परिशिनष्टि वु
दस्यति। तांबुदस्यैकादशभिरभिमृशेदित्यर्थः। प्रतिदिशंपंच ब्राह्मणानवस्थाप्य ब्रूयादिम
मनु प्राणितेति। स्वेष्टियात्प्राणेति व्यानेति दक्षिणोपानेत्यपर उदानेत्युत्तरः समानेति पंच
म उपरिष्टादवेक्षमाणे ब्रूयात्स्वयंवाकुर्यादनु। परिक्राममविद्यमानदेशे प्रसयस्मिन्देशे

जातोलवतितमसिमंत्रयते वेदते भूमिहृदयं दिवि चंद्रमसि श्रितं। वेदाहं तन्मां तद्विद्यात्पश्ये
[illegible] म शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतमित्यथैनमभिमृशत्यश्मा भव
परशुर्भव हिरण्यमस्तृतं भव। आत्मा वै पुत्रनामासि संजीव शरदः शतमित्यथास्य मातरमभि
मंत्रयते इडासि मैत्रावरुणी वीरे वीरमजीजनथाः। सा त्वं वीरवती भव यास्मान्वीरवतो दति
चतुःस्त्री निगद व्याख्याता। ब्राह्मणान्कुमाराभिमुखान्। ब्राह्मणालावेच्छस्यकर्तव्येच्छ।
कमणं। प्रैषभावश्चेतिग्रन्थस्य सुगमं। अथास्यै दक्षिणं स्तनं प्रक्षाल्य प्रयच्छतीमं स्तनमि-
ति यस्ते स्तन इत्युत्तरमेताभ्यां। कुमारमातुरभिमंत्रणानंतरं अस्याः मातुः दक्षिणं स्तनं प्रक्षाल
यित्वा कुमाराय ददाति कुमारस्य मुखे प्रवेशयति। इमं स्तनमिति मंत्रेण। उत्तरं वामं स्तनं प्र
क्षाल्य प्रयच्छति यस्ते स्तन इमं स्तनमित्येताभ्यां मंत्राभ्यां। उदपात्रं शिरस्तो निदधाति। जलपूर्
णं पात्रं अधिरवट्टं कुमारशिरःप्रदेशे धस्रा इमो निदधाति। तत्र मंत्रमाह। आपो देवेषु जा ४८
ग्रथ यथा देवेषु जाग्रथ। एवमस्यां सूतिकायां सपुत्रिकायां जाग्रथेत्यनेन मंत्रेण। द्वा

रदेशेसूतिकाग्निमुपसमाधायोत्थानात्संधिवेलयोः फूलीकरणमिश्रात्सर्षपानग्नावावपति।
सूतिकागृहस्य द्वारोपलक्षितेबहिः प्रदेशे दक्षिणतउपलिप्त उद्धतावोक्षिते सूतिकाग्निमुपसमा
धाय। तथा च तत्र स्थापितस्याग्नेः सूतिकाग्निरिति नामधेयं। तस्मिन्नग्नौ तंडुलकणोपरक्तान्नुसि
द्धार्थानावपति। अवधिमाह। आउत्थानात्। उत्थानं सूतकांतं यावत्। कदेत्यत आह। संधिवेलयोः
सायंप्रातरित्यर्थः। अनेनेतरहोमकर्त्तव्यतानिरासः। शंडामर्कादुपवीरः शौंडिकेय उलूखलः
लः। मलिम्लुचो द्रोणासश्च्यवनो नश्यतादितः स्वाहा। आलिखन्ननिमिषः किं वदंत उपश्रुतिः
हर्यक्षः कुंभीशत्रुः पात्रपाणिर्नृमणिर्हंत्रीमुखः सर्षपारुणश्च्यवनो नश्यतादितः स्वाहेति। द्वाभ्या
माभ्यां मंत्राभ्यां हे आहुती अग्नौ प्रक्षिपतीत्यर्थः। इदमग्नय इति त्यागः। यदि कुमारउपद्रवेज्ज्वा
लेन प्रच्छाद्योत्तरीयेण वा पितांकआधाय जपति। यदि कुमारस्य स्कंदनादि स्यात्तथा ह्युपद्रवो भवे
त्। ततः पिता अंके कुमारमाधाय उत्तरीयलाजाभ्यामन्यतरेण छाद्य वक्ष्यमाणं जपति मंत्रं किं
तदित्यत आह। कूर्कुरः सुकूर्कुरः कूर्कुरो बालबंधनः। चेचेच्छुनक सृज नमस्ते अस्तु सीस

गृह्य
गृह्य

रोलपेतावह्वरतत्सत्यं। यत्तेदेवावरमददुःसत्वंकुमारमेवावृणीथाः॥ चे छुनकसृजन
मस्तेअस्तुसीसरोलपेतापह्वरतत्सत्यं। यत्ते सरमामातासीसरः पीताश्यामग्रातलौ भ्रातरौ
चेचेछुनकसृजनमस्तेअस्तुसीसरोलपेतापह्वरे इतिशङ्खोमंत्रसमाप्तिद्योतकः। अलिम्लुश
४९ तिननामयतिनरुदतिनहृष्यतिनग्लापयतियत्रवयंवदामोयत्रचालिम्लुशामसीति। स
र्वमंत्रंजपित्वाननामयीति। त्यादिनालिम्लुशामसीत्यंतेनकुमारंस्पृशतीत्यर्थः। ततः कुमा
रमात्रेकुमारंदत्वास्पर्शनिमित्तंपितुःस्नानं॥ ॥इतिजातकर्म॥ २६॥ ॥ षोडशीकंडिका॥
अथेदानींनामकर्मनिष्क्रमणिकेक्रमेणसूत्रयति। दशम्यामुत्थाप्यब्राह्मणान्भोजयित्वा
पितानामकरोति। जननाशौचस्यप्रक्रांतत्वात्तत्प्रतियोगिनीदशमीचरमावस्था तस्यां ४९
जातायांसूतकेविनष्टेदशाहेनिवृत्तइत्यर्थः। ततएकादशेहनिसूतिकागृहात्सूतिकांउ
त्थाप्यस्नापयित्वावस्त्रशरीरादिगोचरांशुद्धिंसूतिकायाःसंपाद्यपितानामकरोतीत्यत्र
यः। तदुक्तं। अहन्येकादशेनामेति। अत्राप्येकादशाहपदंसूतकांतोपलक्षणं। तेनकृ

अथशिशोः मासनामानि। कृष्णोऽनंतोऽच्युतश्चक्री वैकुंठो जनार्दनः। उपेंद्रो यज्ञपुरुषो वासुदेवस्तथा हरिः। योगीशः
पुंडरीकाक्षो मासनामान्यनुक्रमात्। यत्र यथाचारं चैत्रादि मार्गशीर्षादि वा क्रमः।१। चैत्रादिमासनामानि वैकुंठोथ
जनार्दनः। उपेंद्रो यज्ञपुरुषो वासुदेवस्त्रिविक्रमः।१। योगीशः पुंडरीकाक्षः कृष्णोऽनंतोऽच्युतस्तथा। चक्रधारीति नामानि क्रमाद्
दुर्मतौ विदुः।२।

यादेरपि स्तनकनिवृत्त्यनंतरमेव नामकरणं। कथमित्यपेक्षायामाह। ब्राह्मणानुलोजयित्वे
ति। एतस्य नामकरणस्यांगत्वादादौ वैश्वदेव सर्वकं आभ्युदयिकं श्राद्धं कुर्यात्। ततइतर
न् ब्राह्मणान् नामकरणांगतया लोजयेत्। कीदृशं तदित्यत आह। द्व्यक्षरं चतुरक्षरं वा घो
षवदाद्यंतरंतस्थं दीर्घाभिनिष्ठानं कृतं कुर्यान्न तद्धितमयुजाक्षरमाकारांतं स्त्रियै तद्धि
तं। अत्राक्षरसमुदायस्याक्षरत्वं। द्वे अक्षरे यस्य तद्व्यक्षरं। चत्वारि अक्षराणि यस्य तत्तादृ
शं। वाशब्दो विकल्पार्थः। पुनः कीदृशं। घोषवदादि घोषवदक्षरं आदौ यस्य तत्तादृशं। वर्गा
णां प्रथमद्वितीया शषसाश्चाघोषाः तद्भिन्नहलां घोषवत्वं। पुनः कीदृशं। अंतरंतस्थं।
अंतर्मध्ये अंतस्था यस्य तत्तादृशं। यरलवा अंतस्थाः। पुनः कीदृक्। दीर्घाभिनिष्ठानां दी
र्घमक्षरं अभिनिष्ठाने अवसाने यस्य तद्दीर्घाभिनिष्ठानं। कृतं। राशिचक्रादिविचारेण ज्यो
तिःशास्त्रे कृतं कर्तव्यतया बोधितं। अथवा पितामहादेः कृतं यत्पितामहादिभिः। अथवा
रामकृष्णादिदेवतासंबंधि पुराणादौ कृतमिति कृतं। सद्वा कृत्प्रत्ययांतं। कृतमिति कि

वि२

सानि शेषणं वा। कुर्यात् कुमारस्य दक्षिणं कर्णमिति निधाय पठेदित्यर्थः। कुमार्यास्तु व
गृह्य मश्रवणे जपेदिति शेषः। न तद्धितं। तद्धितप्रत्ययांतं न कुर्यात्। कुमार्याः कीदृशं नामेत्य
त्र आह। अयुजाक्षरं। अयुग्माक्षरं। आकारांतं। आ शब्दः अंते यस्य। तद्धितं। तद्धितांतं कन्या
५० नाम कुर्यादिति सर्वानुषंगः। अपि च शर्म ब्राह्मणस्य वर्म क्षत्रियस्य गुप्तेति वैश्यस्य। ब्रा
ह्मणक्षत्रियविशां नामकीर्त्तनानंतरं शर्म्म वर्म गुप्तेति यथाक्रमं प्रयोगादौ प्रयोक्तव्यं।
यद्वा केषांचिच्छर्म्मविशेषाः संति। तत्र उपस्थापकपदप्रयोगानंतरं शर्मपदं प्रयोक्तव्यं।
एवं क्षत्रियादेरपि वर्म्मोपस्थापकपदविशेषप्रयोगानंतरं वर्मपदप्रयोगः। एवं वैश्यस्या ५०
पि धनविशेषविषयकरक्षणपदप्रयोगानंतरं गुप्तेति पदप्रयोगः। शूद्रस्यापि प्रेष्यत्वप्रति
पादकं दासादिपदं नामकीर्त्तनानंतरं प्रयोक्तव्यमिति नामकरणं यथाकुलाचारं वा॥ ॥
निष्क्रमं सूत्रयति। चतुर्थे मासि निष्क्रमणिका। निष्क्रमणिकेति कर्म्मनामधेयं। कदेत्यत उक्तं
चतुर्थे मासीति॥ तदुक्तं चतुर्थे मासि निष्क्रम इति। कथमित्यत आह। सूर्यमुदीक्षयतीति

चक्षुरिति। अत्रापि पुण्येहनिवेश्य देवसदं मातुस्तनान्मुदयिकेविधाय कुमारमादाय
वहिर्निष्क्रम्य सूर्यमुदीक्षस्वेति ॐ मन्त्र रं कुमारं सूर्यमुदीक्षयति तच्चक्षुरिति मंत्रेण। वाल
कस्य। श्रं तात्वयं मंत्रपाठः। कन्यायाः सूर्यावेक्षणं तूष्णीं॥१७॥ ॥सप्तदशी कंडिका॥
प्रवासादागत संज्ञा पत्यस्य विशेषं वक्तुं प्रवासतदूर्ध्वं सूत्रणप्रयोज्यमानत्वमपने
तुं सूत्रयति। विशेषे त्यद्गृहानुपतिष्ठते सर्ववत्। प्रवासं कृत्वा आगत्य आवसथ्य भार्यापुत्र
देवीस्मस्यानान्मुपतिष्ठते। कथमित्यत उक्तं। सर्ववदिति। सर्वं कात्यायनसूत्रे यथोक्तं तद्व
दित्यर्थः। एतेन कात्यायनगृह्ययोः समानकर्तृकत्वं कात्यायनानिष्ठा सर्वकालता च द्योत्यते।
तद्यथा॥ गृहा मा बिभीतेति गृहानुपैति ऊर्जं मायवदिति प्रविशतीति। अत्राप्यावसथ्यमनतिमोने
नावेलंगमनागमनयोः। धुअंह क्षाजम लांगादंगात्संभवसि हृदयादधिजायसे। आत्मा वै पुत्र
ध्वनीनोऽतिथिर्ज्ञेयः श्रोत्रियोवेदपारगइत्यादिशास्त्रोक्तानतिथीन्यथार्हंसंभजेरन्निति।
बालज्येष्ठाग्रहाययथार्हमश्नीयुः। पश्चाद्गृहपतिःपत्नीचेद्गृहपतेःपश्चात्पत्नीअश्नीयादि
तिशेषः। सर्वेभ्योगृहपतिः। एतच्चानुपस्थितातिथिविषयं। तथाचातिथीनामनुपस्थितिकाले
गृहपतौसंजातलोजनेसत्कारसर्वंतेषुयथाशक्तिभुक्तवत्सुपश्चात्पत्नीभुंजीतेत्यर्थः। अ
स्मिन्नर्थेश्रुतिंप्रमाणयति। तस्मादुस्वादिष्ठंगृहपतिःसर्वोऽतिथिभ्योऽश्नीयादितिश्रुतेः। तथाचान्न
स्यादुर्यावतासमयेननोपहन्यतेतावत्समयमतिथिंप्रतीक्षेतेत्यर्थः। केचित्तुसर्वातिथिभ्य
इत्यत्रातिथिभ्योऽशितेभ्यःसर्वंपित्र्याद्युपचयमाहुः। तन्मतेपश्चात्सर्वेदंपत्योःसहलोज
नमापाद्यसर्वेवित्सुत्तरस्मैपत्यपेक्षयागृहपतेःप्राग्भोजनमापाद्यतइतिनयोनसूत्रार्थः। अ

गृह्य

ध्याहारेणान्वयस्य क्लिष्टत्वान्न त्वतः पौनरुक्त्यमनपायश्चेति द्रष्टव्यं। अहरहः स्वाहाकुर्यादन्न
लाभे केनचिदाकाष्ठाद्देवेभ्यः। देवेभ्यः अत्यहं आकाष्ठात्स्वाहाकुर्यात्। कदा अन्नालाभे।। पि
तृमनुष्ययज्ञयोरन्नालाभे का गतिरित्यत आह। पितृभ्यो मनुष्येभ्यश्चोदपात्रात्। न पितृयज्ञेनो
दपात्रेणाप्यहरहः कर्त्तव्याविति भावः।। इति पंचमहायज्ञाः।। ।। नवमी कंडिका।। ।। अथातो ध्या
योपाकर्म।। ।। अध्ययनमध्यायः तस्योपाकर्म अंगीकरणं वक्ष्यत इति सूत्रशेषः। एतच्च कृता
वसथ्यस्य। ध्यापनप्रवृत्तस्य भवति। अपरे तु अध्यापनप्रवृत्तस्य निरग्नेरपि लौकिकेऽग्नौ भ
वतीत्याहुः। कदा स्यादित आह। ओषधीनां प्रादुर्भावे श्रवणेन श्रावण्यां पौर्णमास्यां। कर्त्तव्य
ताधारसमयविशेषणमोषधीनां प्रादुर्भावे। पौर्णमास्यां संलभ्यमानत्वाच्छ्रवणोक्तिः।
इयं च श्रावणी पौर्णमासी मुहूर्त्तावच्छिन्नोदयिकी ग्राह्या।। उदयिकी चेद्धीना स्यात् तदा चतुर्दशी मि
श्रिता ग्राह्या। पक्षान्तरमाह। श्रावणस्य पंचमी हस्तेन वा। अत्रापि हस्तनक्षत्रं संभाव्यते। अतश्च

ह्वेधाविकल्पः। केचित्तुपौर्णमासी पंचमी श्रवणहस्तान्यादाय स्त्रुईद्वाविकल्पमाहुः। कर्त्तव्यता
माह। आज्यभागाविष्वाज्याहुती र्जुहोति पृथिव्या अग्नय इत्यृग्वेदेऽन्तरिक्षायवायव इतियजु
र्वेदे। दिवेसूर्यायेतिसामवेदेदिग्भ्यश्चंद्रमसइत्यथर्ववेदेब्रह्मणेछंदोभ्यश्चेतिसर्वत्रप्रजापतये
देवेभ्यऋषिभ्यः श्रद्धायैमेधायैसदसस्पतयेनुमतयइतिच। तत्रप्रथमप्रयोगेमातृपूजाभ्युद
यिकेविधायोत्सर्गोपाकर्मणोः सामानाधिकरण्यस्यन्याय्यत्वादावसथ्यमादायशिष्यैः परि
वृतोत्सर्गस्थानमुदकांतंगत्वाजपांतेपंचसंस्कारपूर्वकमग्निंस्थापयित्वाब्रह्मासनास्तरणादि
परिसमानिवर्त्याज्यभागाविष्ट्वा पृथिव्या अग्नय इत्याद्याहुतीर्जुहोतीत्यन्वयः। ब्रह्मणेस्वा
हा छंदोभ्यः स्वाहेत्येतदाहुतिद्वयं प्रतिवेदोद्देशकाहुतिद्वयहोमानंतरं सर्वत्रवेदाहुतिष्वा
वर्त्तते। अनुमतये चेत्यत्रचकारात् आज्यभागाविष्ट्वानुमतिपर्यंतं पृथिव्यादिसकलदेवतो
द्देशकाज्याहुतीर्जुहोतीत्यन्वयः। आसादनेयाभ्यसिद्धाअक्षतधानाः। प्रतिदिक्षीयमौदुंबर्यः
क्षिप्रक्षिप्रसमिधः सपालाशाः दधितिलाः। आज्यभागानंतरं पृथिव्यैस्वाहा। इदं पृथिव्यै

ग्रह्य

अग्नयेस्वाहा। इदमग्नये। ब्रह्मणे स्वाहा। इदं ब्रह्मणे। छंदोभ्यः स्वाहा। इदं छंदोभ्यः। अंतरिक्षाय
स्वाहा। इदमंतरिक्षाय। वायवेस्वाहा। इदंवायवे। ब्रह्मणेस्वाहा। इदंब्रह्मणे। छंदोभ्यः स्वाहा। इ
दंछंदोभ्यः। दिवेस्वाहा। इदं। ब्रह्मणेस्वाहा। इदं। छंदोभ्यः स्वाहा। इ। दिग्भ्यः स्वाहा। इदंदि
ग्भ्यः। चंद्रमसेस्वाहा। इ। ब्रह्मणेस्वाहा। इ। छंदोभ्यः स्वाहा। इ। प्रजापतयेस्वाहा। इदं। देवे
भ्यः स्वाहा। इदंदेवेभ्यः। ऋषिभ्यः स्वाहा। इदं ऋषिभ्यः। श्रद्धायेस्वाहा। इदं। मेधायेस्वाहा। इ।
सदसस्पतयेस्वाहा। इदं। अनुमतयेस्वाहा। इदं। एतदेव व्रतोद्देशनविसर्गेषु। एतदेव आ
ज्यभागाद्यनुमतयेस्वाहेत्यंतंकर्म व्रतादेशाः सावित्र आग्नेय शुक्रियादयः। विसर्गाश्चते
षामेव। तेषु लवत्येवेत्यन्वयः। अन्यदपिनित्यंमहाव्याहृत्यादिस्विष्टकृदंतमाहुतिदशकं।
एवंसर्वत्रव्रतादेशविसर्गाहोसषट्त्रिंशदाहुतयोभवंति। सदसस्पतिमित्यद्भुतधाना। त्रिः स
वेनुपठेयुर्हुत्वाहुत्वौदुंबर्यग्निइसमिधः। समिधआदध्युरार्द्राः सपलाशाघृताक्ताः सावित्र्या
ब्रह्मचारिणश्च पूर्वकल्पेन। सदसस्पतिमिति अद्भुतधानाः लौकिकाग्नि भ्रष्टायवाः। वर्त

१६

यमाचार्योजुहोति आचार्येणमंत्रेपठ्यमानेसर्वेशिष्याः सदसस्पतिमितिमंत्रमनुपठेयुः॥
यथाआचार्योधानाः जुहोति। तथाशिष्याअपि अग्निषु समिधः आदध्युः किंकृत्वाजुहुत्वा
त्वा। किंभूताः आर्द्राः पुनः कीदृशाः सपलाशाः पलाशानिपत्राणितैः सहिताः। पुनः घृता
क्ताः। पुनः कीदृशाः औदुंबर्यः। उदुंबरवृक्षोद्भवाः। केनमंत्रेणसमिधामाधानं अतउक्तं
सावित्र्यातत्सवितुरित्यादिकया। ब्रह्मचारिणांविशेषमाह। सर्वकल्पेनेति। सर्वोक्तिः कल्पः
पक्षः। अनयेसमिधमाहार्षमित्यादिप्रत्यृहीयमंत्रेणेत्यर्थः। तथाचपूर्वमाचार्यस्यधाना
होमः। शिष्याणांधानाहोममंत्रपाठानंतरंसमंत्रकः समिद्धोमः। एवंद्विरपरं आचार्यस्य
शिष्याणांचव्यत्यासेन। एवमेकैकस्यशिष्यस्यत्रितिवारंतिसृतिः समिद्भिर्नवसमिधः संपद्यं
ते। केचित्तुएकस्यांक्रियायामेकः एकांसमिधंप्रक्षिपेत्। तेनैकैकस्यतिस्रः समिधोलवंती त्या
हुः। शन्नोलवंत्वित्यनुक्तधाना अखादंतः आश्नीयुः। शन्नोलवंत्वितिमंत्रेणअनुक्ताम्नायवा
नीधानालजितकणान् दंतैरनवखंडयंतः अचर्वयंतः आश्नीयुः सर्वे। दधिक्राव्ण इतिद

गृह्य॰

धिरन्नयेयुः। सर्वेश्राचमनन्तुयं। सयावंतंगणमिच्छेत्तावतस्त्रिलानाकर्षफलकेनजुहुयात्।
सआचार्योयावंतंशिष्यगणंइच्छेत्। तावतस्त्रिलान् आकर्षफलकेन र्डुंव रेणसप्रकृति
नावाङ्गमात्रेणजुहुयात्। सावित्र्याःशुक्रज्योतिरित्यनुवाकेनवा। सावित्र्याहोमपक्षेइदंस
वित्रइतित्यागः। अनुवाकेनहोमपक्षेसमर्वेनुवाकः। त्यागश्चइदंशुक्रज्योतिषेचित्रज्यो
तिषेसत्यज्योतिषेज्योतिष्मते। शुक्रायऋतपाय। अत्यंहसे। ईदृक्षेअन्यादृक्षेसदृक्षेप्रति
सदृक्षेमितायसम्मितायसभरसे। ऋतायसत्याय ध्रुवायधरुणाय धर्त्रेविधर्त्रेविधारया
धक्रुतजितेसत्यजितेसेनजितेसुषेणायअंतिमित्रायदूरये। अमित्राय। गणाय। ४ ईदृक्षे
एतादृक्षेसेसदृक्षेप्रतिसदृक्षेमितेभ्यःसम्मितेभ्यःसभरसोमरुद्भ्यः - - - - स्वतवसे
प्रघासिनेसंतापनायगृहमेधिनेक्रीडिनेशाकिनेउज्जेषिणे। इदमिंद्रंदेवीभ्योविश्वेभ्योमरुद्भ्यः
- - - - प्राशनांते। ततोमहाव्याहृत्यादिप्राजापत्यंतं। चतुर्थीकर्मचरुवद्धानांतद्वणोपघा
तादाज्येनस्विष्टकृत्। प्राशनंमार्जनं। पवित्रप्रतिपत्तिः। ब्रह्मणेपूर्णपात्रदानं। सर्वप्रायश्चि

न्तहोमः॥ एतावत्प्राशनांतं तस्मिन् प्रत्यङ्मुखेभ्य उपविष्टेभ्य ॐकारमुक्त्वा त्रिस्त्रस॥ वत्राल ॐ
यादीन्प्रब्रूयात्॥ शिष्येभ्यः प्रत्यङ्मुखेभ्यः प्राङ्मुख आचार्यः प्रणवपूर्विकां सावित्रीं त्रिर्वारमु
क्त्वा मंत्रब्राह्मणयोरध्यायादीन्प्रब्रूयात् इत्यर्थः॥ ऋषिमुखानि बह्वृचानां पर्वाणि छंदोगानां ॐ
सूक्तान्यथर्वणानां प्रब्रूयादित्यनुवृत्तिः॥ सर्वे जपंति सहनोस्तु सनोवतु सहनइदं वीर्यवदस्तु
ब्रह्म। इंद्रस्तद्वेदयेनयथानविद्विषामहइति। सर्वे आचार्यशिष्याः॥ जपानंतरं बर्हिर्होमः॥ प्र
णीताविमोकः॥ कर्म्मायवगासिमिधः। उत्सर्जनं ब्रह्मणः। उपयमन कुशानाम ग्नौप्रक्षेपः। ब्रा
ह्मणभोजन संकल्पः। आवसथ्यस्यगृहं प्रत्याहरणं। वैश्वदेवः। त्रिरात्रं नाधीयीरन् लोमनखा
नामनिकृंतनमेके प्रागुत्सर्गात्। अनिकृंतनमपि त्रिरात्रं। एके आचार्याः। पौषस्य रोहिण्यामि
त्यादिवक्ष्यमाणोत्सर्गात् उपाकर्मणश्च प्राकृष्य पंत्रिरात्रमनिकृंतनानध्ययने। अपरे तु उत्स
र्गादितिलक्ष्योपेपंचमी। ततश्चोत्सर्गाह मारभ्य प्रागुत्तरं च त्रिरात्रमनिकृंतनानध्ययने लभ्यं
तीत्याहुः॥ ॥दशमी कंडिका॥ १०॥ ॥ अनध्यायानाह॥ वातेमावास्यायामिति सर्वानध्यायः

गृ॰ सू॰

प्रचंडे वाते। अन्यथा तस्यास्याधारणस्य सार्वकालिकत्वात्। सर्वपदमं गादिपरं। शिल्पिनामपीत्य
न्ये। अपरे तु गुर्वधीनपदार्थमात्रगोचरान ध्यायनमाहुः। स्वाधीनतां प्रापितस्याप्यनध्यसनमि
ति केचित्। पक्षयोर्वर्तामावास्ययोरध्यायननिषेधः प्रयोजकत्वे समुदितयोर्विहित श्राद्ध। दिव्य
तिरिक्तकर्तृव्यतामात्रनिषेधकतेति नव्याः॥ श्राद्धाशनेच॥ श्राद्धाशनदिनेन ध्यायइत्यर्थः। उल्का
वस्फूर्जथुमिचलनाग्न्युत्पातहत्नुसंधिषुचाकालं। यस्मिन्काले उल्काद्युत्पात आपतति अपरदिने
पितत्कालपर्यंतं। उल्का अलातं। अवस्फूर्जं विद्युत्। चलनं क्रिया। उत्पातः। अनिष्टत्वसूचको
द्भवविशेषः। अनुसंधिषु धर्म्मशास्त्रेषु अनुसंधित्वेन प्रसिद्धमहोरात्रं। पूर्वकृतो रत्यारात्रिः अ
परकृतोरात्र्यमिहरित्यन्ये। उत्सृष्टेष्व भ्रदर्शने सर्वरूपे च त्रिरात्रं त्रिसंध्यं वा। उत्सृष्टेषु छंदःसु। त्रिरा
त्रं। अभ्रदर्शने महद भ्रदर्शनं। सर्वरूपता च स्तनितविद्युद्वृष्ट्यादि संघातः। तस्मिन्निमित्ते त्रिरात्रं
त्रिसंध्यं वेति विकल्पः। अभ्रदर्शने त्रिसंध्यं। संघाते च त्रिरात्रमिति व्यवस्थितं विकल्पमन्ये। भुक्त्वा
ईपाणिः। नाधीयीतेति शेषः। उदके निशायां। निशायाः मध्यमौ प्रहरौ। अर्द्धरात्रमित्यन्ये। ५

ध्यवेलयोः। अहोरात्रस्य। अंतः शवेग्राममंतः। अंतर्मध्ये शवो यस्य। तस्मिन्नंतर्मध्ये नाधीयीत।
यावद्ग्राममध्ये शवस्तावत्तदंतर्नाध्ययनमित्यर्थः। दिवाकीर्त्ये। दिवाकीर्त्तिश्चांडालः। तद्ग्रामेना
धीयीत। केचित्सर्वस्त्रस्यमंतःपदमस्मिन्योजयंति। अंतर्दिवाकीर्त्ये। चांडाले ग्राममध्ये सत्यन
ध्यायः। दिवैव कीर्त्यतइति दिवाकीर्त्यंपिवर्ग्यं। ग्राममध्ये तस्मिन्नायमाने तस्मिन्ग्रामेनध्यायमा
हुः। केचित्तु दिवाकीर्त्तेश्चांडालस्यदर्शनं दिवाकीर्त्यं। तस्मिन्सत्यनध्यायमाहुः। यावतोलिश
स्रपतितदर्शनाश्चर्याभ्युदयेषु च तत्कालं। अलिशस्रो मिथ्याभिशस्तः पतितो ब्रह्महत्यादिना। त
योर्दर्शने। तथाश्चर्यं अद्भुतदर्शनं। अभ्युदयः पुत्रजन्मादि। एषु। तत्कालं यावन्निमित्तं। नी
हारे वादित्रशब्दे आर्त्तस्वने ग्रामांते श्मशाने श्वगर्द्दभोलूकसृगालसामशब्दे शिष्टाचरितेषु च। ग्रा
मस्यांते सीम्नि। श्वादीनां शब्दे श्रूयमाणे। आचरितमागमनं एषु। तत्कालमित्यनुषंगाद्धर्थश्च कारः
गुरो प्रेते पोस्यवेयावद्दशरात्रं नोपरमेत्। अपोह्य वेयातजेतोदकक्रियां कुर्यात्। अध्ययना
दुपरमेद्दशरात्रं। संतानेना त्रीणि सब्रह्मचारिणि चैव त्रिरात्रं। तान्नतन्नमात्यविशेषः। सह

गृह्य

तान्नन्नं गृहीतं स्वाध्यायेनासौ स तान्नत्स्नीतस्मिन्नूतथा सब्रह्मचारिणि समानाचार्ये पत्नी ते
त्रिरात्रमध्ययनादुपरमेत्। एकरात्रमसब्रह्मचारिणि अध्ययनमात्रं सह कुर्वाणे। अर्द्धषष्ठान्मा
सानधीत्योत्सृजेयुः। अर्द्धः षष्ठो येषु। तान्मासार्द्धपंचमानित्यर्थः। एतच्च श्रावण्यापाकर्मपक्षे।
मासवृद्धिरभ्युपेत्याह। अर्द्धसप्तमान्वा। अर्द्धः सप्तमो येषां। वाशब्दोऽवधारणे। छंदसामुत्सर्गादं
गाध्ययनं। यद्वा माघाष्टकायाः मध्यमलविवक्ष्यार्द्धसप्तमान्वेत्युक्तं। अस्मिन्पक्षे वाशब्दो विक
19 ल्पार्थ इत्येके। अथ माम्रचंजपंत्सुलाकवीयुवायोनो धर्म्मःपरापतत्। परिसंरव्यस्य धार्म्मिणो वि
सरव्यानि विसृजामह इति। अथ उत्सर्गानंतरं इमां उलाकवी युवो वेती मां आचार्यः शिष्याश्चत्वारं
जपंतीत्यर्थः। त्रिरात्रं सहोष्यविं प्रतिष्ठेरन्। अत्र त्रिरात्रं सहवासनियमः। विप्रवासांशेनुवादः
अतश्च सति प्रयोजने विप्रतिष्ठेरन्। प्रवासं कुर्युः॥ ११॥ ॥एकादशी कंडिका॥ ॥सर्वमर्द्धषष्ठा
नर्द्धसप्तमान्वा मासानधीत्योत्सृजेयुरित्युक्तं। स चोत्सर्गः कथमित्यपेक्षायां। स समयं तावद्वि
धिमाह। पौषस्य रोहिण्यां मध्यमायां वाष्टकायामध्यायानुत्सृजेयुः। मध्यमाष्टकायोप्यनंतरस्कं

ष्टमी। अपरेत्तु पौषीमाघयुत्तरकृष्णाष्टम्योरुपादानमाहुः। कथमत्राह। उदकांतं गत्वा
ऽग्निर्देवाश्छंदांसि वेदानृषीन्सनातनान्पुराणाचार्यान्गंधर्वानितराचार्यान्संवत्सरं
च सावयवं पितॄनाचार्यान्स्वांश्च तर्पयेयुः। उदकांतं गत्वेत्यनेन स्नानविधिर्लक्ष्यते स च वक्ष्यमाणे
ष्वीडनात्प्रागेव तर्पणस्य करिष्यमाणत्वात्। ततश्च तर्पणे कुशान्त्रिपितर्पणार्थं संगृह्य ति
स्न तर्पणानंतरं। प्रवरारुंधती सहितान्सप्तर्षीन्संस्थाप्य प्रतिष्ठां कृत्वेमाविवेत्यादिस्व स्वमन्त्रैर्गंध
इत्युपचारैः पूजयित्वा तत्तीर्थ्यर्ये हि जेत्योपवीतानि दत्वा चाग्निसोनत्वा प्राङ्मुखस्था पितान्कुशा
नादायाग्निर्देवादीस्तर्पयेयुरित्यन्वयः। तद्यथा। देवास्तृप्यंतां। छंदांसि तृप्यंतां। वेदास्तृप्यं
तां। ऋषयः सनातनास्तृप्यंतां। पुराणाचार्यास्तृप्यंतां। गंधर्वास्तृप्यंतां। इतराचार्यास्तृप्यंतां। अ
होरात्राणि तृप्यंतां। अर्द्धमासास्तृप्यंतां। मासास्तृप्यंतां। ऋतवस्तृप्यंतां। संवत्सरः सावयवस्तृप्य
तु। ततआचार्यापितॄन्तर्पयेत्। अमुकस्य गोत्राः आचार्यपितरः अमुकशर्माणस्तृप्य ध्वं। अपसव्ये
नांजलित्रयं। एवं पितामहप्रपितामहयोस्तर्पणमाचार्यस्य। अत्रैकवचनांत एव तर्पणे प्रयो

गद्दत्याचार्याः॥ ततोमुकगोत्राः पितरः अमुकशर्म्माणस्तृप्यन्त्विति स्वपितृतर्प्पणं। एवं पिता
महप्रपितामहयोः। अत्राप्येकवचनांतएवप्रयोगइत्याचार्याः। ततोमंडनकारिकातः आवा
पः। अयंपुरोभुवः ५ मूर्द्धा वयं २ मा छंदः ३ एवश्छंदः १६। सप्त ऋषयः १ इमावेवगोतमल २ इ।
जौचत्वारः वंशाः। सावित्री च न रवडुत्यविरतास्मइतिप्रद्युम्नः। अत्र षाड्गुरवआचार्यः। प्रत्य
ग्गुरवाइतरे। तर्प्पणं। त्रिरात्रमनध्यायो लोमनखदकर्त्तनं चेत्यर्थः। प्रवचनं च। इषेत्वा कृष्णोस्विष्ठ
तमुपैप्यन्त्स वैकपालिनीत्येवमाद्य ध्यायशतप्रपाठकांत्य कंडिकाफक्किकादिकीर्त्तनं। क
थमतआह। सर्ववत्। अध्यायोपाकर्म्मवत्। अत्रापिप्रथमप्रयोगेमातृश्राद्धं। उत्ताकवीत्ये
षान्नक्त उत्सर्गमिंत्रः उदकसमीपेउत्सर्गः। त्रिरात्रमुत्सर्गानंतरं तर्प्पणमित्यन्ये। ततस्त्रिर
त्रानंतरं शुक्लपक्षे षुवेदाध्ययनं। कृष्णपक्षे षडंगानीति संप्रदायः। सर्ववदित्यनेनात्रापि त्रि
रात्रं धूं सहोपोष्य विप्रतिष्ठेरन्निति॥ १२॥ ॥ द्वादशी कंडिका॥ ॥ पुण्याहे लांगलयोजनं।
पुण्याहपदं शुक्लपक्षाद्यनादरार्थं। तच्च नसंलवति गौण्यामुख्ययावातस्मतत्राहतैः। लां

गलंहलं। ज्योतिःशास्त्रादिपरिगृहीतेउत्तमेऽह्नि हलयोजनं कुर्यादित्यर्थः इति शेषः॥ पक्षांत
रमाह। ज्येष्ठया चेन्द्रदेवत्यं। हेतुत्वं तृतीयार्थः। यतः ज्येष्ठानक्षत्रमिन्द्रदेवताकं। कृषेश्चेन्द्रा
धीनत्वात्तेन ज्येष्ठायां लांगलयोजनेन तथा पुण्याहापेक्षा। अथम लांगलयोजनअक्षतस्यलव
ति। अत्रापि मातृमज्ञाभ्युदयिके सर्वतः। इंद्रं पर्जन्यमश्विनौ मरुत उदलाकाश्यपं स्वातिका
रीं सीतामनुमतिं वद दध्नातंडुलैर्गंधैरक्षतैरिष्ट्वानडुहो मधुघृते प्राशयेत्। इंद्रादीननुमत्य
तान्। दध्नातंडुलैर्गंधैरक्षतैरेकीकृतैः। इष्ट्वा बलिदानेनेति शेषः। बलिदानं च आक्रुसंस्थ
मुदग्वा। आवपुर्दंचीति परिलापितत्वात्। बलिदानं चोपलिप्सायां देवसन्निहितभुवि। ततो दधि
तंडुलगंधाक्षतान् दक्षिणहस्तेनादाय। इंद्रायनमः पर्जन्यायनमः। अश्विभ्यांनमः। मरुद्भ्यो न
मः। उदलाकाश्यपायनमः। स्वातिकार्यैनमः। सीतायैनमः। अनुमत्यैनमः। अत्रैव बलीन्दद
द्यात्। ततो मधुघृते पात्रे कृत्वा बलीवर्दान्संप्राशयेत् लेहयेदित्यर्थः। सीरायुंजंतीतियोजयेत्
लांगलमितिशेषः। शुनं सुफालाइति कृषेत्फालेन वालकेन। फालकर्षणसाधनं लोहं। क

गृ.सू.

र्षणस्पर्शयोर्विकल्पार्थो वाशब्दः। इदानीं मंत्रयोर्निषेधमाह। नवाभ्युपदेशाद्वपनानुषंगा
च्च। वाशब्दः सर्वपक्षव्यावृत्तौ। एतौ मंत्रौ न भवतः किंतु तूष्णीमेव योजनकर्षणादि भवेत्। तत्र हे
तुमाह। अभ्युपदेशात्। अग्निः चयनं। तत्र मंत्रयोरुपदेशात् प्रकृते न भवतः। न च वाच्यम
तिदेशः अन्येषामपि धान्यादिवपनमंत्राणां चयनोपदिष्टानां या ओषधीरित्यादीनाम
तिदेशात् पत्नेरित्याह वपनानुषंगाच्चेति। अथ यमलिषिच्याकृष्टं तदाकृषेयुः। अथ यमश्रेष्ठं ब
लीवर्दं अलिषिच्य घंटादिनालंकृत्य तत्र कृष्टं। अविलिषितं भूत्वा गंतदाकृषेयुः विलिखे
युः। ततो ब्राह्मणभोजनं लांगलयोजने न भूमीं वपनयोग्यां संपादयेत्। इदानीं वपनकर्त्त
व्यतामाह। स्थालीपाकस्य सर्ववद्देवतायजेद्दुलयोर्व्रीहियवयोः प्रवपन्। मात्स्य स्त्रजा भु
दयिके विधाय परिसमूहनाद्युपयमनपर्यंते पांतेविशेषः। अहणे इंद्राय पर्जन्यायाश्विभ्यां
मरुद्भ्य उद्दलाकाश्यपाय स्वातिकायै अनुमत्यै ऋतुभ्यं रङ्कामि। प्रोक्षणे त्वा शब्दो धिकथा
आज्यभागानंतरं स्थालीपाकस्य चरोः सर्ववत् लांगलयोजनोक्तदेवताः इंद्रादिकाः यजे

त। किं कुर्वन्नुप्रवपन्। उप्तिं कुर्वन्। कयोः व्रीहियवयोरित्यन्वयः। इंद्रायस्वाहेत्यादिभ्रनुम
त्यंतं। स्विष्टकृद्धोमादिब्राह्मणभोजनांतं। तदनंतरं वैश्वदेवम सीतायज्ञेच। सिद्धेषु व्रीहिषु
यवेषु चसीतायज्ञोभवति। सचवक्ष्यते। तत्रापीन्द्रादयोनुमत्यंता लांगलयोजनदेवताः होम
कर्म्मणाबलिदानेनचयष्टव्याइत्यतिदिश्यतइत्यर्थः। ततोब्राह्मणभोजनं। दशार्थं चवापरिशि
ष्टात्। एतच्चप्रवपनंव्रीह्यादीनां लौकिकाग्नौभवतीत्यवसीयते। अन्येत्वनिरग्ने रेव लौकिका
ग्नौकृतावसथ्यस्यावसथ्येभवतीत्याहुः॥१३॥ ॥त्रयोदशीकंडिका॥ ॥अथातः श्रवणाक
र्मसमयमाह॥ श्रावण्यांपौर्णमास्यामिति। नान्यदेत्यर्थः। कथंस्यादत आह। स्थालीपा।
कं॰ं अपयित्वाहूत धानाश्चैककपालंपुरोडाशं। पदार्थक्रमोयं। परिसमूहनादि आद्य
स्थालीमाद्यचरुस्थालीसंमार्गकुशाः उपयमनकुशाः। समिधः स्रुवः। आज्यं। यवाः
तंडुलाः पिष्टं। कर्परिका। एककपालं। वर्हिः। दर्वीवल्क। धारज्ञ। शूर्पं। कंकताश्रयः। अंज
नंअनुलेपनंअजस्रु। उदकंदृषदुपलं। वरत्र। स्फ्योपहितमोषधिकरणं। तंडुलानांग्रहणं।

विलवे श्रवणाय श्रावण्यै पौर्णमास्यै पौर्णमास्यैवर्षाभ्यो जुष्टं गृह्णामि। यवानां ग्रहणं। इंद्रा
यजुष्टं गृह्णामि। पिष्टस्य ग्रहणं। कवाय सोमाय जुष्टं गृह्णामि। सर्वजिघो वुलेत्वाशवेधिक:
चसेरधिश्रयणं। कर्परिके कं कपालयोश्चाधिश्रयणं। कर्परिकायां यवाः। एककपाले
पुरोडाशः। आज्यचरुधानानां युगपदधिश्रयणं। ततः पर्यग्निकरणं सर्वेषां। अर्द्धश्रृते पु
वः प्रतपनादि वर्हिस्सरणांतं। अन्वयस्य। अहुतानां यवानां धानाः। अहुते भूयवा मुख्याइ
त्युक्तत्वात्। अपयित्वेति। काकाक्षिन्यायाद्दृत्तं भवति। चकारस्य एककपालमित्यत्र श्रप
यित्वेत्यनुकर्षणार्थः॥ ॥धानानां भूयसीः पिष्टाज्य भागाविष्टाज्याहुती जुहोति। ततो
घृताक्तानामुद्वासनं धानानां कृत्वा तेषां भूयसीः वह्नीः पिष्टास क्तुत्वमापाद्य तत्र चरु पुरो
डाशयोः श्रृतालिङ्घारणो द्वासने कृत्वोद्वासितानां चरु धानासक्तु पुरोडाशानां प्राणदाना
नंतरं वर्हिषि निधायोपयमन कुशादाना द्याज्यभागाविष्टा वक्ष्यमाणमंत्राभ्यां द्वे आज्या
हुती जुहोतीत्यर्थः। तदेव सर्पापसर्पकं मंत्रद्वयमाह। अपश्वेतपदाजहि पूर्वेणचाप

रेणचासत्तचवारूणैरिमाः प्रजाः सर्वाश्चप्रजवांधवैः स्वाहा। नवैश्वेतस्याद्याचारेहिंदर्श
कंचन। श्वेतायवैदर्व्यायनमःस्वाहेति। इदंश्वेतपदे। इदंश्वेतायवैदव्यायेतित्यागः। स्थाली
पाकस्यजुहोति। विष्णवेश्रवणायश्रावण्यैपौर्णमास्यैवर्षाभ्यश्चेति। विष्णवेस्वाहाइत्यादिच
तस्रआहुतयः। इदंविष्णवइत्यादियथादेवतंत्यागः। विष्ण्वादिदेवताभ्यःस्थालीपाकावय
वमादायजुहोति। मंत्रार्थः। धानावंतमितिधानानां। धानानामेकामाहुतिंधानावंतमितिमंत्रेण
जुहोति। मन्त्रप्रयोगः। इदमिन्द्रायेतित्यागः। घृताक्तान्सक्तून्सार्पेभ्योजुहोत्याग्नेयपांडुपार्थि
वानां ॐ सर्पाणामधिपतयेस्वाहा। श्वेतवायवान्तरिक्षाणां ॐ सर्पाणामधिपतयेस्वाहा। अभि
भूरसौर्यदिव्यानां ॐ सर्पाणामधिपतयेस्वाहेति। घृतेनअक्ताःतान्सक्तून्। सर्पेभ्यः आग्नेयेत्या
दिति त्रिभिर्मंत्रैः प्रतिमंत्रंतिस्रआहुतीर्जुहोति। इदं सर्पेभ्यःस्वाहा अन्योमंत्रएवत्यागः। स
र्वहुतमेककपालं ध्रुवायलौमायस्वाहेति। सर्वहुतंयथास्यात्तथैककपालंजुहोतिकेनमंत्रे
णेत्यत उक्तं। ध्रुवायलौमायस्वाहेति। इदं ध्रुवायलौमाय। ततश्चरुधानासक्तुभ्यः स्विष्टकृ

गृ॰ घ॰ त्वअग्नयेस्विष्टकृतेस्वाहा। इदमग्नयेस्विष्टकृते। प्राशानांतेसक्तूनामेकदेशं शूर्पेन्युप्य। ततो
महाव्याहृत्यादिदक्षिणादानांते। सक्तूनामित्युपलक्षणं। दर्वी दर्वी। कंकतः अंजनानुलेप
नंस्त्रजश्चेति। सक्तैकदेशाश्चबलित्रयपर्याप्ताः। शूर्पेचशरैषीकार्वेशान्यतममये। न्युप्यस्थाप्ये
त्यर्थः। उपनिष्क्रम्यबहिः शालायाः स्थंडिलमुपलिप्योल्कायांध्रियमाणायामांतरागमते
23 त्युक्त्वावाग्यतः सर्पानिवनेजयत्याग्नेयपांडुपार्थिवानां सर्पाणामधिपतेवनेनिक्ष्व श्वेतवाय
वान्तरिक्षाणां सर्पाणामधिपतेवनेनिक्ष्वाभिभ्रः सौर्यादिव्यानां सर्पाणामधिपतेवनेनि
क्ष्वेति। उदकंलौकिकाग्निंदीप्तामुल्कांतस्याः गृहीतारंचाहूयोपनिष्क्रम्योल्कायांध्रियमाणा
यामांतरागमतेत्यन्यान्प्रत्युक्त्वाअंतरालंचयजमानावसथ्ययोः वाग्यतः सर्पानित्यादिनिगद
व्याख्यानं। अवनेजनंप्राकुसेस्यं। यथावनिक्तंदर्व्योपघात सक्तून्सर्पेभ्योबलिं हर
त्याग्नेयपांडुपार्थिवानां सर्पाणामधिपतएषतेबलिः श्वेतवायवांतरिक्षाणां सर्पाणा
मधिपतएषतेबलिरभिभ्रः सौर्यादिव्यानां सर्पाणामधिपतएषतेबलिरिति। अवनिक्तमन
होमवत्प्रागाः २

तिक्रम्य। दर्व्याश्चादेशमितया। उपघातमित्यस्यो पस्तर्वस्य हं तेर्ग्रहणार्थता। स्रुवेणोपहत्याज्य
मितिवत्। अवनेज्य पूर्ववत्कंकतैः प्रलिखत्याग्नेयपांडु पार्थिवानां सर्पाणामधिपते प्रलि
खस्व श्वेतवायव्यांतरिक्षाणां सर्पाणामधिपते प्रलिखस्वाभि रूः सौर्य दिव्यानां सर्पाणा
मधिपते प्रलिखस्वेति। कंकतानि आदेशमात्राणि। त्रीणि वैकंकतानि। तैः क्रमेण प्रलेखनं
कंड्वयनेन रेखाकरणं। अंजनानुलेपनं अंजस्वांजस्वानुलिपस्वानुलिपस्व स्रजोपिनह्यस्वेति। अंज
नं त्रैककुदं लौकिकं वा। अनुलेपनं चंदनं। स्रजः सुरभिपुष्पमाला। आग्नेयेत्यादिलिङ्गैस्त्रि
भिर्मंत्रैः। अंजस्वानुलिंपस्व स्रजोपिनह्यस्वेत्यंतैः प्रतिमंत्रं प्रतिबलिमेकैकं ददाति क्रमेण। स
क्तुशेषं स्थंडिले न्युप्योदपात्रेणोपनिनीयोपतिष्ठते नमोस्तु सर्पेभ्य इति तिसृभिः। सया
वत्कामयेत न सर्पा अभ्युपेयुरिति तावत्संततयोदधारया निवेशनं त्रिः परिषिंचन्परीया
दप श्वेतपदाजहीति द्वाभ्यां। यावद्देशं गृहादि। निवेशनं गृहं। अपश्वेतपदाजहीति द्वाभ्यां स्वाहा
काररहिताभ्यां परिषिंचन् त्रिः परीयात् सकृन्मंत्रेण द्विस्तूष्णीं। दर्वीं प्रपंचिश्य प्रक्षाल्य प्रतप्य

२ ह॰

२४

प्रयच्छति। प्रतपनमुल्कायां। सन्निधानात्। दानंचोल्काधाराय। द्वारदेशेमार्जयंत आपोहिष्ठे
तितिसृभिः। मार्जयंत इतिवहुत्वसामर्थ्यात्पत्नी यजमानोल्काधाराः। अनुगुप्तमेतं सक्तु
शेषंनिधाय। अनुगुप्तं सुरक्षितंस्थाप्यवर्हिर्होमादिब्राह्मणभोजनांतंसमापयेत्। ततोस्त
मितेग्निंपरिचर्यदर्व्योपिधानं सक्तून्सर्पेभ्योवलिं हरेदाग्रहायण्याः। ततः श्रवणाकर्म्मा
नंतरं। सक्तुस्य इतिकर्कोपाध्यायाः। अग्निमावसथ्यं। आग्रहायण्यवधिनित्यत्वसत्त्वनार्थो
स्यासः। कर्मोपलक्षकमाग्रहायणीपदं। तं हरंतंनांतरेणगच्छेयुः। आवसथ्यवलिदानस्थ
लयोरंतरेणअन्येनगच्छेयुः। दर्व्याचमनंप्रक्षाल्यनिदधाति। भूमावितिशेषः। आद्यवलिदा
नविहितदानापवादः किंतु भूमौनिदध्यात्प्रत्यहीयवलिदानेदर्वीसूर्पंच। आचमनंमुखं। व
लिदानंचप्रैषावनेजनाद्युक्तप्रकारेण। सूर्पदर्व्योर्भूमिनिधानांतं। अस्पृश्यमानमाग्रहाय
णीयसमयावधिश्रवणाकर्मांगवलिदानमतिधायेदानींप्रकृतमाह। धानाः प्राश्नंत्यस
ं स्पृताः। असंसृताः दंतैरस्पृष्टाः। ततोब्राह्मणभोजनं। वलिदानसमाप्त्याग्रसमाप्तेक

र्म्मणीदक्षपंचवान्ब्राह्मणान्भोजयेदित्यर्थः। श्रावण्यां श्रवणाकर्म्म सर्वाङ्गे प्रान्ते वैश्वदेवान्। त
तदनंतरं वैश्वदेवः॥ ॥चतुर्द्दशी कंडिका॥ ॥१४॥ प्रौष्ठपद्यामिन्द्रयज्ञः। प्रौष्ठपदी सा इयम्
पौर्णमासी। इंद्रयज्ञ इति कर्म्मनामधेयं। अत्रापि सर्वं मातृपूजाभ्युदयिके। इन्द्रपदादिन्द्रा
यैकाहुतिहोमो लभ्यते। पायसमैन्द्रं श्रपयित्वा हूपांश्च। पायसे स्त्रीत्वाज्यभागाविष्ट्वाज्या
हुतीर्जुहोति। परिसमूहनाद्याज्यभागाविष्ट्वा पंचाज्याहुतीः। इंद्रायेन्द्राण्या अजायैकपदे
हिर्बुध्न्याय प्रौष्ठपदाभ्यश्चेति। इंद्राय स्वाहा इदमिन्द्रायेत्यादि। यथादेवतं त्यागाः। इंद्राण्यै स्वा
हा। अजायैकपदे स्वाहा। अहिर्बुध्न्याय स्वाहा। प्रौष्ठपदाभ्यः स्वाहा। स्थालीपाकेन। इंद्राय ततः १
स्वाहा। इदमिंद्राय। अग्नये स्विष्टकृते स्वाहा। इदमग्नये स्विष्टकृते। महाव्याहृत्यादि दक्षिणा
दानांतं। मरुद्भ्यो बलिं हरति। ननु कथं होमाभाववत्यत आह। अहुतादो मरुत इति श्रुतेः।
अहुतं अदंतीत्यहुतादः। बलिदाने नैवादंतीत्यर्थः। केत इत्यत उक्तं मरुत इति। आश्वत्थे
षुपलाशेषु बलीन्दद्यादिति शेषः। अन्यत्र भ्रमो दृष्टत्वात्कथमेवमत आह। मरुतो

गृह्य०

वत्येन स्पृरिति वचनात्। शुक्र ज्योतिरिति प्रतिमंत्रं। नमस्कारांतैः प्राङ्कसंस्थमुदग्वा
बलिदानं। विमुखेन चमनसा। उग्रस्थूलीमश्चेत्यनेनविमुखेनमुखव्यापार रहितेन। पु
नर्मनसामनोव्यापारसहितेन। बलिंदद्यादितिशेषः। कृतणतिर्मत्रैरत आह। ना
मान्येषामेतानीतिस्कृतेः। एषांमरुतांएतानिशुक्र ज्योतिश्चेत्येवमादीनि। इंद्रंदैवी रि
तिजपति। ततोवहिर्होमादि। ब्राह्मणभोजनांतं। तदनंतरं वैश्वदेवः। पंचदशी कंडिका॥१५॥
25
आश्वयुज्यांपृषातकाः। कर्मनामधेयंपृषातकाइति। तदाश्वयुज्यांपौर्णमास्यांभवति। कर्त्त
व्यतामाह। पायसमैन्द्रं श्रपयित्वादधिमधुघृतमिश्रंजुहोतीन्द्रायेन्द्राण्यायाश्विभ्यामाश्व
युज्यैपौर्णमास्यैशरदेचेति। मात्रमत्राभ्युदयिकेकृत्वाब्रह्मासनास्तरणाद्याज्यभागांतेवि
शेषः। आसादनेदक्षिणायाः प्राग्दधिमधुघृतानामासादनं। पयसश्च। चरुग्रहणेइंद्रायजु
ष्टंगृह्णामि। प्रोक्षणेत्वाशब्दः। आज्यभागानंतरंपायससंस्थालीपाकं दधिमधुघृतैर्मिश्रये
त्। ताहशंकाभ्योजुहोतीत्यतउक्तं इंद्रायेन्द्राण्यइत्यादि। तद्यथा। स्थालीपाकेकदेश

होमः। इंद्रायस्वाहा। इदमिन्द्राय। इंद्राण्यैस्वाहा। इदमिन्द्राण्यै। अश्विभ्यां स्वाहा। इदमश्वि
भ्यां। आश्वयुज्यैपौर्णमास्यैस्वाहा। इदमाश्वयुज्यैपौर्णमास्यै। शरदे स्वाहा। इदं शरदे। अग्नये
स्विष्टकृते स्वाहा। इदमग्नये स्विष्टकृते। प्राशनांते दधिपृषातकमंजलिना जुहोति। ऊनं मे पू
र्यतां पूर्णं मे मा वि गात्स्वाहेति। पृषातकं पृषदाज्यं। दधिपृषदाज्यमपयः। तथा च पयसा मिश्रितं
पृषदाज्यं संहतांगुलिनांजलिना मनुष्यतीर्थेन जुहोति। ऊनं मे पूर्यतामिति मंत्रेण। इदम
ग्नय इति त्यागः। ततो महाव्याहृत्यादि दक्षिणादानांतं। प्राशनांत इत्यस्य स्वत्वावयवस्याचा
र्यमतेऽनुत्तरसूत्रं संबंधात्। यन्मते यथाक्रतं तन्मते दक्षिणादानांते दधिपृषातकहोमः।
दधिमधुघृतमिश्रममात्या अवेक्षंत आयात्विंद्र इत्यनुवाकेन। ततो दक्षिणादानांते। दधिमधुघृ
तानां च रौप्यक्षेपः। तैर्मिश्रितं चरुं अमात्याः यजमानगृह्याः पुत्रादयः आयात्विन्द्र इत्यनुवा
केन यूयं पात स्वस्तिभिः सदा न इत्यंतेनावेक्षंते। अनुवाकांतेऽवेक्षणमंत्रांते कर्मादि रि
स्तु के। ततो बर्हिर्होमादि ब्राह्मणभोजनांतं। तदनंतरं वैश्वदेवः। मातृभिर्वत्सान्त्सं सृजंता।

ꣳ रात्रिं। प्रभातकात्कृत्स्नां आश्वयुजीपौर्णमासीं रात्रिं अतिव्याप्य वत्सानात्मनो मातृभिः
सꣳसृज्य स्थातव्यं। आग्रहायणीं च। आग्रहायणीकर्म चेत्कृतं तदा तस्यामपि रात्रौ मातृभि
र्वत्सान्संसृजेदित्यर्थः। अयं च वत्ससंसर्गः कर्मांगं। ततो ब्राह्मणभोजनं। समाप्ते कर्मणि
प्रातरित्यर्थः॥२६॥ ॥षोडशी कंडिका॥ ॥ अथ सीतायज्ञः॥ ॥ उच्यत इति सूत्रशेषः। स चा
यं कर्षं कुर्वतः कृत्वा वसथ्यस्य भवति। व्रीहियवानां यत्र यत्र यजेत तन्मयꣳ स्थालीपाकꣳ
श्रपयेत्। अस्यार्थेन यत्रपदेन कालदेशरूपे अधिकरणे। यत्र काले व्रीहियवयोरुत्पत्तिर्यत्र
देशे चासौ यज्ञः। तत्र तन्मयं। व्रीहिकाले व्रीहिमयं यवकाले यवमयं। कामादौ ज्ञानो न्यत्रा
पि व्रीहियवयोरेवान्यतरꣳ स्थालीपाकꣳ श्रपयेत्। कामात् इच्छातः। अन्यत्रापि उक्तरूपदे
शकालो विहायसीतायज्ञेन ईजानः। व्रीहियवयोरित्यत्रैवकारेण द्रव्यांतरे साधनत्वव्यवच्छे
दः। ननु आकल्पत्रादेवतत्वात् आद्यर्थोऽस्यारं लइत्याह। न सर्वचोदितत्वादिति। नन्वेतदारं घ
टते। आसन्नसमयोत्पन्नयोर्व्रीहियवयोः साधनत्वावगमात्समयांतरे च तद्बलवादास

न्नसमयोत्पन्निकइव्यांतरसाधनत्वावगमसंदेहः। कुतः समयांतरेव्रीहियवयोरसंप्लवादनु
त्पन्नेरित्याह संदेहासंप्लवादिति। विनिवृत्तिः विशेषेणकामिकार्थतावोधकसूत्रेतयोरुपादान
महिम्नासंदेहनिवृत्तिरित्यर्थः। केचित्तुकामिकत्वंप्रतावोधकसूत्रार्थमन्यथाप्रोचुः। अन्य
त्रपक्षादिप्रभृतिषुकामाद्व्रीहियवयोरित्यन्वयः। नसर्वचोदितत्वात्संदेहः। नात्रसंदेहः यतः
सर्वचोदितमेवैतत्। सर्वंव्रीहीन्यवान्वाहविषीतिपरिलाषास्त्रे। अतोनवक्तव्यमेतत्। व्रीहि
यवयोरेवेति। असंप्लवाद्विनिवृत्तिः। यावस्यवरोरसंप्लवाद्विनिवृत्तिः। नन्वशास्त्रात्। असंप्लवश्च
नवश्राबितांतरोष्मपाकविशदसिद्धतंडुलपाकेचरुशब्दप्रयोगदर्शनात्। क्षेत्रस्यपुरस्ताद्दुत्त
रतोवाशुचौदेशेकृष्टेफलानुपरोधेन। शुचौपवित्रे। कृष्टेफालेनविलिखिते। फलस्यसस्यस्य
उपरोधः वाधः। नउपरोधः। अनुपरोधः। तेनक्षेत्रात्प्राग्दीच्यांवासीतायज्ञः। शुचौकृष्टेकर्तव्यः
ग्रामेवोलयसंप्रयोगात्। वाशब्दः सर्वक्रिया वृत्तौ। यः कामात्करोति। तेनग्रामेएवकर्तव्यः। कु
तः। उभयथासंप्रयोगात्। कृषिंकुर्वतः क्षेत्रेइतरस्यग्रामइति। केचित्तु। ग्रामेवेत्येतत्पक्षं।

ग्र्ह्य॰

27

तस्मुपन्यस्तं। उत्तरयं ग्रामः ह्येवं च अधिकरणतया संप्रयोक्तुं संवक्तुं शक्यं। तन्मते कृषिं कुर्वत
एव साग्नेरत्राधिकारः। अविरोधात्। व्यवस्थिताधिकरणानुष्ठानपक्षे विकल्पपक्षेप्यन्यत
रोपादानं न विरोधः स्यादित्यर्थः। यत्र अपयिष्यन्नुपलिप्तउद्धतावोक्षिते ग्निमुपसमाधाय त
न्निम्भ्रे ई लैंस्त्री ल्वा ज्यलागाविह्या ज्याहुती र्जुहोति। पुनर्भः संस्कारोक्ते कृष्टेपि प्राप्त्यर्थादि
ति केचित्पायाभनिरग्नेरप्याधिकारं सूचयितुं लौकिकाग्निप्राप्त्यर्थेत्यन्ये। साग्नेरेषामाधि
क्यं संला रव दित्यपरे। अग्निस्थापनाद्या ज्यलागांते विशेषः। तन्निम्भ्रे ई लैंड्री हिकालेड्री हिम्भ्रि
अः यवकालयवमिभ्रे ई लैं रे ःपरिस्तरणं। अपरः अप्रकृतः सिद्धस्थालीपाकः आसाद्यः तं
डुलानंतरं। उपकल्पनीयवलिपट्केच। यहणोसी तायेप्रजायेशमायेभ्यस्येज्जुष्टं। प्रोक्ष
णेत्वा। आज्यलागाविह्या ज्याहुती र्जुहोती सुक्तं। ता राह। पृथिवी द्यौः प्रदिशो दिशो यस्मै द्यु
भिरावृताः। तमिन्द्रमिह मुपह्वये शिवा नः संतु हेतयः स्वाहा। इदमिन्द्राय। यन्मे किंचिदुपेप्सि
तमास्मिन्कर्मणि वृत्रहन्। तन्मे सर्वं समृध्यतां जीवतः शरदः शतं स्वाहा। इदमिन्द्राय।

संपत्तिर्भूतिर्भूमिर्वृष्टिर्ज्यैष्ठ्यं श्रैष्ठ्यं श्रीः प्रजामिहावतु स्वाहा। इदमिन्द्राय। यस्या भावे वैदिकलौकिकानां भूतिर्लवनिकर्मणां। इन्द्रपत्नीमुपह्वये सीतां सा मे त्वनपायिनी भूयात्कर्मणि कर्मणि स्वाहा। इदमिन्द्रपत्न्यै। अश्वावती गोमती सूनृतावती बिभर्ति या प्राणभृतो अतन्द्रिता। खलमालिनीमुर्वरामस्मिन्कर्मण्युपह्वये ध्रुवां सा मे त्वनपायिनी भूयात्स्वाहेति। इदं ध्रुवायै। इति शब्दः आज्याहुतिसमाप्त्यर्थः। स्थालीपाकस्य जुहोति सीतायै यजायै शमायै भूत्या इति। चतस्रः आहुतीः स्थालीपाकस्य। सीतायै स्वाहा। इदं सीतायै। इत्यादि। ततः सिद्ध स्थालीपाकेन लाङ्गलयोजनदेवताभ्यः अष्टावाहुतयः। इन्द्राय स्वाहा। इदमिन्द्राय। पर्जन्याय स्वाहा। इदं पर्जन्याय। अश्विभ्यां स्वाहा। इदं०। मरुद्भ्यः स्वाहा। इ०। उदलाकाश्यपाय स्वाहा। इ०। स्वातिकारियै स्वाहा। इ०। सीतायै स्वाहा। इ०। अनुमत्यै स्वाहा। इ०। प्रकृता प्रकृतयो रुभयोः स्विष्टकृत्। अग्नये स्विष्टकृते स्वाहा। इदमग्नये स्विष्टकृते। एताश्च देवताः सीतायज्ञे चेत्याह देशाद त्र प्रधानचरुहोमानन्तरं तद्धोमः। प्रधानचरुबलिदानानन्तरं बलिदानं च। मन्त्रवत्त्वं दानमेकेषां। एके

यांमंतेमंत्रवत्। स्वाहाकाररहितं। प्रदानंदेवतोद्देश्यकंप्रदानं। तत्र हेतुमाह। स्वाहाकारप्रदा
नाइतिश्रुतेः। वषट्कारेणवावैस्वाहाकारेणवेत्यादौवषट्कारसहभावः प्रतीयते। प्रकृतेच
वषट्कारव्यतिरेकस्यस्वसहभूतस्वाहाव्यतिरेकव्याप्तत्वान्मंत्रवत्प्रदानमितिप्राप्तआह।
विनिवृत्तिः। मंत्रवत्प्रदानपक्षस्यापिविशेषः। उपविष्टहोमाः स्वाहाकारप्रदानाजुहोतयइत्युक्त
२८ त्वात् पक्ष्यादिप्रभृतीनांजुहोतित्वात्स्वाहाकारेण होमइत्यर्थः। महाव्याहृत्यादिदक्षिणा
दानांतंस्विष्टकृदंते। स्मरणशेषकुशेषुसीतागोयज्ञस्योबलिंहरति। स्मरणावशिष्टकुशान्
क्षेत्रस्यप्रतिदिशमास्तीर्यते पुसीतागोयज्ञस्योबलिदानं। संस्कृतेनयज्ञकृतचरुणा। पुर
स्ताद्येतआसतेसुधन्वानोनिषंगिणः। तेत्वापुरस्ताद्गोपायंत्वप्रमत्ताअनपायिनोनमएषांक
रोम्यहंबलिमेभ्योहरामीममित्यथदक्षिणतोनिमिषावर्मिणआसनेनेत्वादक्षिणतोगोपायं
त्वप्रमत्ताअनपायिनोनमएषांकरोम्यहंबलिमेभ्योहरामीममित्यथपश्चादाभुवःप्रभुवो
भूतिर्भूमिःपार्ष्णिःशुनंकरिः। इदमाभ्वेभ्यः अभूत्यभूत्यैभूम्यैपार्ष्ण्यैशुनंकर्यै। तेत्वाप

श्राद्धोपायंत्वत्रमत्ताश्चनपायिनोनमएषांकरोम्यहंवलिमेभ्योहरामीममित्यथोत्तरतोली
मावायुसमाजवे। तेत्वोत्तरतः क्षेत्रेखलेगृहे ध्वनिगोपायंत्वत्रमत्ताश्चनपायिनोनमए
षांकरोम्यहंवलिमेभ्योहरामीममिति। प्रकृतादन्यस्मादाज्यशेषेएवचरुपूर्ववद्बलिकर्म। प्रकृ
तःदेवतोद्देशपकग्रहणप्रोक्षणादिसंस्कृतः तस्मादन्यः सिद्धोपात्तः तस्मात्। स्थाल्याज्यशे
षेएवचरुपूर्ववत्। लांगलयोजनवत्। प्राकृसंस्थमुदक्संस्थंवावलिकर्म। वलिदानं। तद्य
था। इंद्रायनमः। पर्जन्यायनमः। अश्विभ्यांनमः। मरुद्भ्योनमः। उदलाकाश्यपायनमः। स्वा
तिकार्यैनमः। सीतायैनमः। अनुमत्यैनमः। यथादेवतंत्याग्यः। स्त्रियश्चोपयजेरन्नाचरितत्वा
त्। इह्वास्त्रियोगृह्याः इंद्रादीन्बलिपटकेनोपयजेरन्। वलिपटकंचवैणवपात्राधिकरण
कंकुल्माषोदनं। कुतआचरितत्वात्। प्राचीनस्त्रीलिलंगिलयोजनदेवताभ्यः इंद्रादिभ्योव
लिदानस्याचरितत्वादित्यर्थः। ततः संस्रवप्राशनाद्युपयमनप्रक्षेपांतं। सर्वस्थितिकर्माणि
ब्राह्मणान्भोजयेत्। दशब्राह्मणान्भोजयेद्दशेतिपरि शिष्टात्। कांडसमाप्तिस्वस्तिकाद्विरुक्तिः

वैश्वदेवः॥ ॥छ॥ ॥इति श्रीपंडितनृसिंहात्मजपंडितविश्वनाथकृतायां गृह्यसूत्रव्या
गृह्य ख्यायां द्वितीयं काण्डं समाप्तिमगमत्॥ ॥छ॥ ॥अनाहिताग्नेर्नवप्राशनं। नन्वाहिताः अ
ग्नयो गार्हपत्यादयो येनासौ कृतावसथ्यः तस्य। नवस्य संपन्नसमयोत्पन्नस्य प्राशनं प्रोच्य
२९ त इति सूत्रशेषः। तच्च शरद्वसंतयोः। यस्मिन्नाग्रयणं कुर्यादिति तत्तत्संभवं। धान्यं तं नव
मित्याङ्कुरवाक्यं पुरातनं। प्राड्कालात्परं शरदाग्रयणेन वं। अ ऊर्ध्वं वसंतान्निष्पन्नं वसंता
ग्रयणेन नवं। व्रीहियागस्य याः कालेपक्वा व्रीहेण संस्कृताः। शेषाया वेनयागेन यदि यागा
त्पुराक्कचित्। ओषधिं लङ्घयेत्कांचित्तत्र वैश्वानरः स्मृतः। तथा च व्रीह्युत्पत्तिसमानकालो
त्पन्नौषधिलङ्घनाधिकारो व्रीह्याग्रयणेन। यवोत्पत्तिसमानसमयोत्पन्नौषधिलङ्घनाधि
कारो यवाग्रयणेनेति श्रीनंदयाज्ञिकाः। तथा। मनुष्यैरुपजीव्यानां पशुतिर्श्वयथायथं।
तृणगुल्मलतापुष्पपत्रादेरप्यलङ्घनं याज्ञिकमते। तन्मते प्रियंगुकोद्रवादेरप्यलङ्घनं।
एवं चाग्रयणमकृत्वा नवान्नं अग्नौ न होतव्यं। ब्राह्मणेभ्योपि न देयं। आग्रयणे होमनिषे

घात्।तथाहि।अथयोऽकृत्वानवान्नंप्राश्नीयादग्नौवागमयेत्तातच्चप्रायश्चित्तिः।सोऽग्नयेव्रतप
तयेचरुंनिर्वपेदिति।ब्राह्मणेऽस्योदाननिषेधःश्राद्धकल्पे।अयंचदर्शपत्नोःसमोनिषेधः।केचि
त्तुव्रीहियवयोरेवयागसाधनतयातयोरेवलक्षणंनिषिद्धमाहुः।यागेनक्रियतेयेऽस्यगोधू
मैर्माषिकोद्रवैः।तेषामिहसर्वेदेतत्प्राशनंकेचिदब्रुवन्।नवशब्दस्यसामर्थ्यात्सामान्येनमतंत्वि
दं।वाक्यशेषविरोधाच्चयदेतन्नमतंमम।आसन्नोयजमानश्चदेवानामेषपद्यते।तस्मादन्नमदं
त्वस्यंयवव्रीह्यादिकेमतैरवे।तस्मान्नदेववर्ज्यंस्यादन्यत्कामंतुलक्षयेदिति।अस्यातिक्रमेऽग्नयेवै
श्वानरायचरुर्भवति।अत्रापिप्रथमप्रयोगेमातृपूजाभ्युदयिकेभवतः।अन्वारंभणीयादेव
ताकस्थरुश्चभवति।अनुष्ठानंच।व्रीहेःशरदंतर्गतपौर्णमास्यमावास्यायां।यावस्यतुवसंतांत
र्गतायामिति।अत्रोत्पन्नयोर्व्रीहियवयोर्होमहेतुत्वादयतनत्वेप्याग्रयणपर्वावाच्यतानास्तीत्ये
तद्दिक्कंवचः।अनाग्रयणस्यचपर्वानिनुष्ठानमेतदपिवाललालनं।नाविपद्धेष्क्रियाःस्युःसम
स्विष्टारादितस्यसाधारणत्वादिति।कथंकुर्यादतआह।नवं॰स्थालीपाकं॰श्रपयित्वाज्यभा

गृह्य०

30

गाविष्णूज्या आहुती जुहोति शतायुधाय शतवीर्याय शतोतयेऽभिमातिषाहे। शतंयोनः शरदो
जीजानिन्द्रो नेषदति दुरितानि विश्वा स्वाहा। ये चत्वारः पथयो देवयाना अंतरा द्यावापृथिवी वि
यंति। तेषां यो अज्यानिमजीजिमावहात्तस्मै नो देवाः परिधत्तेह सर्वे स्वाहेति। प्रथमप्रयोगे मातृश्र
ज्ञाभ्युदयिके कृत्वा पूर्ववदन्वारंभणीयेष्टिदेवताकं चरुं कृत्वा पर्वादिने पुण्येऽह्नि वा व्रीहियव
योरन्यतरेण स्थालीपाकं परिभाषोक्तविधिना श्रपयित्वा पक्वाज्यभागानंतरं शतायुधायेति
द्वाभ्यां मंत्राभ्यां द्वे आहुती जुहोति। तत्र विशेषः। इंद्राग्निभ्यां विश्वेभ्यो देवेभ्यो द्यावापृथिवीभ्यां
जुष्टमिति ग्रहणे। प्रोक्षणे त्वा शब्दाधिकः। इदमिन्द्रायेत्यादि त्यागः इदं सर्वेभ्यो देवेभ्य इति द्वितीयस्याः
स्थालीपाकस्याग्रयणदेवताभ्यो हुत्वा जुहोति स्विष्टकृते च स्विष्टमग्ने अभितत्पृणीहि विश्वांश्च दे
वः पृतना अविष्यक्रु। सुगं तु पंथां प्रदिशन्न एहि ज्योतिष्मद्ध्येह्यजरन्न आयुः स्वाहेति। शतायुधा
येत्येतदाहुति हुत्वानंतरं स्थालीपाकेन आग्रयणस्य देवता इन्द्राग्नी विश्वेदेवा द्यावापृथिव्यः
ताभ्यः इन्द्राग्निभ्यां स्वाहा। इदमिन्द्राग्निभ्यां विश्वेभ्यो देवेभ्यः स्वाहा। इदं द्यावापृथिवीभ्यां स्वा

ह्यादं। एवंतास्यः हुत्वा स्विष्टमग्निरिति मंत्रेणाज्याहुतिं जुहोति। ततः स्थालीपाकात्स्विष्टकृ
ते स्वाहेति हुत्वा। त्यक्त्वा पुनः स्विष्टमग्न इति मंत्रेणाज्याहुतिं चकाराज्जुहोति त्यर्थः। स्विष्टकृद्हो
मस्योत्तरयतत्राज्याहुतीरवत इत्यर्थः। अथ प्राश्नात्यग्निः प्रथमः प्राश्नातु सहि वेदयथा हविः॥
शिवा अस्मभ्यमोषधीः कृणोतु विश्वचर्षणिः। तद्यान्नः श्रेयः समनैष्ट नयि देवास्त्वयावसेनस
मशीमहित्वा। सनो मयोभूः पितो आविश शं तोकाय तनुवे स्योन इत्यन्नपतीयया वा। ततो मह
व्याहृत्यादि प्राजापत्यन्ता हुत्वा नंतरं संस्रवं प्राश्नात्यग्निः प्रथमः प्राश्नात्विति ऋग्भ्यां मंत्रेण शं
तोकाय तनुवे स्योन इत्यं तेन। वा अथवा अन्नपतिशब्दो विद्युतेयस्यां सेयमन्नपतीया तया। अन्नप
तेयस्य नो देहीत्यनयर्चा। प्राशनं संस्रवस्य। अथ यवानामेतमु त्यं मधुना संयुतं यवं सरस्वत्या
अधिवनाय चकृषुः। इंद्र आसीत्सीरपतिः शतक्रतुः कीनाशा आसन्मरुतः सुदानव इति। यवाग्र
यणे त्वेतमुत्यं मधुना संयुतमिति मंत्रेण सुदानव इत्यं तेन यवानां संस्रवं प्राश्नातीत्यर्थः। श्यामाका
ग्रयणे तु तत्स्थाने प्राशनं। सोमो यज्ञेषु गृह्णामीति यह्णे। प्रोक्षणे त्वाशब्दः। सोमाय स्वाहेति स्था

लीपाकहोमः। यथादेवतं त्यागः। अन्यद्वी ह्याग्रयणवत्। केचित्तु आज्यभागोत्तरमाज्याहु
तिद्वयं स्विष्टकृद्धोमात्प्रागुत्तरमाज्याहुतिद्वयमेवमाहुतिचतुष्टयं नेच्छंति। ततो ब्राह्मणभो
जनं। बर्हिर्होमादिकर्म्मापवर्गांतं दशपंच वा ब्राह्मणान्भोजयेदित्यर्थः। ततो वैश्वदेवः॥ ॥ तती
यस्य प्रथमा॥२॥ ॥मार्गशीर्ष्यां पौर्णमास्यामाग्रहायणीकर्म्म कर्त्तव्यमिति सूत्रशेषः।
स्थालीपाकं श्रपयित्वा श्रवणावदाज्याहुती हुत्वा परा जुहोति। अत्रापि मातृपूजाभ्युदयि
कं कृत्वा ब्रह्मासनास्तरणादि परिभाषोक्तविधिना स्थालीपाकं पक्त्वा। तत्र विशेषः। पात्रासा
दनानंतरं शंकुशोभस्यासादनं। उल्का। धारश्चऽदपात्रं। दर्वी। कंकतत्रयं। अंजनानुलेपनं स्र
जश्च। स्थालीपाकग्रहणे सोमाय मृगशिरसे मार्गशीर्ष्यै पौर्णमास्यै हेमंताय त्वा जुष्टं गृह्णामि।
प्रोक्षणे त्वाथशब्दः ततः श्रवणाकर्म्मवदाज्यभागानंतरं अपश्वेत पदा न वै श्वेतस्येति मंत्राभ्यां
आज्याहुती हुत्वा परस्तात्स्थाज्याहुतीः जुहोति। तासां मंत्रानाह। यां जनाः प्रतिनंदंति
रात्रीं धेनुमिवायतीं। संवत्सरस्य या पत्नी सा नो अस्तु सुमंगली स्वाहा। संवत्सरस्य प्रतिमाया

ताᳬ रात्रीमुपास्महे । प्रजाᳬ सुवीर्यं कृत्वा दीर्घमायुर्व्यश्नवै स्वाहा ॥ संवत्सराय परिवत्सरा
येदावत्सरायेद्वत्सराय वत्सराय कृणुत बृहन्नमः । तेषां वयᳬ सुमतौ यज्ञियानां ज्योग्जी
ता अहताः स्याम स्वाहा । ग्रीष्मो हेमंत उत नो वसंतः शिवा वर्षा अभया शरन्नः । तेषामृतूनाᳬ
शतशारदानां निवात एषामभये वसेम स्वाहेति । इदं रात्र्यै । इदं संवत्सराय परिवत्सरायेदाव
त्सरायेद्वत्सराय वत्सराय । ३ इदं ग्रीष्माय हेमंताय वसंताय वर्षाभ्यः शरदे । ४ । स्थालीपाकस्य
जुहोति सोमाय मृगशिरसे मार्गशीर्ष्यै पौर्णमास्यै हेमंताय चेति । स्वाहांतैरेतैस्त्रयोदशभिः ते:
प्रतिमंत्रं होमः । त्यागास्तु । इदं सोमायेत्यादि यथादैवतं । प्राशनांते सक्तुशेषᳬ शूर्पे न्युप्याप
निष्क्रमण प्रभृत्या मार्जनात् । ततः स्विष्टकृदादि दक्षिणादानांते सक्तुशेषं शूर्पे प्रक्षिप्योपनि
ष्क्रम्य बहिःशालायाः स्थंडिलमुपलिप्येत्यादि द्वारदेशे मार्जयंत आपो हि ष्ठेति तिसृभिरित्यंत
श्रवणाकर्मवत् । सया बल्कामयेत न सर्पा अभ्युपेयुरिति तावत्संततयोदधारया निवेशनं त्रिः
परिषिंचन्परीयादित्येतद्वर्जं । मार्जनांत उत्सृष्टो बलिरित्याह । ततः उत्सृष्टो बलिरिति प्रैषमु

२५ चार्यवर्हिर्हेमादिब्राह्मणभोजनांतं। तदनंतरं वैश्वदेवः। आग्रायणी चेति सूत्रादग्रमिति वत्स
संसर्गः॥ ॥इत्याग्रहायणी कर्म्म॥ ॥अवरारोहमाह॥ ॥पश्चादग्नेः स्वस्तरमास्तीर्याहतं चवा
सः। आस्तीर्येत्यनुषंगार्थश्चकारः। तत्रमातृमज्जाभ्युदयिके कृत्वा सायमग्निं परिस्तीर्याग्नेः
पश्चात्यां कौशं स्रस्तरं प्रागुदगग्रं वास्तीर्य तदुपरि अहतं वासश्च तथैवास्तीर्येत्यर्थः॥ वैश्वदेवा
त्प्राक्॥ आरोहणं च दंपत्योः गर्तरूपाणां च॥ कीदृशादित्यत आह। आप्लुता अहतवाससः प्र
त्यवरोहंति दक्षिणतः स्थालीजायोत्तरा यथाकनिष्ठमुत्तरतः। आप्लुताः कृतस्नानाः स्नानं
चाद्भिः। सकृद्धौतं नवं श्वेतं सदशं यंत्रधारितं। अहतं तद्विजानीयात्सर्वकर्म्मसु पावनं। यत्तु
अहतं यंत्रनिर्मुक्तमुक्तं वासः स्वयंभुवेति। शास्त्रं स्यात्तद्विवाहादौ तावत्कालं न सर्वदेति। तेन
सकृद्धौताद्युक्तलक्षणे अहतेवाससी येषां ते तादृशाः। उत्तरत इत्यनेन प्रत्यवरोहंतीत्यस्या
न्वयः। किं कृत्वा प्रत्यवरोहंतीत्यत आह। दक्षिणतो ब्रह्माणमुपवेश्योत्तरत उदपात्रं श
मीशाखासीताल्लोष्ठाश्मनो निधायेति। अनुज्ञादानस्य चेतनसा ध्यातां प्रतीत्यैतद् दक्षिण

तो ब्रह्माणमुपवेश्येतत्सूचितं। दक्षिणत्वं चाग्न्यपेक्षया। उत्तरत्वमपि। उदपात्राद्यदृष्टार्थं॥
अग्निमीक्षमाणो जपत्ययमग्निर्वीरतमोयं भगवन्नमः सुवीर्योयि ध्रं अभ्येद धावनाविति।
जपश्च स्वामिनः। पश्चादग्नेः प्रांचमंजलिं करोति देवीनावमितितिसृभिः। अग्नेः पश्चाद्भागे
संहतास्त्रां ह स्नात्वौ प्रागग्रमंजलिं देवीं नावमितितिसृभिरिर्द्वकंडिकाभिः स्वस्त्ययनंत्वं ताभिः
तेन सार्द्धैकाकंडिकयांजलिं करोतीत्यर्थः। अश्मानमारोहंति। कथमत आह। ब्रह्माणमामंत्र
यते ब्रह्मन्नप्यवरोहामेति ब्रह्मानुज्ञाता ः प्रत्यवरोहंत्यायुष्कीर्त्तियशोबलमिति। प्रत्यवरो
हद्ध्वमित्यनुज्ञादानं। मंत्रपाठश्च दंपत्योरुपनीतकुमाराणां चउपेता जयंति सुहेमंतः सुवस
नः सुग्रीष्मः प्रति धीयतां नः। शिवानो वर्षाः संतु शरदः संतु नः शिवा इति। आयुः कीर्त्तिमि
ति मंत्रेणारूढाः संजातोपनयनाः यजमानपुत्राः सुहेमंत इत्यादिमंत्रं जपंति। स्योना पृथि
विनो भवेति दक्षिणपार्श्वैः प्राक्शिरसः संविशंति। संविशंति स्वपंति। कीदृशाः प्राक्पूर्वे शि
रो येषां ते। स्वामीतोत्तरस्यां जाया ततोयथाकनिष्ठमुत्तरतः पत्न्यानिस्वपंति। पुनः कथं। द

गृह्य० न्हिणपार्श्वैः। उत्तरालिमुखाद्इत्यर्थः। स्योनापृथिविनोभवेतिमंत्रेणसंहितास्थेन। अत्रापिदं
पत्न्योरुपनीतानांचमंत्रपाठः। पत्नीव्यतिरिक्तस्त्रीणांमंत्राभावः। उपोत्तिष्ठंतुदायुषास्वायु
षोत्पर्जन्यस्यशुष्मापृथिव्यांसमधाममलिरिति। ततः उदायुषेतिमंत्रेणयुगपदुत्तिष्ठंति
अस्तरोपविष्टाउत्थानेनावरोहंतीत्यर्थः। एवंद्विरपरं ब्रह्मानुज्ञाताः। एवमुक्तप्रकारेणब्र
ह्मन्प्रत्यवरोहामेत्यास्तरस्य प्रत्यवरोहणमित्यनुज्ञाताउदायुषेत्युत्थानांतंद्विवारमपरंस्त्र
स्तरारोहणमवरोहणांतंकुर्वंति। अधःशायीरंश्चत्रीन्मासान्। चैत्रीपौर्णमासीपर्यंतं। अ
धःखट्वांमुदस्यपथेष्टंवा। अधःशायीरन्नित्यनुषंगः। वाशब्दोविकल्पार्थः। तदनंतरंवै
श्वदेवः॥ ॥इतिप्रस्तरारोहः॥ ॥तृतीयस्यद्वितीया॥ ॥अर्थमाघ्रहायण्यास्तिस्रोऽष्टकाः भवं
तीतिशेषः। विद्यमानत्वेपिचतुर्थ्यास्तिसृषुकृष्णपक्षेषुक्रमेणानुष्ठीयमानत्वात्तिस्रइत्युक्तं।
यद्वास्वतंत्रेकस्यनियोगपर्यनुयोगानर्हत्वात्तिस्रइत्युक्तिः। अष्टकेतिकर्मनामधेयं। तच्च
पंचमहायज्ञपक्षादिवदावृत्तिकर्मसंस्कारकर्मत्वात्। नचास्यासाश्रवणान्नतथेतिवाच्यं।

शांखायनसूत्रेनत्वेवेत्येवकारस्तु शब्दास्यां अष्टकाप्रतियोगिकाद्वृत्तेर्नियमितत्वात्। नच
शाखांतरीयत्वात्तदकिंचित्करमितिवाच्यं। उपवीतपरिधानमंत्रादेरपि शाखांतरीयत्वाद
किंचित्करतापत्तेरित्यलं। अत्रापिमात्रस्तु ज्ञाभ्युदयिकेप्रथमप्रयोगेलब्धतः। केचित्तुनेच्छंति॥
आरंतस्त्रोर्ध्वमाग्रहायण्याइतिसूत्रेणान्मार्गशिरकृष्णाष्टम्यामेव। तेनतत्रशरीरसमर्याद्यसु
द्धिप्रयुक्तानारंले।ष्टकांतरकालेतत्कृद्धावपितदनारंलइत्यवसीयते। समयमुक्तातासांद्रव्य
देवतेआह। ऐन्द्रीवैश्वदेवीप्राजापत्यापित्र्येत्यसूपमा ॐ सशाकैर्यथासंख्यंपित्र्याचतुर्थीतांवदं
ति। अपूपोमंडकः। मांसंमध्यमागवेतिवदंति॥ शाकंकालशाकं। यथासंख्यंपित्र्यांविहाय
यथाक्रमंद्रव्यदेवतासंबंधः। देवतानिरूपणंचतुर्थ्याः कृतं। द्रव्यसमयोवक्ष्यते। प्रथमाष्ट
कापक्षाष्टम्यास्थालीपाकं ॐ श्रपयित्वाज्यलागाविष्ट्वाज्याहुतीर्जुहोति। आग्रहायण्यनंतर
मासदलपक्षस्याष्टम्यांप्रथमाष्टकालवतीत्यर्थः। कथमतआहस्थालीपाकं ॐ श्रपयित्वाज्य
लागाविष्ट्वाज्याहुतीर्जुहोति। तत्रविशेषः पात्रासादनेकर्परिका। चरुस्थालीपिष्टंतंडुलाः।

गृह्य
३४

अग्नयेग्रहणे। इंद्रायजुष्टंपिष्टमयाम्नपः॥ चरुग्रहणेपृथिव्येअंतरिक्षायदिवेदिग्भ्यःप्रदि
ग्भ्यआदिग्भ्योहोरात्राभ्यामङ्गोमरीविभ्योधात्रेसमुद्रायब्रह्मणेविश्वेभ्योदेवेभ्योआदित्ये
भ्योवसुभ्योदेवेभ्योरुद्रेभ्योमरुद्भ्यःप्रजापतयेपरमेष्ठिनेएकायेजुष्टंगृह्णामि। प्रोक्षणेत्व
शद्भः आज्याधिश्रयणानंतरंकर्परिकामधिश्रित्यतत्रापूपंस्थाप्यचरुमधिश्रित्यपर्यग्निक
रणादि। शेषंपरिलाघवात्॥ ततआज्यभागानंतरंदशाज्याहुतीर्वक्ष्यमाणमंत्रैर्जुहोतीत्य
र्थः। तान्नाह। त्रिंशत्स्वसारउपयंतिनिष्कृतंसमानंकेतुंप्रतिमुंचमानाः। ऋतूंस्तन्वंतेकवयः
प्रजानतीर्मध्येछंदसःपरियंतिभास्वतीः स्वाहा। ज्योतिष्मतीप्रतिमुंचतेनभोरात्रीदेवीसूर्य
स्यव्रतानि। विपश्यंतिपशवोजायमानानानारूपामातुरस्याउपस्थेस्वाहा। एकाष्टकातपसा
तप्यमानाजजानगर्भंमहिमानमिन्द्रं। तेनदस्यून्व्यसहंतदेवाहंतासुराणामभवच्छचीभिः स्वा
हा। अनानुजामनुजांमामकर्तसत्यंवदंत्यन्विच्छएतत्। भूयासमस्यसुमतौयथायूयमन्या
वोअन्यामतिमाप्रयुक्तः स्वाहा। अभून्ममसुमतौविश्ववेदाआष्टप्रतिष्ठामविदद्धिगाधं। भूया

समस्मत्सु मतो यथा स्वयमन्या वो अन्यामतिमा प्रयुक्त: स्वाहा। पंचव्युष्टीरनु पंचदोहा गां पंच
नाम्नीमृतवोनु पंच। पंचदिश: पंचदशेन लृप्ता: समानमूर्ध्नी रधिलोकमेकं स्वाहा। ऋतस्य ग
र्त: प्रथमा व्युषिष्यपामेकामहिमानं विभर्त्ति। सूर्यस्यैका चरति निष्कृतेषु धर्मस्यैका सविते कं
नियच्छतु स्वाहा। या प्रथमा व्यौच्छत्सा धेनुरभवद्यमे। सा नः पयस्विनी धुक्ष्वोत्तरामुत्तरां समां
स्वाहा। शुक्र ऋषभा नभसा ज्योतिषागाद्विश्वरूपा शबली अग्निकेतुः। समानमर्थं स्वपस्य
माना बिभ्रती जरामजर उष आगाः स्वाहा। ऋतूनां पत्नी प्रथमेयमागादह्नां नेत्री जनित्री प्र
जानां। एका सती बहुधो षो व्युच्छस्यजीर्णा त्वं जरयसि सर्वमन्यत्स्वाहेति। त्यागा ऊह्य। इदं त्रि शास्त्व
स्त्यः। १ इदं रात्र्यै २ इदमष्टकायै ३ पंचसु इदं रात्र्यै। ५। १०। आद्याष्टकायाई इन्द्रदेवता कृत्वा इन्द्रा
य स्वाहेत्युत्तप होमः इदमिन्द्राय। केचित्तु स्थालीपाक होमानंतरमुत्तप होममाहु:। स्थालीपा
कस्य जुहोति यां ता पृथिवी शिवमन्तरिक्षं शन्नो द्यौरभयं कृणोतु। शन्नो दिशः प्रदिश आ
दिशो नो होरात्रे कृणुतं दीर्घमायुर्व्यश्नवै स्वाहा। आपो मरीची: परिपांतु सर्वतो धाता सम

गृह्य

ब्रोऽप हंतु पाप्मं। त्वं तं लविष्यद कृतं हि इमं मस्क मेत्र ह्यालिम्नुमः सुरद्धि तः स्या ॐ स्वाहा। विश्वेत्रा
दि त्यावसवश्च देवास्रु द्रागोप्तारो मरुतश्च संतु। ऋ ङ्गे प्रजाम मृतां दीर्घमायुः प्रजापतिर्म्मयि प
रमेष्ठी दधातु नः स्वाहाष्टकायै स्वाहेति। शांता पृथिवीत्यादि चतुर्लिर्म्मंत्रैश्चतस्र आहुतीः स्था
ली पाकस्य जुहोतीत्यर्थः। त्यागास्तु। इदं पृथिव्यै अंतरिक्षाय दिवे दिग्भ्यः प्रदिग्भ्य आदिग्भ्यो
होरात्राभ्यां च।। १ इदमङ्गिरोमरीचिभ्यो धात्रे समुद्राय ब्रह्मणे च। इदं विश्वेभ्यो देवेभ्य आदित्येभ्यो
वसुभ्यो देवेभ्यो रुद्रेभ्यो मरुद्भ्यः प्रजापतये परमेष्ठिने च। २ इदमष्टकायै। अत्र यो: स्विष्टकृ
त्। महाव्याहृत्यादि ब्राह्मणभोजनांतं। ततो वैश्वदेवः। इच्छया अष्टकाश्राद्धं। केचिन्नेच्छंति।। ॥
इति प्रथमाष्टका।। क्रमेण मध्यमाकर्त्तव्यतामाह। मध्यमागवाकर्त्तव्यतां वक्ष्यति पशुश्चेदाप्ला
वेत्यादिना। गोपशुश्चेत्सुरायह इति गोपशोर्न्निषिद्धत्वात् कलौ छागः तदलाभे चरुः। तस्ये वपां
जुहोति वह वपां जातवेदः पितृभ्य इति। चतुर्थी षष्ठ्यर्थे तस्या इत्यर्थः। वपावदानात्प्रागुपरि
ष्टाच्च हिरण्यशकलोपस्तारात्पंचावत्तता संपाद्या। होमश्चापसव्येन सव्यं जान्वाच्याप

तृतीयेन। वहवपामित्यस्यापेतृकत्वात्। पश्वोः कर्त्तव्यतां वदिष्यति। चरुपक्षे विश्वेभ्यो देवेभ्यः
स्वाहेत्यस्यैव चरुहोमः। इदं विश्वेभ्यो देवेभ्यः। ततः द्वितीयस्थालीपाक होमादि। अन्यत्सर्वं मध्य
माष्टकावत्। श्रप्यमाणस्य मंडमुद्धृत्य स्रुवेणापसव्येन वपा होमः। इदं पितृभ्यः। श्वोन्वष्टकासु
सर्वासां पार्श्वसक्थिसव्यान्यां परिवृते पिंडपितृयज्ञवत्। सर्वासां अष्टकानां श्वः उत्तरे द्युः तदर्थ
माह अन्वष्टकासु। अष्टकायाः पश्चात् क्रियमाणाः अन्वष्टकाः तासु। पार्श्वं च सक्थि च। पार्श्वस
क्थिनी ते च ते सव्ये च। पार्श्वसक्थिसव्ये। नास्यां अन्वष्टकाख्या क्रियाकर्त्तव्येत्यर्थः। कुत्रेत्यत आह
परिवृत्ते आवसथ्यगृहे सर्वतः आच्छादिते। कथं स्यादत आह। पिंडपितृयज्ञवत्। पदार्थक्रमश्चा
यं। अपराह्णे परिवृतस्यस्याग्नेः वैश्वदेवानंतरं परिस्तरणं। ततोपसव्येन नीविबंधनं। होमवर्जम
पसव्येन दक्षिणाभिमुखेन। पात्रासादने स्रुग्वा। असिनापार्श्वसक्थ्योः मांसानि छित्वा आसाद
येत्। स्रुगादि पंचकं। चरुपक्षे तंडुलाः। चरुग्रहणवत् मांसग्रहणं अपणादि। कंडनानिष्पवनादि न
भवति। तेनोलूखलादेरासादनाभावो मांसपक्षे। अन्यत्सर्वं पिंडपितृयज्ञवदित्यनेनातिदिष्ट

गृह्य°

36

पिंडपितृयज्ञवदतिदिष्टं। विशेषमाह। स्त्रीभ्यश्च। मातृपितामही प्रपितामहीभ्यः पित्रादिभ्यः पिंडदानानंतरं पिंडदानसमुच्चयार्थश्चकारः। उपसेचनं च कर्षूषु सुरयातर्पणेन च। न केवलं स्त्रीभ्यः पिंडदानं अपितु कर्षूषु सुरयातर्पणेन चोपसेचनं। कांडहरीतकी गुडरसेन च सुरा। तर्पणं सक्तुभिः। स्त्रीपिंडेभ्यः पश्चात्कर्षवः दैर्घ्येण प्रादेशमिताः चतुरंगिरं गुलैर्विस्तृताः अंगुलखाताः तेषु सुरायाः सक्तूनां चासेचकः। पाकसूत्रसंप्रदानसमुच्चयार्थश्चाद्यश्चकारः। सुरासक्तोः समुच्चयार्थो द्वितीयश्चकारः। प्रयोगस्तु। गोत्रेमातः अमुकि देवि सुरां पिबस्व। मातृद्वयं चेत्। पिबेथां। बह्व्यश्चेत्पिबध्वमिति। दक्षिणसंस्थं प्रत्यवरप्रक्षेपे प्रयोगः। एवं तर्पयस्व तर्पयेथां तर्पयध्वमिति प्रत्यवरं मातृपितामही प्रपितामहीभ्यः सक्तुन् प्रक्षिपेत्। अंजनानुलेपनं स्रजश्च। स्त्रीपिंडेषु प्रतिपिंडमंजनं सौवीरांजनमलाभे लौकिकं अनुलेपनं चंदनादिस्रजः पितृप्रियपुष्पमालाः। चकारः दद्यादिति क्रियासमुच्चयार्थः। प्रयोगस्तु। गोत्रेमातः अमुकि देवि देवि अंजस्व। अंजेथां। अंजध्वं। एवं पितामही प्रपितामहीभ्यां। अनुलिंपस्व अनुलिंपेथां। अनुलिंपध्वं। स्रजोपि

न ग्राह्या। अत्रोपि न ग्राह्यां। अत्रोपि न ग्राह्यं। अत्र पितर इत्यादि कल्पकपक्षेपांतं। पिंडपितृयज्ञव
त्। आचार्यांतेवासिसब्रह्मानपत्नीभ्य इत्युक्तं। पिंडदानं कुर्यादिति शेषः। आचार्यादिभ्यः मात्रादि
भ्यः पिंडदानानंतरमवटखननात्प्राक् पिंडदानं ध्येयं। अनुकंप्यान्तःक्रसमुच्चयार्थश्चकारः। तृ
तीयाकालशाकेन। प्रजापतयेन्नुष्टं। प्रजापतये स्वाहेति प्रधानहोमः। शेषं प्रथमाष्टकावत्॥ ए
वं मार्गशिरपौषमाघफाल्गुनाष्टमीषु क्रमेणातिस्रः अष्टकालवैतीत्युक्तं। यद्यपि चतुर्थ्यष्टकापि दे
वतोक्ता। तथापि मध्यमागवेत्युक्ते ईदृशोः मध्यमत्वप्रसक्तिः तदा सायचतुर्थी इत्थं कल्पसूत्रयति।
मध्यावर्षे चतुरीयाशाकाष्टका। वर्षे संवत्सरे चैत्रादिरूपे फाल्गुनांते। मध्यासंवत्सरमध्ये लाङ्
पदापरपक्षे ष्टम्यां तुरीयाचतुर्थी कालशाकेनाष्टका शाकाष्टका कर्तव्येति शेषः। केचित्तु वर्षेवृ
ष्टिकाले मध्या वृष्टिकालमध्यवर्तिनीत्याहुः। तन्मते व्याख्यानलेदेपि व्याख्येयालेद इति द्रष्टव्यं।
तृतीयायाः शाकसाधनत्ववदार्द्रायचतुर्थ्यां शाकसाधनत्वोक्तिः स्वतंत्र स्वनियोगपर्यनुयो
गानर्हत्वादिति। अत्रापि कालशाकचरोरपसव्येनग्रहणाज्योद्धरणादि। पितृभ्योऽजुष्टमिति। द

गृ घ

शान्त्याहुतिहोमानंतरमपसव्येनपितृभ्यः स्वाहेतिकालशाकचरुहोमः। इदं पितृभ्यः। अन्यत्स
र्वं प्रथमाष्टकावत्। एवं चतस्रः अष्टकाः अन्वष्टकाश्चोक्ताः। नात्र इन्द्रदेवताव्यतिरिक्तो विशेष
स्तावो मांसात्वावे। अन्वष्टकानंतरमन्वष्टकाश्राद्धं सर्वत्र॥ ॥तृतीयस्य तृतीया॥ ॥३॥ अथातः
शालाकर्म व्याख्यास्यामइति सूत्रशेषः। पुण्याहे शालां कारयेत्। त्रिल्लिखिलिरितिशेषः। अत्रापि मातृ
पूजाभ्युदयिके। तस्याः अवटमभिजुहोत्यच्युताय भौमायस्वाहेति। स्वगृह्योक्तविदाज्यं संस्कृत्यदेव
स्यत्वेत्यग्निमादायशालाया आग्नेय नैर्ऋत्यवायव्येशानेषु क्रमेणेदमहं रक्षसामित्यवटान्ख
त्वा प्राचः पांसून्बहिष्प्रपरिस्तरणपूर्वकं घृतमवटेषु स्रुवेणाभिजुहोति। मंत्रमाह। अच्युताय भौमा
यस्वाहेति। इदमच्युताय भौमायेतित्यागः। स्तंभमुच्छ्रयती मामुच्छ्रयामि भुवनस्य नाभिं वसोर्धारां
प्रतरणीं वसूनां। इहैव ध्रुवां निमिनोमि शालां क्षेमे तिष्ठतु घृतमुक्षमाणा। अश्वावती गोमती सू
नृतावत्युच्छ्रयस्व महते सौभगाय। आत्वा शिशुराक्रंदत्वा गावो धेनवो वाश्यमानाः। आत्वाकु
मारस्तरुण आवत्सो जगदैः सह। आत्वा परिस्रुतः कुंभ आदध्नः कलशैरुप। क्षेमस्य पत्नी बृह

तीसुवासारयिन्नो धेहिस्कुलगे सुवीर्यं। अश्वावद्गोमदूर्जस्वत्पर्णं वनस्पतेरिव। आसिनः सर्वत।
ऽं रङ्गमिदमनुश्रोयो वसान इति। इमामुच्छ्रयामीत्यादिनाग्नेयो वसाइत्यंतेनाग्नेयकोणावटे स्तं
भं उच्छ्रयति उच्छ्रितं यथा स्यात्तथा मूलांशं संस्पृशति पतीत्यर्थः। स्तंभावेशिलाविन्यासः।।
चतुरः मंत्रा इत्यर्थः। चतुर्णामेकमंत्रता।। तथा चाने नैवमंत्रेण नैऋत्यवायव्यैशान्यावटे ध्रुवी स्तं
भान् उच्छ्रयति। अत्यवटं स्तंभोच्छ्रयणे मंत्रावृत्तिः। यद्वा चतुर इति हृत्थ कस्मत्रे। आकृत्सूत्रे मंत्रकरणं च
स्तंभोच्छ्रयणमुक्तं। कियत्संख्याया इत्यपेक्षायामेतत्। प्रपद्येति प्रविशति। शालामिति शेषः।
अस्यांतरतोऽग्निमुपसमाधाय दक्षिणतो ब्रह्माणमुपवेश्योत्तरत उदपात्रं प्रतिष्ठाप्य स्थालीपा
कं श्रपयित्वा निष्क्रम्य द्वारसमीपे स्थित्वा ब्रह्माणमामंत्रयते ब्रह्मन्प्रविशामीति ब्रह्मानु
ज्ञातः प्रविशति तं त्वा प्रपद्ये शिवं प्रपद्य इति। ब्रह्मासनमासीर्येत्येतन्मात्रमपवदितुं दक्षिणतो
ब्रह्माणमुपवेश्येत्युक्तं। उदपात्रस्थापनानिरुक्तिरप्रणीताप्रणयनप्राकृतालिकप्रणीतेतरो
दपात्रस्थापना र्था। नवशालाछालायां प्रागावसथ्यस्य आसत्वाद् अग्निस्थापनोक्तिः। क्रमश्चपदार्था

गृह्य

नां॥ पात्रासादनादौ कांस्ये संस्तारायसद्धी राण्यौदुंबरपत्राणि। दूर्वापल्लवाः गोमयं दधिमधु घृतं।
कुशाग्र्यवाश्च। आज्यस्थाली द्रव्यं। ग्रहणं। अग्नये इंद्राय बृहस्पतये विश्वेभ्योदेवेभ्यः सरस्वत्यैवा
जिभ्यः सर्पदेवजनेभ्यो हिमवतेव सुभ्यो रुद्रेभ्य आदित्येभ्य ईशानाय जगदेभ्यः दर्वाह्नायापरा
ह्नायम ध्यंदिनाय प्रदोषाद्धरात्राय मृत्यवे दे वेभ्यो महापथायैकर्त्रे विकर्त्रे विश्वकर्मणे ओषधी
भ्यो वनस्पतीभ्यः धात्रे विधात्रे निधीनांपतये ब्रह्मणे प्रजापतये सर्वाभ्यो देवताभ्यो ऽग्नये स्विष्टकृ
ते। ब्रोह्मणेभ्यः ग्रहः। ग्रहकृताज्यस्थाल्याभाज्य निर्वपः अन्यत्सर्वं प्रकृतिवत्। एवं स्थालीपाकं
श्रपयित्वा तिष्ठार्थो गृहस्य शालायाः बहिर्निष्क्रम्य द्वारसमीपे स्थित्वा ब्रह्माणं विलोकयन्नाथ
यते ब्रह्मन्प्रविशामीति प्रविश्य स्वेत्यनुज्ञातो ब्रह्मणा ऋतं प्रपद्ये शिवं प्रपद्य इति प्रविशति॥
ततः प्राणदानादि पर्युक्षणांते। आज्यं संस्कृत्य हरति रित्याज्याहुतीर्हुत्वा पराह्नहोतिवास्तो
ष्पते प्रतिजानीह्यस्मांत्स्वावेशो अनमीवो भवानः। यत्त्वेमहे प्रति तन्नो जुषस्व शंनो भव द्विपदे
शं चतुष्पदे स्वाहा॥ वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिन्दो। अजरासस्ते सख्ये

38

स्याम पितेव पुत्रान्प्रतिनो जुषस्व स्वाहा। वास्तोष्पते शग्मया संसदा ते सक्षीमहि रण्वया गातु
मत्या। पाहि क्षेम उत योगे वरं नो यूयं पात स्वस्तिभिः सदा नः स्वाहा। अमीवहा वास्तोष्पते विश्वा रू
पाण्याविशन्। सखा सुशेव एधि नः स्वाहेति। ततः द्वितीयामाज्यस्थालीं निरूप्याज्यमधिश्रित्ये
त्यादि स्रुग्णां कृतिव दाज्यं संस्कृत्येह रतिरूप स्रुजन्निति द्वास्यां कोंडिकाद्वास्यां द्वे आज्याहुतीर्हु
त्वा इदमन्नयद्यतु त्र्यो इदं पशुल्प इतिवा। ततो वास्तोष्पत इति चतसृभिः ऋग्भिः स्वराः चतस्र आ
हुतीः प्रत्यृचं जुहोतीत्यर्थः। इदं वास्तोष्पतये। ५ इतिच ... त्यागः। ततो द्वितीयाज्येनाघार
योराज्यभागयोश्च होमः। स्थालीपाकस्य जुहोत्यग्निमिन्द्रं बृहस्पतिं विश्वेदेवानुपह्वये। स
रस्वतीं च वाजीं च वास्तु मे दत्त वाजिनः स्वाहा। सर्पदेवजनान्सर्वान्हिमवन्तं नगेश्वरं। वसूंश्च
रुद्रानादित्यानीशानं जगदैः सह। एतान्सर्वान्प्रपद्येहं वास्तु मे दत्त वाजिनः स्वाहा। पूर्वाह्नमप
राह्नं चोभौ मध्यंदिना सह। प्रदोषमर्द्धरात्रं च व्युष्टां देवीं महापथां। एतान्सर्वान्प्रपद्येहं वास्तु मे
दत्त वाजिनः स्वाहा। कर्त्तारं च विकर्त्तारं विश्वकर्माणमोषधीश्च वनस्पतीन्। एतान्सर्वान्प्रप

गृह

द्यौ हंवास्कमेदन्नवाजिनः स्वाहा। धातारं चविधातारं निधीनांचपतिं सह। एतान्सर्वान्त्रिय पद्यौ
हंवास्कमेदन्नवाजिनः स्वाहा। स्योनं शिवमिदंवास्कदन्नंब्रह्मप्रजापती। सर्वाश्चदेवताः स्वा
हेति। एभिः षड्भिः मंत्रैः प्रतिमंत्रं स्थालीपाकेन षडाहुतीर्जुहोति। त्यागास्तु। इदमग्नयेइन्द्राय बृ
हस्पतये विश्वेभ्योदेवेभ्यः सरस्वत्यैवाजिभ्यश्च। इदं सर्पदेवजनेभ्यो हिमवते वसुभ्यो रुद्रेभ्य
आदित्येभ्य ईशानाय जगदेभ्यश्च॥२॥ इदं पूर्वाह्णापराह्णाय मध्यंदिनाय प्रदोषाय अर्द्धरात्राय व्युष्टैर
देव्यैमहापथायैश्च॥३॥ इदं कर्त्रे विकर्त्रे विश्वकर्मणे ओषधीभ्यो वनस्पतिभ्यश्च।४ इदं धात्रे
विधात्रे निधीनांपतये च ५ इदं ब्रह्मणे प्रजापतये सर्वाभ्यो देवताभ्यश्च।६ आशनांते कांस्ये संल
रानोप्ये ड्डुं वरपलाशानि सखुराणि। शाड्वलं गोमयं दधिमधुघृतं कुशान्यवांश्चासनोपस्था
नेषु प्रोक्षेत्। स्विष्टकृद्धोमाद्दक्षिणादानांते आशनांते तस्मिन्। संजातिकांस्यपात्रे खुराद्धी रं। शा
ड्वलं दूर्वापल्लवाः। आस्यतेयेषु रम्येषु तानि मंचकपीमदीनि आसनानि उपस्थीयतेखुरवाद्य
र्घ्यं येषु तुलारामादीनि आ सनानि। उपस्थानानि चमंचकदोलादीनि। तेषु प्रोक्षेत्। तेषां प्रो

39

एं कुर्यादित्यर्थः । पूर्वे सं धावतिमृशाति श्री श्चत्वायशाश्च पूर्वे संधौ गोपायेतामिति । पूर्वा प्राचीत
स्यां वर्त्तमानो योदिगंतरसंधिः तस्मिन्नाग्नेयकोणइत्यर्थः । नचैशानकोणः कुतोनेतिवाच्यं । उत्तर
सूत्रे दक्षिणदिक्संधेः स्मरणात् । दक्षिणप्राव्यवधानयोश्चन्याय्यत्वात् । दक्षिणे सं धावतिमृशाति
यज्ञश्चत्वा दक्षिणा दक्षिणे त्विसंधौ गोपायेतामिति । पश्चिमे सं धावतिमृशत्यन्नंच त्वाब्राह्मणश्च प
श्चिमे संधौ गोपायेतामिति । उत्तरे सं धावतिमृशत्यूर्क् त्वासूनृताचोत्तरे संधौ गोपायेतामिति ।। सं
धिपद॰ व्याख्या पूर्ववत् । अन्यत्स्पष्टं । निष्क्रम्य दिशामुपतिष्ठते केताच सुकेताच पुरस्ताद्गोपाये
तामित्यग्निर्वै केतादित्यः सुकेता तौ प्रपद्ये ताभ्यां नमोस्तु तौ मा पुरस्ताद्गोपायेतामिति । अथ दक्षि
णतो गोपायमानं च मा रक्षमाणा च दक्षिणतो गोपायेतामित्यहर्वै गोपायमानं रात्री रक्षमाणा
ते प्रपद्ये ताभ्यां नमोस्तु ते मा दक्षिणतो गोपायेतामित्यथ पश्चाद्दीदिविश्च मा जागृविश्च पश्चाद्गो
पायेतामित्यन्नं वै दीदिविः प्राणो जागृविस्तौ प्रपद्ये ताभ्यां नमोस्तु तौ पश्चाद्गोपायेतामिति । अथो
त्तरतोऽस्वप्नश्च मानवद्राणश्चोत्तरतो गोपायेतामिति चंद्रमा वा अस्वप्नो वायुरनवद्राणस्तौ प्रप

द्धेतास्यांनमोऽस्कृतौमोत्तरतोगोपायेतामिति॥ ॥निगदव्याख्यातावनुमन्त्री॥ ॥निष्ठितांप्रपद्यते
धर्म्मस्थूणाराजं᳐श्रीस्तूपमहोरात्रेद्वारफलके। इंद्रस्यगृहावसुमंतोवरूथिनस्तानहंप्रप
द्येसहप्रजयापशुभिःसह। यन्मेकिंचिदस्त्युपहूतःसर्वगणसखायःसाधुसंवृतः। तांत्वाशा
तेरिष्टवीरागृहान्नःसंतुसर्वतइति। निष्ठितांनिष्पन्नांप्रपद्यते प्रविशति धर्म्मस्थूणाराजमिति
मंत्रास्यां। प्रवेशनंचसहिरण्यस्यपूर्णोदकुंभसहितस्यपुण्याहवेदघोषादिब्राह्मणाशीर्वादपु
रस्सरंगृहपतेः। ततःब्राह्मणेभ्योदक्षिणांदत्वास्वस्तिवाच्याशिषःप्रतिगृह्यबर्हिर्होमादिब्राह्म
णभोजनांतं। ततोब्राह्मणभोजनं। कर्म्मापवर्गेएकस्मैभोजनंदत्वापुनःकर्म्मसाङ्गुण्यार्थंदश
पंचवाविप्रान्भोजयेत्॥ ॥तृतीयस्यचतुर्थी॥ ॥इतिशालाकर्म्म॥ ॥अथातोमणिकावधानं
वक्ष्यतइतिसूत्रशेषः। मणिकःशरावाकृतिरुदपात्रं। एतच्चावसथ्याधानानंतरंतद्दिनएवभ
वति। प्रत्यहीयहोमसाधनीभूतपंचमहायज्ञपाकपर्युक्षणादेर्मणिकोदकसाध्यत्वात्। अथेः
स्वातंत्र्यादिहसूत्रणं। अत्रादौमातृपूजाःसर्वकमाभ्युदयिकंश्राद्धमग्नौकरणसहितं। अत ऊ

र्द्धमपि क्रियमाणसर्वाभ्युदयिकश्राद्धे यत्रौकरणं तद्भवति। तद्धोम श्चावसथ्ये सव्येन। देवत्वाद्धो
मस्य। होमशेषस्य पितृपात्रे पिंडे च प्रक्षेपः श्राद्धकल्पात्। अपरे तु। अग्नमला वेन्नुवि प्रस्येत्यादिवा
क्यानुरोधान्निरग्नेरप्यग्नौकरणमिच्छंति। आचार्यमितेन्नुसांनिध्याला वः। तथा च होमवद्गृहीता
ग्नेरेव विप्रकराद्यधिकरणानि दृश्यंतः। न च सूत्रान्तद र्थसिद्धेर्वाक्यानर्थक्यं। एवकारस्याधिक
रणांतरनिषेधकत्वात्। कथं कर्त्तव्यमत आह। उत्तरपूर्वस्यां दिशि सूपवद्वटं रखात्वा। ऐशा
न्याम ग्नेः सूपवद्नेन देवस्य त्वेत्यभ्रिमादायावटं परिलिखतीदमहमिति। उदकस्पर्शः प्राचः पां
सूद्वापश्च कुशानास्तीर्यताक्षता नरिष्टकांश्चान्यानि वालिमंगलानि। कुशान्सागग्रानुदग्राञ्चास्ती
र्यावटे अक्षतान्यवान् अरिष्टकफलानि अन्यानि अलिमंगलानि अद्धिवृद्धिकारीणि। कपर्दका
न्पुष्पाणि सर्वौषधीर्दूर्वाशमीपत्रसर्षपादीनि अवटे प्रक्षिपेत्स्पर्थक श्चकारः। तस्मिन्मिनोति
मणिकं समुद्रोसीति। तस्मिन्नवटे मणिकं मिनोति स्थापयति समुद्रोसीत्यारस्पर्शं मृ रित्यं
तेन मंत्रेण। भ्वंतनाचमयो भूरित्यनुवाकशेषेणेति वक्ष्यमाणत्वात्। अपत्रासिंचत्यापो रेवतीः

गृह°

हयथाहिवस्वःकर्तुं बलदं विभ्रथामृतंच। रायश्चस्वस्यपत्यस्यपत्नीः सरस्वती तद्गुणतेवयोधाद
ति। मणिक इति शेषः। आपोहिष्ठेति वातिसृतिः। मणिकेऽप आसिंचतीति समुच्चयार्थश्चकारः
ततो ब्राह्मणभोजनं। पंचब्राह्मणान्भोजयेदित्यर्थः। पात्रजलादेस्त्यागः शोषादो समंत्रकं तत्तदाव
र्त्तते। ब्राह्मणभोजनं त्वग्नेः पुनराधाने। तृतीयस्य पंचमी॥५॥ ॥अथातः शीर्षरोगभेषजं वक्ष्य
त इति सूत्रशेषः। कथमत आह। पाणी प्रक्षाल्य भ्रुवौ विमार्ष्टि चक्षुर्भ्यां ॐ श्रोत्राभ्यां गोदानात् कुकुक
दधि। यक्ष्मं ॐ शीर्षण्यं ॐ ररादाहिवृहामीममिति दक्षिणोत्तरे पाणी प्रक्षाल्य ताभ्यां दक्षिणोत्तरे भ्रु
वौ यथाक्रमं विमार्ष्टि चक्षुर्भ्यामिति मंत्रेण युगपत्। एतच्च स्वपरसाधारणं। अर्द्धं चेदवभेदक विस
पाक्ष्येतपक्ष्म महायशाः। अथो चित्रपक्षशिरो मास्याभिताप्सीदिति। अर्द्धं चेच्छीर्षरोगेण पीड्य
ते। तदा पूर्ववत्पाणी प्रक्षाल्य पीडित भ्रूपार्श्ववर्त्तिना हस्तेन तद्भ्रूप्रोंछनमवभेदकेति मंत्रेण। क्षेम्यो
ह्येवभवति। क्षेम्यः शिरोरोगरहितः॥ ॥तृतीयस्य षष्ठी॥६॥ उत्तेभपरिमेहः। उत्तुलः दुर्विनीतो दा
सः। तस्य परिमेहः। वशीकरणं वक्ष्यत इति सूत्रशेषः। स्वपतो जीवविषाणे स्वं मूत्रमासिच्यापस

लविज्ञिः परिषिंचन्परीयात्परित्वाग्गिरे २ हं परिमान्तुः परिघसुः। परिपिज्ञोञ्जसानोञ्जसख्येत्वे
विद्युज्जाम्यहं। उत्तलपरिमीढोसि परिमीढः कृगमिष्यसीति। स्वपतः दासस्य वक्ष्यमाणः परिवे
कः। कथं कुर्यादित आह। जीवविषाणे जीवतः छागस्य विषाणे दक्षिणेन वामेन सूत्रमासिच्यते
नमन्त्रेण दासं अपसलविअपदक्षिणं परिषिंचन् त्रिः वारत्रयं परीयात्परिभ्रमेत् परित्वेति मंत्रेण
उदकस्पर्शनं वारत्रयमितरथा वृत्तिः। सपदि धाम्यद्वाग्निमुपसमाधाय घृताक्तानि कुशेंडुनि
जुहुयात्परि[illegible] त्वाहुलनो हुलनिर्हृतेन्द्रवीरुधः। इंडुपा श्रेनसित्वाम हंमुक्ताथान्यमान वेदि
ति। एवं परिमीढोपिसदासादिर्यदि भ्रांतः स्यात्तदोपायांतरमाह। उपालिसउ इत्तावोद्धितेदावाग्नि
मुपसमाधाय ब्रह्मासनास्तरणादि चतुर्द्दशाहुत्यंते कुशेंडुनि कुशकुंडलानि त्रीणि घृतेनाक्तानि
परित्वाहुलन इति मंत्रेण स्रुवेण जुहुयात्। ततः संस्रवप्राशनादि ब्राह्मणभोजनांतं। हेम्योह्येवस
वति। नश्येद् भ्रांतश्चलवतीत्यर्थः॥ ॥तृतीयस्य सप्तमी॥ ७॥ ॥ भगवः स्वर्ग्यः पशव्यः पुत्र्यो धन्यो
यशस्य आयुष्यः। स्वर्ग्यः स्वर्गाय हितः। एवं पशुभ्यो हितः। धनाय हितः। यशसे हितः। आयुषे हि

ग्र॰प॰ तः। तथाच स्वर्गादेरुपायः। फलगवद्गुत्यर्थः। विचित्रकार्यस्यानेकसामग्री नियम्यत्वात्तत्र त्य
तिलाघं फलगवावृत्तिः। यत्तु तं त्रोत्पत्तिर्वाध्यत इति। तन्न। समानकालीनानेकसामग्रीवशाद
नेककार्याणामपि समानसमयोत्पत्तिकत्वात्। अत्रापि प्रतिप्रयोगं मात्रमज्ञाभ्युदयिकेलवतः।
अत्रापि कथं क्रवास्यादत आह। उपासनमरण्यं हृत्वा वितानं साधयित्वा रोहं पष्ठुमाल
लतिसांडं गोर्वी प्राह्मात्। आवसथ्यमरण्ये नीत्वा तत्र दर्शपौर्णमासेष्टिवक्रा गार्हपत्यादि खरसाधनं।
गार्हपत्ये पंचभूसंस्कारपूर्वकमावसथ्यस्थापनं। तत आहवनीये दक्षिणाग्नौ च पंचभूसंस्का
रान्कृत्वा तयोरुद्धरणं आहवनीयं दक्षिणेन ब्रह्मासनास्तरणं। प्रणीताप्रणयनं। पात्रासादनं प
वित्रच्छेदनानि त्रीणि द्वे पवित्रे। प्रोक्षणीपात्रं अंतर्द्धानितृणं। वद्धः शम्याच। रज्जुशंकुमुद्गराश्चुत्र
र वेदिसाधनं। पात्रासादनं। पुरीषाहरणपात्रं। उदकं सिकताः। आच्छादनं कुशाः। ततः पवित्रे कृ
त्वा प्रोक्षणीः संस्कृत्य वद्धांतर्द्धानतृणशम्यानां प्रोक्षणं। ततो गार्हपत्यात्प्रोक्षणीनिधानं। ततो वे
दिमानं पष्ठुवत्। चतुररत्निः पश्चात्तिर्यक् षडरत्निर्मध्ये प्राची। त्र्यरत्निः पुरस्तात्तिर्यक्। अत्रसा

घनोपायल्कृतश्लोकः। द्वारत्नौ लक्षणं कुर्यादिर्द्वै सार्द्धत्रयेतथा। अर्द्धरत्नौ ततः सार्द्धे वेदिः स्यात्पा
श्चकी शुला। प्रकारांतरमपि। नवारत्निर्मिता रज्जुर्लक्षिताष्ट द्वितः परं। अर्द्धे द्वे त्रिषु पाशः स्यात्प
श्चवेदेः प्रसाधनमिति। संग्रहसाधनादि दर्शपौर्णमासवेदिवत्। अत्र सर्वं मंत्ररहितं कर्त्तव्यं। वेदि
परिसमूहनं। उत्करकरणं। सत्येण वज्रादानादि सत्येण पुरीषस्योत्कर प्रक्षेपांतं। दर्वपरि
ग्रहः। वेद्यां त्रिरुल्लेखनं। हरणं संमर्शनं। अत्र ध्रुवकर्त्तृकमेव सर्वं। ततः शम्यां स्फ्यं चादाय
सर्वेक्ति संचरं परित्यज्य चात्वालमानादि उत्तरवेदिच्छादनांतं पशुवत् कात्यायनोक्तं तूष्णीं। त
तः गार्हपत्ये पूर्णाहुतिवदाज्यं संस्कृत्य पंचगृहीताद्यग्निप्रणयनमुपयमन्युपनिवपनांतं
तूष्णीं कात्यायनोक्तं। प्रणीयमानेऽग्नौ ब्रह्मासनमनुनेतव्यं। प्रणीतापि उत्तरवेदिकाहवनी
त३ या उत्तरं संस्थाप्या। तत आहवनीयगार्हपत्ययोः परिस्तरणं। पात्रासादनं। आज्यस्थाली आज्यहवणी
पात्रं। अग्निः। अन्वैरवच्छादनकुशाः। सम्मार्गकुशाः परिधयः। उपयमनकुशाः। समिधः। स्रु
वः। आज्यं। वपाश्रपण्यौ चरुस्थाली। संडोऽमषलः। उखातंडुलाः। दक्षिणार्थैर्दिलवयागोः॥

गृह्य

वर्हिः प्लक्षशाखा। पलाशशाखा। त्रिगुणरशना। उपाकरणतृणं। द्विगुणरशनाशासः। पा
त्रेजनी दधिहिरण्यशकलानि। पलाशपत्राणि षट्। आज्यनिर्वापः रौद्रस्य पशोर्विहितत्वा
त्पशोश्चकल्पो निषेधाच्चरुकर्त्तव्यता अयणेत्वाज्यनिर्वपणानंतरं चरुग्रहणं रुद्राय त्वा जु
ष्टं गृह्णामी ति प्रोक्षणेत्वाशद्वः। ततः पर्य्यग्निकरणं। ततो वर्ह्यारखननोत्तरपरिग्रहादि वपा
श्रपणांतं पशुपक्षे। चरुपक्षे तु मंडेन वपा होमः। हिरण्यपालावे घृतं। अन्ये पशुधर्मा निवर्त्तंति
स्मान्नपशुधर्मान्विद्धति। वपाहुं श्रपयित्वा स्थालीपाकमवदानानि च। स्थालीपाकावदा
ने षु श्रपणानुकर्षणार्थश्चकारः। स्थालीपाकश्च पशुपुरोडाशस्थानापन्नः। होमानंतरं त
द्ग्रहणं। अग्नयेरुद्राय शर्वाय पशुपतय उग्राया शनये भवाय महादेवाये शानाय त्वा जुष्टं गृह्णा
मि। प्रोक्षणेत्वाशद्वः। नच समानदेवताकत्वात्पशुपुरोडाशयोरतो रौद्र एव स्थालीपाक
इति वाच्यं। देवतात्वमिति शांखायनसौत्रवक्तृत्वसामर्थ्यादशेषदेवताकीर्त्तनस्य स्थाली
पाके षु न्याय्यत्वात्। कल्पो पशोरनादरणे रौद्रश्चरुः। आज्यनिर्वपानंतरं तद्ग्रहणं प्रोक्ष

43

णंत्वा। अपणंचगार्हपत्ये। ततउपयमनकुशादानादिउत्तराघारानंतरंपशुसमंजनं। तदनु
शामित्रो ल्लेखनं। आहवनीयोल्मुकेनत्रिः पर्यग्निकरणं। इतरथावृत्तिः उल्मुकस्याहवनीये
क्षेपः। ततः पुनः सव्येनोल्मुकमादायकेनचिन्नीयमानस्यपशोर्वपाश्रपणीस्यामग्रतो रक्षः॥
शामित्रेग्निनिधानं। तृणास्तरणादि वपामुत्खिद्य प्रक्षाल्यपशुविशसनं। हृदयाद्यवदानग्रह
णं। श्रोणिपंचकं। वपायाः शामित्रे प्रतपनादि। अंतराशाखायोराहरणं। उरवायांशामित्रे
सोपशुश्रपणं। स्रुवेणान्यद्धृदयश्रपणं। पर्यग्निकरणंचरोः। त्रिःअभ्युतेत्तद यमुपरि कु
र्यात्। पृषदाज्येनहृदयाभिघारः। अन्येषामाज्येन। चरुंवपामंगान्युद्वास्यप्राग्वाग्योरंतर
समानयेत्। प्राणदानंकृत्वा। वेद्यामासादनं। आलंभनं। ततआज्यभागौ। रुद्रायत्वयामंतरिक्षा
यवसां। सूत्रेतुजुहुयादितिविशेषः। कात्यायनोक्तप्रकारेणवपावदानं। रुद्रायस्वाहेतिवपाहोमः।
इदंरुद्राय। अंतरिक्षायस्वाहेतिवसाहोमः। इदमंतरिक्षायेतित्यागः। स्थालीपाकमिश्राणवदान
निजुहोत्यग्नयेरुद्रायशर्वायपशुपतयउग्रायाशनयेभवायमहादेवायेशानायेति। सूत्रं। चरु

ग्रह्य

मिश्रितपश्ववदानहोमः॥ अंदौस्रुवमलिघार्य्यञ्चतिमांसंहिर्द्विर्वदानं। स्थालीपाकस्यस
कृत्। ऊनरसिघारणं। वपावाद्दिरण्यं। नवाङ्कुतयः प्रयोगः। अग्नयेस्वाहा। इदमग्नये। रुद्रा
यस्वाहा। इदंरुद्राय। शर्वायस्वाहा। इदंशर्वाय। पशुपतयेस्वाहा। इदंपशुपतये। उग्रायस्वा
हा। इदमुग्राय। अशनयेस्वाहा। इदमशनये। भवायस्वाहा। इदंभवाय। महादेवायस्वाहा। इदं
महादेवाय। ईशानायस्वाहा। इदमीशानाय। वनस्पतिस्विष्टकृदंतेदिग्व्याघारणं। इध्मप्रदाग्ने
नवनस्पतयेस्वाहा। इदंवनस्पतये। अंगेत्यस्यस्थालीपाकात्स्विष्टकृत्। अग्नयेस्विष्टकृतेस्वा
हा। इदमग्नयेस्विष्टकृते। एवंवनस्पतिहोमस्विष्टकृद्धोमयोरंते। दिग्व्याघारणं। वसयाः। दि
शःस्वाहा। इदंदिग्भ्यः। प्रदिशःस्वाहा। इदंप्रदिग्भ्यः। आदिशःस्वाहा। इदमादिग्भ्यः। विदिशः
स्वाहा। इदंविदिग्भ्यः। उद्दिशःस्वाहा। इदमुद्दिग्भ्यः। दिग्भ्यःस्वाहा। इदंदिग्भ्यः। षडाङ्कुतयः। प्रा
जादारस्यप्रादक्षिण्येनचतस्रः। मध्येस्वर्द्विः। एवंषट्। व्यापारणंतेपत्नीःसंयाजयंतीइ
ण्यैरुद्राण्यैशर्वाण्यैभवान्याअग्निंगृहपतिमिति। दिग्भ्यःस्वाहेत्यादिव्याघारणांतेजाघ

न्यागार्हपत्ये पत्नीसंयाजाः पंचचतुरवत्तेनां तद्यथा। इंद्राण्यै स्वाहा। इदमिन्द्राण्यै। रुद्राण्यै स्वा
हा। इदं रुद्राण्यै। शर्वाण्यै स्वाहा। इदं शर्वाण्यै। भवान्यै स्वाहा। इदं०। अग्नये गृहपतये स्वाहा। इ
दं०। नात्र संस्रवः। ततो महाव्याहृत्यादिप्राजापत्यांतानवाहुतीराहवनीये होतव्याः। ततः संस्रव
प्राशनादिदक्षिणादानांतं। लोहितं पालाशे षुकुशेषु रुद्राय सेनाभ्यो बलिं हरति। रुद्रदेवता
स्यः सेनास्यः रुद्रसेनास्यः। रुधिरेण बलिदानविधानाद्धिंसनकाले तद्ग्रहणं। पालाशप
त्रनिर्म्मितेषु पात्रे षु कुशेषु च। यथालिंगं प्रादक्षिण्येन प्रतिदिशं बलिहरणं। बलिद्वयमुत्तर
तः प्राक्संस्थं॥ अथ वा प्राक्संस्थात्॥ बलिदानमंत्रानाह। यास्ते रुद्र पुरस्तात्सेनास्तास्य एष बलि
स्तास्यस्तेन मो यास्ते रुद्र दक्षिणतः सेनास्तास्य एष बलिस्तास्यस्तेन मो यास्ते रुद्र पश्चात्सेनास्तास्य
एष बलिस्तास्यस्तेन मो यास्ते रुद्रोत्तरतः सेनास्तास्य एष बलिस्तास्यस्तेन मो यास्ते रुद्रोपरिष्टा
त्सेनास्तास्य एष बलिस्तास्यस्तेन मो यास्ते रुद्राधस्तात्सेनास्तास्य एष बलिस्तास्यस्तेन मद्भुति। कु
शानास्तीर्य तत्र पालाशपलाशेषु बलिदानं यास्ते रुद्र पुरस्तात्तेनेति प्रतिमंत्रं। इदं रुद्रेस्यः

गृह्य०

45

पुरस्तात्सेनाधिपत्येभ्यः। इदं रुद्रेभ्यो दक्षिणतः सेनाधिपत्येभ्यः। इदं रुद्रेभ्यः पश्चिमतः सेनाधिप
त्येभ्यः। इदं०। उत्तरतः। इदं०। उपरिष्टात्सेनाधिपत्येभ्यः। इदं० अधस्तात्सेनाधिपत्येभ्यः। वर्हिर्हो
मादि ब्राह्मणभोजनांतं। अवध्यं लोहितलिप्तमग्नौ प्रास्य तत्रैवानिखनंति। अग्नौ आहवनी
ये। अनुवातं पशुमवस्थाप्य रुद्रैरुपतिष्ठते। प्रथमोत्तमाभ्यामनुवाकाभ्यां। अनुवातं वायुं
अनुलक्षीकृत्य पशुं अवशिष्टं पशुशरीरं। रुद्रैः रुद्राध्यायाम्नातमंत्रैः उपतिष्ठते स्तौति। पञ्चां
तरमाह। प्रथमेति। प्रथमोत्तमौ आद्यंतौ ताभ्यां प्रथमः षोडशर्चः। द्रापे अंधसस्पत इत्यारभ्य विंश
तिकंडिकात्मको उत्तमः। नैतस्य पशोर्ग्राममिंहरंति। एतस्य पशोर्मांसं ग्रामं प्रति नाहरंतीत्यर्थः।
तत आरभ्य गार्हपत्यमादाय गृहमागत्यावसथ्यस्थाने स्थापयेदिति शूलगवः। एतेनैव गोयज्ञो
व्याख्यातः। एतेनैव शूलगवकर्तव्यताकलापेन गोयज्ञः। मधुपर्कार्चनादौ क्रियमाणः। तस्या
पि कर्तव्यताकलापप्रकार इत्यर्थः।। विशेषमाह।। पायसेनानर्थलुप्तः। अत्रापि मातृमज्जाभ्यु
दयिके परिसमूहनाद्याज्यभागांते विशेषः। आसादने तंडुलानंतरं पयः। चरुग्रहणप्रोक्ष

णेग्न्यादीशानांतेन। आज्यभागांते शूलगवदेवताभ्यो होमः पूर्ववत्। स्विष्टकृदादि ब्राह्मणभो
जनांतं सर्ववत्। तदनंतरं वैश्वदेवः शूलगवे ज्ञापि। शूलगवदेवताहोमातिरिक्तानि रर्थिकाक
र्त्तव्यतालुप्यतइत्यर्थः। तस्मात्तुल्यवयागौर्दक्षिणा। आलभ्यमान पशोर्वयसा तुल्यवयागौर्द
क्षिणादेया। एवमाचार्यादोग्रहागते आसनमाहार्यस्नादि कुरुते ल्येवमंतं कृत्वा परिसमूहन
द्याज्यासादनांते वपाश्रपण्यौ शूलं। उखा। स्थाली तंडुलाः। प्लक्षशाखा। त्रिगुणरशना। उपाक
रणं तृणं। द्विगुणरशना लागो पशुः। त्रिगुणरशना पात्नेजनी। असिः हिरण्यशकलानि। द
धिवर्हिः संस्रववपात्रं। दक्षिणार्थे तुल्यवयागौः। शूलगवदेवताभ्यश्चरुवहणं। पवित्रकर
णादि। वर्हिस्तरणानंतरं प्लक्षशाखास्तरणं। शाखानिखननादि प्रधानहोमांतं शूलगववत्॥
आचार्यार्चने वार्हस्पत्यः पशुः। आज्यभागानंतरं बृहस्पतये स्वाहेति वपाहोमः। स्थालीपाक
मिश्रांगहोमः। बृहस्पतये स्वाहेति। वनस्पतिहोमादि ब्राह्मणभोजनांतं। विवाहे प्राजापत्यः पशुः।
एवं सर्वत्र पशुषु देवतामात्रे विशेषः॥ ॥ अष्टमी कंडिका॥ ८॥ गोयज्ञातिदिष्टशूलगवधर्म्मा।

गृह्य॰

तिदेशार्थमाह॥ ॥ अथ वृषोत्सर्गः॥॥ उच्यत इति शेषः॥ अत्रापि स्वर्गपुत्रपशुधनायुःकी
र्त्तिकामानामधिकारः। गोयज्ञेन व्याख्यातः। पायसेनाग्न्ये रुद्राये त्यादिशूलगवदेवतो वृषप
कहोमको लवती त्यर्थः॥ समयमाह॥ कार्त्तिक्यां पौर्णमास्यां रेवत्यां वाश्वयुजस्य। कार्त्तिक्यां
पौर्णमास्यां आश्वयुजस्य वा पौर्णमास्यां लवती त्यर्थः। रेवत्यामित्याश्वयुज्यां फलातिशया
र्थं। अत्रादौ मातृयजनाभ्युदयिके। मध्ये गवां सुसमिद्धमग्निं कृत्वा गोपदं विशेषणं। उपल
क्षणमित्यन्ये। सुसमिद्धमित्येतद् भूसंस्कारनिवृत्त्यर्थं। भूसंस्कारात् लवती त्यन्ये। अयं च वृषो
त्सर्गः मृतस्य सूतकान्ते प्रेतत्वनिवृत्तये आवश्यकः। स च साग्नेर्दाहादिना देका दशाहे निर
ग्नेस्तु मरणादिनात्॥ तत्रादौ विष्णुयजनतर्प्पणे॥ तत्र प्रयोगः॥ विधिवत्स्नात्वा प्राणानाय
म्य देशकालौ संकीर्त्य अमुकप्रेतस्य प्रेतत्वनिवृत्त्यर्थं वृषोत्सर्गयोग्यताप्राप्त्यर्थं विष्णोः
पूजनपूर्वकं तर्प्पणमहं करिष्य इति संकल्प्य॥ कार्यं पुरुषसूक्तेन मंत्रैर्वा वैष्णवैरपि। द
क्षिणाभिमुखो भूत्वा प्रेतं विष्णुं इति स्मरन्॥ अनादिनिधनो देवः शंखचक्रगदाधरः। अव्य

यः पुंडरीकाक्षः प्रेतमोक्षप्रदो भव। अनेनामुकप्रेतस्य प्रेतत्वनिवृत्तिरस्तु। वृषोत्सर्गयोगपताया
स्तिरस्तु॥ ॥इति विस्तृतर्पणं॥ ॥अथ वृषोत्सर्गः॥ ॥तत्र देशकालाद्युच्चार्यामुकप्रेतस्य प्रेतत्व
निवृत्यर्थं एकादशाहादियोग्यताप्राप्त्यर्थं वृषोत्सर्गं करिष्ये इति संकल्प्य मध्ये गवां संस्कृत
प्रदेशे सुसमिद्धमग्निं कृत्वा ईशाने रुद्रकलशं स्थापनं। ततोऽग्नेर्दिग्विदिक्षु रौद्रकलशान् स्था
पयेत्॥ ततस्तेषां प्रतिष्ठा॥ ततो दक्षिणतो ब्रह्मासनमास्तीर्य पात्रादिसद्भीरं प्रणीताप्रणयनं। च
रुग्रहणं। अग्नये रुद्राय शर्वाय पशुपतय उग्रायाशनये भवाय महादेवायेशानाय त्वा जुष्टं गृ
ह्णामीति। ततः तूष्णीं पृथमिति पिष्टग्रहणं। आचार्यमते तु पौष्णश्चरुः राद्यः। पायसश्चरुर्हविरिति य
विपरीतमेतदिति देवयाज्ञिकाः। अन्येऽपि। ततः पर्युक्षणांते पुनराज्यं संस्कृत्य इह रतिरिति षड्
होति। आघारहोमात्प्रागाज्याहुति प्रज्ञस्यार्थमाज्यसंस्कारोक्तिः। इह रतिः स्वाहा। इह रमध्वं स्वा
हा॥ इह धृतिः स्वाहा॥ इह स्वधृतिः स्वाहा। इदं पशुभ्यः इति त्यागाः॥ इह रतिः पशुदैवतमित्युक्तेः।
उपसृजं धरुणं मात्रे धरुणो मातरं धयन् स्वाहा। रायस्पोषमस्मासु दीधरत् स्वाहा। इदमग्नये इ

गृह्य॰

तित्यागौ। उपस्थजन्नुष्ठिगाग्नेयीत्युक्त्वे॥ ततः आघारावाज्यभागौ ततः पायसचरुहोमः। अग्नयेस्वा
हा। रुद्रायस्वाहा। शर्वायस्वाहा। पशुपतयेस्वाहा। उग्रायस्वाहा। अशनयेस्वाहा। भवायस्वाहा। म
हादेवायस्वाहा। ईशानायस्वाहा। इदं सर्वकान्स्वाहा। प्रत्यामंत्राएवत्यागाः॥ प्रत्याङ्कुत्युदकस्प
र्शः॥ ततः स्रुवाग्राज्येनैव स्विष्टकृत्वर्वतः। स्त्रावाज्यं सनोबुनइतिपोल्लस्य उहोति। सनो
बुनइत्यनंतरंस्वाहाकारप्रयोगः। इदं स्थलइतित्यागः। ततः पायसःपोल्ला भ्यं स्विष्टकृतेडुत्वाल्प
स्काच। ततः रुद्रान्जपित्वा। रुद्रकलशेरुद्रमावाह्यगंधमाल्यादिभिः संपूज्य नमस्तइत्यादिरुद्रा
ध्यायं जपित्वेत्यर्थः। ततः पुराणप्रसिद्धिस्थापितात्र्यकलशाद्ध्वंनवृषस्यस्नपनं। चतुर्भिः कल
शैश्चतसृणां वत्सतरीणांस्नपनं। एकैवचेद्वत्सतरी तदा चतुर्भिस्तस्याएवस्नपनं। एतच्चकलश
स्थापनस्नपनेगरुडपुराणादालोच्ये। कीदृशस्य वृषोत्सर्गइत्यपेक्षायामाह। एकवर्णं द्विव
र्णंवायोवास्वयंछादयतियंवास्वयंछादयेद्रोहितो वेवस्यात्सर्वांगैरुपेतोजीववत्सायाः पय
स्विन्याः पुत्रोदयेचरूपस्विन्तमःस्यात्। यः वृषभ्महत्वलपुत्वास्वयस्वछादकोवाछादयोवा

रोहितः आरक्तः एकद्विवर्णादिविकल्पः। तमलंकृत्य स्रगादिभिः। सौवर्णशृंगादिभिरित्यन्ये।
सूर्येमुखाच्युतश्रोवत्सतर्यस्त्राश्चालंकृत्य। स्त्रीधार्यवस्त्रमाल्यादिभिः सुवर्णशृंगादिभिरित्यन्ये
। अस्मिन्नवसरे ग्राह्यं वैवाहिकं होममिच्छन्त्येके। ततो वृषवत्सतरीभिः अग्नेः प्रदक्षिणं कारयित्वा।
वत्सतरीणां मध्ये वृषं स्थाप्य। अयं गा वो मया दत्तः सर्वासां पतिरुत्तमः। तुभ्यं चैता मया दत्ताः पत्न्यः
सर्वा मनोरमाः। इत्युक्त्वा यस्कारमाहूय वामे चक्रं दक्षिणे त्रिशूलं कारयेत्। एवं तप्तायसेन मं
कयित्वा रुद्रकलशस्थोदकेन तं स्नापयेत्। या काचित्त्वत्र कामा सा वृषस्य धर्मात्मानं करोति।
काम्ये वृषोत्सर्गे। ततः पुनर्वृषं संस्पृश्याद्येत्यादि देशकालौ स्मृत्वा काम्ये कामनोल्लेखः नित्ये
तु प्रेतस्य प्रेतत्वनिवृत्त्यर्थं यद्रुत्वाल्लिख्य। पुच्छमादाय यामुं वृषं रुद्रदेवतं यथाशक्त्यलंकृतं गंधाद्य
र्चितं उत्सृजामीति संकल्प्य पुच्छे पुरुषसूक्तेन प्रेतनाम्ना च तर्पणं। काम्ये तु तर्पणपौराणिके
मंत्रेणैयायीर्षवद्दक्षिणखुरे पिंडदानं च। एनं युवानं पतिं वो ददामि तेन क्रीडंतीश्चरथ प्रियेण।
मानः स्म हजन्नुष्पा स्रुसगा रायस्पोषेण समिषा मदेमेत्येतयैवोत्सृजेरन्। एनं युवानमिति सर्वे

र स॰

48

नहस्तेनपुच्छमादायदक्षिणहस्तेनसहिरण्याःसतिलाःसकुशाःअपआदायामुकप्रेतस्यप्रेतत्व
निवृत्त्यर्थंएकादशाहश्राद्धयोग्यताप्रसिद्ध्यर्थमुत्सृजामीत्युक्त्वासहिरण्यंसतिलमुदकंभूमौक्षिपेत्।
नत्वस्थमतिमंत्रयतेमयोभूरित्यनुवाकशेषेण।समीपस्थोनत्वस्यःतं।मयोभूरित्यारभ्यसूर्य
स्वाहेत्यंतेनाभिमंत्रणं।ततः धर्मस्त्वंवृषरूपेणब्रह्मणानिर्मितःपुरा।तवोत्सर्गादिमंप्रेतंसमुद्धरत
वार्णवात्।मातृपक्षाश्चयेकेचिद्येचान्येपितृपक्षजाः।गुरुश्वशुरबंधूनांकुलेयेषांसमुद्भवाः।प्रेत
त्वंसमापन्नायेचान्येश्राद्धवर्जिताः।वृषोत्सर्गेणतेसर्वेलभंतांतृप्तिमुत्तमां॥वृषप्रार्थना॥ततो
दक्षिणस्कंधेनवृषस्यैशानींदिशंप्रतिप्रेरणं।यथेष्टंस्वस्थंपर्यटेतिमंत्रेण।ततःस्विष्टकृद्धोमादिब्रा
ह्मणभोजनांतं।अनंतरंवैश्वदेवः॥इदानींपाकयज्ञांतरमाह॥सर्वासांपयसिपायसंश्रपयित्वा
ब्राह्मणान्भोजयेत्।यावत्यःस्त्रियोगावःस्त्रावतीनांसर्वासामित्यस्यार्थः।अस्यप्राशितपदवाच्यत्वात्तं
चमहायज्ञादिपाकांतरेणकार्यं।पशुमप्येकेकुर्वंति।उक्तविधिनापायसेनब्राह्मणभोजनानंतरं
पशुंचैकेकुर्वंति।त्यर्थः।अस्यपाकयज्ञस्योत्तरांगंपशुःवैकल्पिकं।तन्मतेक्रियावाहुल्यात्फ

तस्य २

लवाङ्गलं। केचित्तु पशोः प्रधानत्वेपिनियतसमयकर्त्तव्यत्वं दाक्षायणयज्ञवदित्याहुः। स कथं
स्यादत आह। अलगवेन कल्पो व्याख्यातः। तस्य प्रयोगः कल्पः कर्त्तव्यताकलापः। नवमीकंडिका।
॥९॥ ॥ अथोदककर्म्म॥ मृतसंस्कारकं उदकादिना कर्म्म। पिंडांजलिदानादि। उपलक्षणमेतत्।
अन्यस्यापि सूतकादेर्वक्ष्यमाणत्वात्। वक्ष्यत इति स्मत्रशेषः। अद्विवर्षे प्रेते मातापित्रोराशौच
ं शौचमेवेतरेषां। द्विवर्षे जाते यस्यासौ द्विवर्षः नद्विवर्षो द्विवर्षः तस्मिन्प्रेते मृते। मातापित्रोः
आशौचं। अशुद्धिः। स्वाश्रमविहितानुष्ठानसंकोच इति यावत्। इतरेषां मातृपितृव्यतिरिक्तानां।
शौचं सद्यः स्नानमात्राच्छुद्धिरित्यर्थः। एतच्च वाजसनेयांतर्गतशाखाध्येतॄणामेव॥ अन्येषां तु स्मृ
त्यंतरविहिताशौचाधिकारः। मातापित्रोर्यदाशौचं तत्कियत्कालमत आह। एकरात्रं त्रिरात्रं वा। एत
च्चाकृतचूडकृतचूडतया यथाक्रमं वोध्यं। आदडान्नैशिकीत्युक्तेः। शरीरमदग्ध्वा निखनंति। अद्वि
वर्षप्रेतस्य शरीरं कलेवरं अदग्ध्वा दाहं अकृत्वा निखनंति। अरु नवश्राद्धादितं चंदनपुष्पाद्यलंकृ
तं भूमौ गर्त्तं कृत्वा निक्षिपंतीत्यर्थः। अंतः सूतके चेदीत्यानादाशौचं सूतकवत्। चेत्सूतकमध्ये तन्न।

ग॰ द्य॰

शादर्वाक्सूतकांतरापातस्तदा सर्वशोषेणागंतुकस्य शुद्धिः। तथा च शंखः॥ अथ चेदंतरा म्रियेत
जायेत वा शिष्टैरेव दिनैः शुद्ध्येताहः शेषे सति द्वाभ्यां प्रभाते तिसृभिरिति॥ केचित्तु शावाशौचस्य ज
ननाशौचनिवर्त्तकत्वेपि जननाशौचं न शावमपवदति। सजातीयस्यैव निवर्त्तकत्वमन्ये। मातापि
त्रोस्तु विशेषः। पितृमृतकं स्वसमयं व्याप्नोत्येव। पितुः सूतकमध्ये चेन्मातुः सूतकं। तदा द्वादशाप
हरा मृतकं वर्द्धते। पूर्वसूतके दिवसमात्रावशिष्टे दिनद्वयं विनश्येद् वस्थे दिनत्रयं। अयं च समा
नकालीनयोः समानजातीययोरेव शौचयोः शोधकभावः। स्वल्पतरसमयसंबंधिना प्रचुरतरसम
यसंबंधाशौचाशुद्धेः। अपरेतु मरणोपक्रांते जन्मानंतरं सूतकांतर्मरणेनतस्य स्वतंत्रं सूतकमित्या
हुः। नात्रोदककर्म। अत्र जन्म न द्विवर्षे। तस्य नापिंडादि न। एतत्त्वसह मृतं दाहालावात्। तदुक्तं। नास्य का
र्योग्निसंस्कारो नापि कार्योदकक्रियेति। द्विवर्षप्रभृतिं प्रेतमाश्मशानात्सर्वेनुगच्छेयुः। सर्वे सपिंडाः श्म
शानपदं त्वसहमृतदाहस्तवकं। दाहविधिस्त्ववक्ष्यते। यमगाथां जपन् गायंतो यमसूक्तं च जपंत इत्ये
के। अहरहर्नीयमानो गामश्वं पुरुषं व्रजं। वैवस्वतो न तृप्यति सुरापाइव दुर्मतिरिति यमगाथा॥

अपेतोयंरूपणयइत्ययमध्यायोयमस्त्रकं। एकेगाथादिगानमाहिताग्निविषयमाहुः। यद्युजेतोम्र
मिन्नोमरणादिसमानमाहिताग्नेरोदकांतस्यगमनात्। अपेतःअपनीतः आहिताग्नेःकृतावसथ्यस्यसमा
नंतुम्रभिजोमरणादि। दाहम्रमिसंस्कारादिउदकांजलिदानावधि॥ शालाग्निनादहंत्येनमाहितश्चे
त्। चेच्छालाग्निराहितः॥ ॥ प्रसंगाद्दाहविधिर्लिख्यते॥ साध्याज्जुत्यांकृतायांचेन्मरणशंकातद
प्रातराकृतिस्तदेव। कश्यप इतिचेन्मरणशंकातदात्रवशिष्टान्होमान्यत्न होमविधिनाकृत्वादर्शप
क्वादितदेवकुर्यात्। एवंयथासंस्तवंअसमाप्तमारब्धंसर्पवलिदानादिसमापयेत्। ततोदुर्बलि
वस्थंयजमानंसंलावितसन्निकृष्टमरणंज्ञात्वापुत्रादिःगोमयेनगोमूत्रेणतीर्थोदकेनगंगा
जलेनकुशोदकेनचस्नापयित्वाशुद्धेवाससीपरिधाप्यआवसथ्यसन्निधौगोमयोपलिप्ता
यांभुविदक्षिणाग्रान्कुशानास्तीर्यवकुलांसिलाविकीर्यतत्रप्राक्शिरसमुदक्शिरसंवाभू
मौनिवेशयेत्। काशीप्रयागादितीर्थसद्भावेमणिकर्णिकादिगंगादेशतटेआवसथ्यंसमानीय
तत्संनिधौसर्ववद्यजमाननिवेशनं। मुखेसुवर्णकांस्यमणिविद्रुमान्यतरन्निक्षिपेत्। शालि

गृह०

ग्रामशिलातुलशीचसन्निधौनिधेया। गोपीचंदनतिलकादि। कंठेशिरसिचोत्तमांगाद्विदेश्च
चनिर्माल्यतुलशीप्रक्षेपः। प्रदीपोद्वालनं। विष्णुपूजनं॥ ॐनमोभगवतेवासुदेवायेतिज
पः॥ वैतरण्यादिदानं। तत्रविधिः॥ वैतरणीदानपात्रभूतब्राह्मणएतत्रोपाद्यं। एषतेअर्घः। पूजा।
पादप्रक्षालनं॥ ततःपात्रभूतोद्विजः। आचामेत्॥ दानकर्त्तापादौप्रक्षाल्याचम्यप्राणायामान्
कृत्वावैतरणीदानांगतया। यथासंभवोपचारैर्विष्णोःपूजनंकार्यं। ततोगवाद्युपहारशोधनं।
ततोदेशकालौस्मृत्वायमद्वारस्थितवैतरणीनद्याःसुखोत्तरणकामोवैतरणीधेनुदानमहंक
रिष्यइति संकल्प्यपात्रद्विजंअर्घचंदनपुष्पवस्त्रकुंडलमुद्रिकादिभिःसंपूज्यसवत्सांगांचसंपू
ज्यार्चनविधेःपरिपूर्णतासिद्धितिसंप्रार्थ्याचम्यभोजनपर्याप्तमामान्नंसंकल्प्यब्राह्मणहस्तेसु
प्रोक्षितानिकृत्वाप्रार्थयेत्॥ यमद्वारेमहाघोरेख्यातावैतरणीनदी। तर्तुकामोददाम्येतांतुभ्यं
वैतरणींतुगां। ततःपुनर्देशकालौबुद्ध्वायअमुकसगोत्रायामुकशर्म्मणेब्राह्मणायतुभ्यंअमु
कगोत्रोमुकशर्म्माहंयमद्वारस्थितवैतरणीनद्याःसुखोत्तरणायइमांवैतरणीसंज्ञकांधेनुं

150

सवत्सां विष्णुदैवतां सुवर्णशृंगीं रौप्यखुरां ताम्रपृष्ठां कांस्यदोहनां हूलवस्त्रयुगछन्नां सप्त
धान्यपह्वद्देवश्रेन्दुमयोड्डुपापरिस्थितां वासछत्रोपानत्कांस्यघंटोपवीतसंयुक्तां। कर्पा
सद्रोणस्थताम्रलाजनस्थोपरिस्थितलोहदंडहस्तहेममयसहितां गंधाद्यर्चितां संप्रददे। लग
वान्यापहाविष्णुःप्रीयतां। ततः सुवर्णंतदर्धं क्षौमवस्त्रयुग्मंवासस धान्यानिच। दक्षिणांदद्यात्।
ततः स्तुतिः। यालक्ष्मीः सर्वभूतानां याचदेवेष्ववस्थिता। धेनुरूपेण सा देवी मम पापं व्यपोह
तु। विष्णुरूप द्विजश्रेष्ठ भूदेवः पंक्तिपावनः। सदक्षिणा मया दत्ता तुभ्यं वैतरणी च गौः॥ ततो धेनु
प्रार्थना॥ धेनुके त्वं प्रतीक्षस्व यावदागमनं मम। त्वद्दानात्पावितो देवि पुच्छलग्नस्तराम्यहं। अथवा।
धेनुके त्वं प्रतीक्षस्व यमद्वारे महालये। उत्तितीर्षुरहं देवि वैतरण्यै नमो नमः। वैतरणीदानं परि
पूर्णमस्त्विति प्रार्थ्य द्विजं ब्राह्मणमेत्। स्वयंदानाशक्तौ पुत्रादिर्लिदत्वा तस्मै श्रेयो दद्यात्॥ अथा
ष्टमहादाननिमित्तं विष्णुपूजनं। तत्राद्यं तिलदानं। तिलाः श्वेतास्तिलाः कृष्णास्तिला गोमूत्र
सन्निभाः। ते मे दहंतु पापानि शरीरेण कृतानि वै। इमांस्तिलान्सोमदैवतान्गंधाद्यर्चितान्विष्णुः

गृह

51

प्रीत्यर्थं तिलदानफलावाप्त्यर्थं वा कस्मैचिद्विप्राय ब्राह्मणायेति। एवं सर्वेषु। ततो लोहदानं। य
दायः सर्वकर्माणि तवाधीनानि नित्यशः। लांगलाद्यायुधादीनि ततः शांतिं प्रयच्छ मे। इदं लो
हं अग्निदैवतं। ततो हिरण्यदानं। हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः। अनंतपुण्यफलद
मतः शांतिं प्रयच्छ मे। इदं सुवर्णमग्निदैवतं।३। ततः कर्पासदानं॥ येन दत्तेन धीयंते भूर्भुवः
स्वरिति क्रमात्। ब्रह्माद्या ऋषयः सर्वे शंकराद्या गणास्तथा। इंद्राद्या देवताः सर्वाः कर्पासे
न तु तोषिताः। इमं कर्पासं बृहस्पतिदैवतं।४ लवणदानं॥ यस्मादन्नरसाः सर्वे नोत्कृष्टा लव
णं विना। पितॄणां च प्रियं [illegible] नित्यं तस्मात्स्वर्गप्रदं भवेत्। इदं लवणं विष्णुदैवतं यमादरय
प्राप्त्यर्थं।५। ततः सप्तधान्यदानं॥ व्रीहयो यवगोधूमाश्च मुद्गा माषाः प्रियंगवः। तिलाश्चसस
माः प्रोक्ताः सप्तधान्यमुदाहृतं। अथवा। यवगोधूमधान्यानि तिलाः कंगुस्तथैव च। श्यामाकं
चीनकं चैव सप्तधान्यमुदाहृतं। अन्नं प्रजापतिः साक्षादन्नमेव जनार्दनः। अन्नाद्भवंति भूतानि
जगदन्नेन वर्द्धते। इमं सप्तधान्यं प्रजापतिदैवतं यमतृप्तप्रीत्यर्थं। ततः भूमिदानं॥ समुद्रव

सनादेविख्यातधात्रीचवैष्णवि। सामेदहन्तुपापानिजन्मांतरकृतान्यपि। इमांत्वमिंविष्णुदैव
तां। ततस्त्रिसृणांगवांदानं। गावोममाग्रतःसंत्विति इमास्तिस्रोगाः॥ रुद्रदेवताःत्रिविधपाप
क्षयार्थं। तिलादिषुसप्तसुदानेषुहिरण्यंदक्षिणाहिरण्यदानेतुरजतमिति। इत्यष्टकृदानासंक
वेसमुदितानांसंकल्पनं। इमानितिलादीन्यष्टौमहादानानिनानादेवतानिगंधाद्यर्चितानिस
दक्षिणानि। तत्रदानफलप्राप्तयेविष्णोःप्रीतयेवानानानामगोत्रेभ्यइत्यादि। समभ्यर्च्यहृषी
केशंपुष्पधूपादिभिस्ततः। प्रणिपातैस्तवैःपुण्यैर्ध्यानयोगेनपूजयेत्। दत्वादानंचविप्रेभ्यो
दीनानाथेभ्यएवच। बंधौकलत्रेपुत्रेचगृहेत्रधान्यधनादिषु। मित्रवर्गेचसर्वत्रममत्वंविनि
वर्तयेत्। ततःसतिलासंलवेयथाशक्तितिलधेन्वादिदानं। अनवरतंविष्णुस्मरणं। ततःपुत्रादि
पुरुषसूक्तोपनिषदादिकंश्रावयेत्। ततोगतप्राणंज्ञात्वापुनःपुत्रादेःस्नानं। मृतशरीरंप्रक्षा
ल्याहतेपरिधानीयोत्तरीयेपरिधाप्यचंदनेनप्रोक्ष्यपुष्पैरलंकुर्यात्। दुर्मरणंचेत्प्रायश्चित्तं।
शृंगिदंष्ट्रिनखिसर्पविषविद्युज्जलाग्निब्राह्मणांत्यजचौरमारितस्यमरणेदोषशक्त्यनु

ग॰ द्य॰

52

सारेण विष्णुस्मरणपूर्वकं त्रीन् वर्षान् द्वादश पंचदश वा प्राजापत्यान् विप्राज्ञया कृत्वा गवादितद्
त्याम्नायदानेन वा शुद्धिं संपाद्य दाहादि कुर्यात्। एवं मुमूर्षोरपि पापसंभवे तदनुरूपप्रायश्चि
त्तानंतरमेव वैतरण्यादिदानाधिकारः। दाहकर्त्तापि स्वपापानुरूपप्रायश्चित्तानंतरमेव दाहा
दिकार्यं। लोभादिना चेत्प्रायश्चित्तं न कारयति न वा करोति तदा उभावपि नरकं गच्छतः। एव
मूर्द्धाधरान्यतरोच्छिष्टोभयोच्छिष्टाज्ञातास्पृश्यास्पृष्टश्वसूकरदष्टादौ मरणे शक्तिदोषानुरूप
प्रायश्चित्ताचरणं। अकृतप्रायश्चित्तस्य कृतमप्यंतरिक्षे नश्यति। प्रयोगः। अमुकदुर्मरणज
नितदोषनिवृत्त्यर्थं दाहाद्यौर्ध्वदैहिकयोग्यतालाभाय अमुकप्रायश्चित्ताचरणं करिष्ये इति। ततः
आवसथ्यं स्थाल्यां कृत्वा प्रेतस्य शिरःप्रदेशनिकटे स्थापयेत्। ततः मरणस्थाने प्रेतायैकोद्दिष्ट
विधिना पिंडदानं। ब्राह्मणलाभे दर्भवटुं स्थाप्य पादौ प्रक्षाल्य तत्र श्रीप्राणनाथस्यापसव्यं कृत्वा
द्यामुकप्रेतस्य प्रेतत्वनिवृत्त्यर्थं दाहादियोग्यताप्राप्त्यर्थं मरणस्थाने एकोद्दिष्टविधिना श्रा
द्धमहं करिष्य इति संकल्प्य दुष्टदृष्टिनिपातादिदूषितः श्राद्धोपहारः इतो भवत्वित्युपहा

रघोद्धरणं कुर्यात्। गोत्र प्रेते हृते आसनमित्यासनदानं। आचमनं। आमान्नं सघृतं गोत्र प्रेत तते
उपतिष्ठतामित्यामान्नसंकल्पः। अद्येत्यादि अमुक प्रेतस्य प्रेतत्वनिवृत्त्यर्थस्यास्य श्राद्धस्यै
कोद्दिष्टविधेर्यत्कृतमित्यादि हस्तः। ततः पिंडदानं। सम्मूलात् दक्षिणाग्रात् दर्भान् तीर्थ प्रेत गो
त्र प्रेतैतत्तइति पिंडदानं। सूत्रदानं। ततस्तुलसीमुदकं वटो बिल्व करे वादत्वा अमुक स्य गोत्रामुक
प्रेत दत्तं श्राद्धं ते उपतिष्ठतामित्यक्षय्योदकं दद्यात्। ततः सव्यं कृत्वा दक्षिणादानं माषवान्न ज
लसंयुक्त कुंभदानं च। अयं कुंभो माषवान्नजलसहितः गोत्र प्रेत तते उपतिष्ठतामिति। पिंडचा
लनं। अस्योत्क्रांति श्राद्धस्य यन्न्यूनं यदतिरिक्तं तत्सर्वं विष्णोः प्रसादात् परिपूर्णं। अनेन गोत्र
स्य प्रेतस्य प्रेतत्वनिवृत्तिः। दाहादियोग्यता प्राप्तिः। बटुविसर्गः॥ श्राद्धानंतरं शवनाम्ना मृतस्था
ने पिंडदानं। अमुकगोत्रामुक शव एतत्तइति प्रयोगः। माषान्नसहितकुंभदानं। ततः द्वारदेशे
सर्ववच्छ्राद्धं एकोद्दिष्टविधिना श्राद्धानंतरं पांथनाम्ना पिंडदानं पांथ एतत्तइति। समाप्य कुंभदा
नं च। ततः शकटादिनानीयमाने प्रेते सर्वे सपिंडाः अनुगच्छेयुः यमगाथां गायंतो यमसूक्तं वा

ग॰ह्य॰

हृचप्रसिद्धंजपंतः श्मशानपर्यंतं। ततस्तत्रखरेप्रेतनाम्नापिंडदानं। समाखसजलकुंभदानं। ततः
ग्रामश्मशानयोर्द्धमार्गे सर्ववक्राहं। श्राद्धानंतरं तत्रैव ५ पुनर्मृतनाम्नापिंडदानं भूतएतन्नद्रुति
प्रयोगः। समाखकुंभदानंच। धनिष्ठादिपंचकमरणे पंचरत्नानिमुखेसुस्कावहव्वपामिन्या
क्रुतिदूयंदत्वादाहः। रत्नपंचकंतु। वज्रमौक्तिकवैदूर्यपुष्परागेन्द्रनीलकमिति॥ गरुडपुरा
णेतु॥ दर्भमयपुत्तलकचतुष्टयंकृत्वातैः यातेधामानिपरमाणीत्यादिशिक्षामंत्राणिमंत्रितैः
सहदग्धव्यास्तत्कांतेपुत्रादिः शांतिकंकुर्यात्। तत्रचतिलघृतहिरण्यपत्नाजनोपानच्छत्रगवादे
प्रेतोद्देशेनदानं। ततोनिर्हरणानंतरं श्मशानभूमौदक्षिणाशिरसंशवंस्थापयेत्। ततस्थित
स्थानेसर्ववदेकोहिसंकुंभदानंच। ततः साधकनाम्नाप्रेतनाम्नावापिंडदानं। कुंभदानंच। तीर्था
नावेतार्थानिध्यायेत्। ततः प्रेतस्यकेशश्मश्रुलोमानिछित्वाखनेत्। ततः काष्ठादिचितिंसं
पाद्यतत्रदक्षिणाग्रीवसुत्तरलोमंकृष्णाजिनमास्तीर्यतस्मिन्दक्षिणाशिरसमुत्तानंप्रेतंनि
धायप्रेतसंबंधिवस्त्रांहिधाकृत्वेकेनप्रेतशरीरमाच्छादयेदिति। यंभूमौश्मशानवास्ययद्दि

53

ता। ततः प्रेतस्य करे प्रेतनाम्नैव पिंडदानं कुशलदानं च। ततः प्रेतमाज्येनाभ्यज्य मुखे दक्षिणो
त्तरनासिकाचक्षुः श्रोत्रेषु चक्रमेण सप्त हिरण्यशकलानि क्षिपेत्। ततः पात्रप्रतिपत्तिः
स्रुचं मुखे। दक्षिणनासिकायां। स्रुवः। शिरसि चमसं प्रणीता प्रणयनं। पार्श्वयोः शूर्पे वृष
णयोः अरणी प्रोक्षणी पात्रादीनामंतरोरुप्रक्षेपः। चात्रौवेलीकयोश्च। लोहानां मृण्मयानां
च ब्राह्मणाय दानमप्सु वा प्रक्षेपः। ततः कृत्वा सुदुष्करं कर्म्म जानता वाप्यजानता। मृत्युकालव
शं प्राप्य नरं पंचत्वमागतं। धर्माधर्मसमायुक्तं लोभमोहसमावृतं। दहेयं सर्वगात्राणि दिव्या
न्लोकान्स गच्छतु। ततश्चंदनपुष्पाक्षतैरग्नेः पूजनं। तत्र मंत्रः। त्वं भूतकृद् जगद्योने त्वं लोक
परिपालकः। उक्तसंस्कारकस्तस्मादेनं स्वर्गं मृतं नय। ततश्चावसथ्येन चितेर्दक्षिणप्रदेशे प्र
दीपनं। ततो मृतस्य पुत्रो वा भ्राता वा [illegible]न्यो वा ब्राह्मणः कृतापसव्यः आवसथ्ये आज्यसंस्कारं
कृत्वा स्रुवेणास्मात्त्वमित्याहुतिं समिद्धं जुहोति। स्रुवं दक्षिणनासिकायां निधाय स्फ्यं दक्षिण
हस्ते स्थापयेत्। ततो दर्भेण कुंडलं स्कंधे कृत्वा तेन प्रेतपादादारभ्य प्रदक्षिणं धारां दत्वा

ग स्र

रोदनंकुर्यात्। सूतिकावारजस्वलावायदिप्रेतस्यांशंकरोति। तदोदकस्यैकुंभेपंचगव्यंप्र
क्षिप्यापोहिष्ठादित्यादिभिरिति मंत्रब्राह्मणानुज्ञयापंचदशग्राजाप्रत्यान्कृत्वातेनोदकुंभे
नशतकृत्वस्संस्नापयित्वानव्येनवस्त्रेणसंवेष्ट्यदहेत्। सूतिकामरणेरजस्वलामरणेप्येषए
वविधिः। स्त्रीचेत्सहगमनंकुर्यात्तदासन्निकृष्टमरणंस्वामिनंप्रतिवदति। देवैःसंपादितोम
हांपतिस्त्वंसर्वदैवतं। त्वयासहगमिष्यामिजन्मांत्वंचायजन्मनि।। रतिसंकल्पः।। स्नात्वाश
क्त्यातिलधेन्वादिदानं। कुंकुमांजनमुकुटाद्यैरात्मानमलंकृत्यपायसमाचरतोभुंजीत
नैषभयतानकदापिभूयात्पत्यावंध्यात्वमेतंनकदापिचास्तुदौर्भाग्यमेतंनकदापिचास्तु। एव
मुक्त्वासमस्तंधनंविसृज्यसर्वंगतांततःकरणस्वगृहमहतैर्वस्त्रैःकुंकुमाक्तहस्तांकित
द्वारंकृत्वाश्मशानंप्रतिनीयमानंस्वामिनमनुयाति। अतिपदमश्वमेधफलंजानती। वड
वामारुह्यवागच्छेत्। ततःसहगमनार्थंस्नास्यइतिस्नात्वानवंवस्त्रंपरिधायात्मानमलंकृ
त्यप्रतिनिधिनास्वयंवापिंडदानंकृत्वाऽग्नयेऽर्घ्यंदद्यात्। नानाफलान्हस्तेकृत्वा। चितिस्थो

54

भगवानग्निर्विष्णुरूपी सनातनः। पतिसालोकलालायस्त्वहारणार्थेनमोक्ष्यतइति। ततः स्तुतिः।
त्वंब्रह्मात्वंवै विष्णुस्त्वंरुद्रस्त्वंप्रजापतिः। त्वंसूर्योवसवश्चाष्टौपरमात्मात्वमेवहि। त्वमेवका
रणंविष्णोःशरणंनृपतिर्मम। स्वर्गेवाह्यपवर्गेवायत्रयत्रगमिष्यसि। तत्रतत्रह्यहंत्वंचैवलग्नमे
ष्यामिमामुच। ब्रह्महत्यादिभिःपापैस्त्वामाकृष्येयमालयात्। अहंब्रह्मातथाविष्णूरुद्रश्चैवप्र
जापतिः॥ आदित्यचंद्रावनिलोनलश्चद्यौर्भूमिरापोहृदयंयमश्च। एतेचसर्वेममसाहसेनतु
ष्यंतुदेवाऋषयश्चसर्वे। ततःप्रदक्षिणासप्तकंकृत्वाचितांप्रविशेत्। तत्रमंत्रः। इदंशरीरंत्वति
मंगलंप्रलोद्गध्वाकृशानोकुरुलव्यमाशु। तथैवलर्तुःकुरुदिव्यदेहंलर्तुःसमीपंलगवन्व्रजा
मि। किमनयाकृतंसाध्रुवंवेद्यंदितवानघा। इदंशरीरमालिंग्यप्रविशामिहुताशनं॥ इतिसंक्षेप
तःसहगमनविधिः॥ निःशेषस्कन्दग्धव्यइतिवचनात्सशेषोदाहः। ततःसप्तसप्तप्रदक्षिणाः
चिताग्नेःकुर्वंति। प्रतिप्रदक्षिणमेकैकांसमिधंक्षिपंतः। ततःकुंभमादायउल्मुकोपरिप्र
रस्सप्तकंदद्यात्। तत्रहीग्रामाग्निनेतरं। ग्रामाग्निनालौकिकेनाग्निना। अस्मात्त्वमितिमंत्रंविना

ग ला ज्ञा ष्ठी
विभागो नरी याज्ञिक देवदत्तस्येदं पुस्तकं धर्म ग स्ति स्व त्रमा छा।

गृह्य॰

इतरं अकृता वसथ्ये। ततः क्रव्यादायनमइत्याग्निमप्रदक्षिणं त्यक्त्वा कनिष्ठपूर्वाः एवंविद्यमग्र
यांगा येतान द्यादौगच्छंति। संयुक्तं मैथुनं वोदकं या [illegible] रन्नुदकं करिष्यामहइति। संयुक्ता सं
वंधी तै संवंधनिरूपकस्यनानात्वान्नियतं निरूपकत्वाह। मैथुनमिति। उत्तरदाना सिद्धंतं श्व
लकं। अन्यं वा पुरुषं। उदकं। उदकदा [illegible] इ। कथमतआह। उदकं करिष्यामहइति मंत्रेण।
उत्तरमाह। कुरु धूंमा चैवं पुनरित्यशतवर्षयेते। अतिक्रांत शतवर्षेत्युत्तरमाह। कुरु धूमि
त्येवेतरस्मिन्। सर्वेज्ञातयो ऽपोभ्यवयंत्यासप्तमात्पुरुषाद्दशमाद्वा। ज्ञातयः सपिंडाः समा
नोदकाः। सर्वे। सापिंड्यमाह। आसप्तमात्पुरुषात्। आइन्यतलिप्सा पार्थ। समानोदकत्व
माह। दशमादिति। तेसर्वे ऽप्यपः जलं प्रत्यवयंति प्रविशंति। समानग्रामवासे यावत्संवंधमनु
स्मरेयुः। तथा चतत्प्रतिरेके ऽपः प्रवेशादिव्यतिरेक इत्यर्थः। एकवस्त्राः प्राचीनावीतिनः स
व्यस्यानापनोद्यापनः शोसुवदद्यामितिदक्षिणामुखानिमज्जंति। अनमंतो ऽसंधावमानाप्र
तिरोधः। अपनोदनं तूष्णीं निमज्जनं मंत्रेण। अशिषाः सर्वमलापहं स्नानं वा कुर्वंति। अंगोद्व

११५

५४